ISSN– 2320–5911

# प्रज्ञालोकः

(रामकृष्णमिशन्-विवेकानन्दविश्वविद्यालयस्य संस्कृताध्ययनविभागस्य शोधपत्रिका)

## तृतीयः अङ्कः

## द्वितीयो भागः

उपदेष्टा

स्वामी आत्मप्रियानन्दः

सम्पादकमण्डली

राकेशदाशः

गोपीकृष्णन् रघुः

वेङ्कटरमणभट्टः

नागराजभट्टः

संस्कृतविभागः

रामकृष्णमिशन्-विवेकानन्दविश्वविद्यालयः

वेलुडमठम्

प्रज्ञालोकः
(संस्कृताध्ययनविभागस्य शोधपत्रिका)
*Prajñāloka*
(Research Journal of Department of Sanskrit Studies)

ISSN– 2320–5911

सम्पादकमण्डली–
राकेशदाशः
गोपीकृष्णन् रघुः
वेङ्कटरमणभट्टः
नागराजभट्टः
Board of Editors–
Rakesh Das
Gopikrishnan Reghu
Venkataramana Bhat
Nagaraja Bhat

प्रकाशकः– स्वामी हरिहरानन्दः
कुलसचिवः
रामकृष्णमिशन्-विवेकानन्दविश्वविद्यालयस्य
वेलुडमठस्थस्य, हावडामण्डले, पश्चिमवङ्गेषु
Publisher– Swami Hariharananda
Registrar
Ramakrishna Mission Vivekananda University
Belur Math, Howrah, West Bengal

©प्रकाशकस्य
©Publisher

प्रकाशनवर्षम्– २०१५
Year of Publishing– 2015

मूल्यम्– ₹ ५०/-
Price– ₹ 50/-

Powered by $\LaTeX 2_\varepsilon$

# सूचीपत्रम्


| क्रमः | निबन्धः निबन्धकारश्च | पुटम् |
|---|---|---|
| १. | निवेदनम् | 01 |
| २. | Foreword<br>Swami Atmapriyananda | 03 |
| ३. | व्याकरणाभिमतमोक्षस्वरूपम्<br>दिव्यचेतनब्रह्मचारी | 05 |
| ४. | मिदचोऽन्त्यात्परसूत्रस्थवार्त्तिकैकदेशप्रत्याख्यानम्<br>पङ्कजकुमारव्यासः | 11 |
| ५. | कथं तर्हि दुर्धियः वृश्चिकभियः इत्यादि<br>यदुवीरस्वरूपः | 16 |
| ६. | कारकशब्दार्थविमर्शः<br>सौरभमण्डलः | 27 |
| ७. | मनोः वर्णव्यवस्थास्वारस्यम्<br>शम्पापालः | 36 |
| ८. | शङ्करस्याद्वैतसिद्धान्ते निर्विकल्पकसमाधिस्वीकृति-पर्यालोचनम्<br>पलाशघोडइः | 43 |
| ९. | दृग्दृश्यसम्बन्धद्वारेण प्रतिकर्मव्यवस्थोपपादनम्<br>अर्णवघोषालः | 58 |
| १०. | कवेः सीतानाथस्य काव्येषु प्रतिबिम्बिता सामाजिकी समस्या<br>तन्मयकुमारभट्टाचार्यः | 70 |

११. समकालिक-संस्कृतोपन्यासेषु भारतीयता 87
नारायणदाशः

१२. काव्यशास्त्रे शास्त्रान्तराणां प्रभावः 104
धर्मेन्द्रकुमारसिंहदेवः

१३. विंशशतकस्य वङ्गदेशीयाः संस्कृतकवयित्र्यः 112
शुभ्रजित् सेनः

१४. मेघदूते दाम्पत्यजीवनवैचित्र्यम् 130
भारतीप्रसादः

१५. Medicinal Aspects in *Agnipurāṇa* 137
Yagandla Suresh

१६. Obstructive attitudes in performance of work with special reference to *Bhagavadgītā* 143
Parag Joshi

१७. Imageless reflection And Nature of bliss 147
Sampath Kumar Medavarapu

१८. Circulation of Astrological Prerequisites in the *Prāṇa* According to *Kāśmīra-Śaivism* (with Special Reference to *Tantrāloka*) 154
Shyam Deo Mishra

# निवेदनम्

ऐषमः प्रज्ञालोके तावन्त उत्तमा निबन्धाः समागता यत् प्रबन्धानां चयनं सम्पादकानां कृते क्लेशायाभूत्। अतः सर्वेऽपि प्रबन्धाः प्रकाशनीया इत्यस्माभिः निर्णयः कृतः। किन्तु एकस्मिन् ग्रन्थे एतेषां सर्वेषां प्रबन्धानां समावेशस्य असौविध्यात् पूज्यानां कुलपतीनां परामर्शानुसारं प्रज्ञालोकस्य अस्य अङ्कस्य भागद्वयेन प्रकाशनस्य सिद्धान्तमकुर्म। तदनुसारं पूर्वसूचनानुसारं जुलैमासस्य तुरीये दिने विश्वविद्यालयस्य समावर्तनसमये तृतीयाङ्कस्य प्रथमो भागः प्रकाशमागात्। सम्प्रति तस्यैव द्वितीयभागस्य प्रकाशनं क्रियते।

अग्रिमम् अङ्कम् आरभ्य पत्रिका विशेषज्ञपरीक्षिता (Peer Reviewed) भविष्यति। देशस्य विभिन्नभागेषु विविधा विद्वांसः प्रबन्धानां परीक्षणाय अस्माभिः अनुरुद्धाः ते च तदर्थं अङ्गीकारं प्रदाय अस्मान् अन्वगृह्णन् अपि। इतः परं पत्रिकाया विषये काचिद् जिज्ञासा अस्ति चेत् कृपया अस्माकं विभागस्य जालपुटे (ih.rkmvu.ac.in/) प्रज्ञालोकस्य पुटं (ih.rkmvu.ac.in/prajnaloka.htm) पश्यन्तु। तत्र प्रबन्धसमर्पणादिसम्बन्धिनः निर्देशाः प्रदत्ताः सन्ति।

पत्रिकायाः प्रकाशनार्थं नियतम् अस्मान् प्रोत्साहितवद्भ्यः सम्माननीयकुलपतिभ्यः, पत्रिकायाः प्रकाशकेभ्यः विश्वविद्यालयस्य माननीयकुलसचिवेभ्यः, पत्रिकायाः टङ्कनकार्ये अक्षरपरिष्कारादिकार्ये च साह्यम् आचरितवद्भ्यः अस्माकं विभागस्य शोधच्छात्रेभ्यः, संस्कृताध्ययनविभागस्य समायोजकेभ्यः स्वामिजपसिद्धानन्देभ्यः, मुद्रकेभ्यः, सर्वेभ्यः प्राबन्धिकेभ्यः च वयं सविनयं धन्यवादं वितरामः अस्मिन् प्रसङ्गे।

भगवतः अनुकम्पया पत्रिकायाः प्रकाशनस्रोतः अविच्छिन्नं भवत्विति सम्प्रार्थ्य विरमामः।

सम्पादकाः

RAMAKRISHNA MISSION VIVEKANANDA UNIVERSITY
(Declared by Government of India under Section 3 of UGC Act, 1956)
PO Belur Math, Dist Howrah 711202, West Bengal, India

# Foreword

यश्छन्दसामृषभो विश्वरूपश्छन्दोभ्योऽध्यमृताथ्सम्बभूव। स मेन्द्रो मेधया स्पृणोतु। अमृतस्य देव धारणो भूयासम्। शरीरं मे विचर्षणम्। जिह्वा मे मधुमत्तमा। कर्णाभ्यां भूरिविश्रुवम्। ब्रह्मणः कोशोऽसि मेधया पिहितः। श्रुतं मे गोपाय॥ ॐ शान्तिः शान्तिः शान्तिः॥

May that Supreme Lord in the form of *Om* that is the prime component of all *Vedas*, pervading and encompassing all sounds, manifested as the immortal essence of the *Veda*, energize and assure me by granting intuitive intelligence *(Prajñā)*. O Lord, may I become a receptacle for immortality in the form of *Brahman-Knowledge*. May my body be fit and strong [for this purpose], may my tongue speak sweet words, may my ears listen to profuse divine talks. You are the container of *Brahman* (or you are the symbol of *Brahman* as Its covering), [but] you are covered by *medhā* (intellectual prowess). Graciously protect my Knowledge gained through study and listening [to the preceptor and men of *Brahaman-realization*]. Om Peace, Peace, Peace.

We published the first part of the third issue our Research Journal Prajnaloka of the Department of Sanskrit Studies under the School of Indian Heritage, Ramakrishna Mission Vivekananda University, on the occasion of the University Foundation Day on 4 July 2015. The present second part is now being published on the occasion of Saraswati Puja during February 2016. This second part of the third issue of the research

journal Prajnaloka published by the Department of Sanskrit Studies is, as mentioned earlier in my Foreword to the first part, is a reverential attempt to worship surabharati by our faculty of the Department of Sanskrit Studies. Our hearty congratulations to the faculty members of the Department on this sustained effort and tenacious pursuit of this literary endeavour. May Surabharati Medhadevi Vagdevi Saraswati make our hearts Her eternal abode and bless us with the awakening and blazoning of the Light of Wisdom, prajnaloka, is the humble prayer of

Swami Atmapriyananda
Vice Chancellor

Belur Math
15 June 2015
(Sacred day of *Phalahāriṇī Kālīpujā*)

# व्याकरणाभिमतमोक्षस्वरूपम्

दिव्यचेतनब्रह्मचारी*

सम्पूर्णजगदुत्पत्तिलयस्थितिकाधिष्ठानभूतकरुणावरुणालयभक्तवत्सलसङ्गीत-
शास्त्रविशारदभगवच्छङ्करनटराजराजप्रसादलब्धभावभावितभावनाकृष्टान्तस्सनका-
दिसिद्धमहापुरुषानुष्ठिताऽनादिशब्दराशिबोधिततपस्तपितभावभावितभक्तिपरिणमित-
बोधात्मकसङ्कल्पसङ्कल्पितभक्तचित्ताकर्षितभक्तिभावनाभावितद्रवितान्तःकरणभक्त-
मनोभावोद्भूतगङ्गाप्रवाहपातोद्भूतजलकलरवोद्भूतोद्घोषघोषितोङ्कारप्रतिध्वनिसमुदाय-
वेगाहतोद्भूतक्षोभौघपरिणमद्रसास्वादानन्दोर्मिपरस्पराघातसमाधिभङ्गोद्भूतताण्डव-
नृत्यभावभावितभावनागृहीतढक्कानादोद्भूतचतुर्दशसूत्रजालजालितपाणिनिव्याकरण-
व्याकृतशब्दसाधुत्वावबोधप्रयोगप्रादुर्भूतपुण्यजनितशमादिभावच्छालितोद्भूतबोध-
बोधितचित्ताकर्षणकर्षितेष्टदेवताप्रसादजनितरसस्वादस्वादितचुम्बिताऽलिङ्गितलिङ्ग-
लिङ्गितशाश्वतशिवकैवल्यबोधबोधकं व्याकरणशास्त्रमिदं राराजते मोक्षमार्गः।

किमर्थं? वाव्रज्यते शास्त्रान्तरे शब्दशास्त्रमन्तरा। मोक्षपदार्थः कः? शाब्दिक-
नये श्रुतिसिद्धोत्पत्तिकसंसारकार्यजालजालितविक्षेपावरणकार्यकारणानादिनिर्वच-
नानवच्छिन्नशब्दशब्दिताऽसल्लक्षणलक्षणानवच्छिन्नसल्लक्षणनिरवच्छिन्नोभयसद्-
सल्लक्षणलक्षितलक्षणानच्छिन्नज्ञानविरोधिलक्षणलक्षिताऽविद्यामायादिशब्दशब्दित-
गुरूपदिष्टवेदान्तवाक्यश्रवणमनननिदिध्यासनविचारभावोद्भूतभावभावितचित्तैकाग्रता-
ध्वस्ताऽसम्भावनासंशयभावनाविपरीतभावनोत्तरजायमानाऽविद्यातत्कार्याकाशादि-
पञ्चभुतोद्भूतसत्वांशजनितशब्दस्पर्शरूपरसगन्धग्राहकेन्द्रियतत्समुदितसत्वांशजनि-
लब्धान्तःकरणकतद्रजोंऽशोद्भूतक्रियाश्रयभूतवाक्पाणिपादोपस्थगुदेन्द्रियकतत्समुदित-
रजोंऽशोद्भूतप्राणादिभाववावितसूक्ष्मशरीरसप्तदशावयवपञ्चभूतावशिष्टभागतमोंऽश-
पञ्चीकरणप्रक्रियात्मकपद्धतिजनितस्थूलभ्वादिचतुर्दशभुवनतदन्तःपातिचतुर्विधशरीर-
तदुपभोगसाधनान्नपानादिसमस्तौषधिकार्यकारणाऽनादिकर्मवासनावासितशोक-
निवृत्त्यानन्दावाप्तिश्च मोक्षपदाभिहितोऽर्थः। एतस्य कथं लाभः स्यात् कीदृशः
प्रायशः कर्तव्य इति जिज्ञासा स्वभाविकी विचारपराणां मनसि जायते।

तदर्थं महाभाष्यमनुश्रित्य विचार उपस्थाप्यते। तथा सर्वतन्त्रस्वतन्त्र-

---

*प्राध्यापकः, व्याकरणविभागे, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य, वाराणसीस्थस्य

सर्वशास्त्रविशारदसर्वसमाजविन्नित्यनिरन्तरशब्दशास्त्रविचारप्रचारप्रसारभाराविर्भूत-साधुशब्दभावनोल्लसितानन्दाहितान्तःकरणप्रसादजन्यशब्दशास्त्रोद्धारोद्भूतव्याकरण-पठनपाठनसौकर्यसाधनसाध्यापशब्दव्यवहारजनिताधर्मध्वंसनभावभावितसाधुशब्द-व्यहारजनितपुण्यपुञ्जोद्भवभूतहृदयवृत्तिपवित्रतोत्तरकालिकोपासनाधीनचित्तैकाग्रता शिष्यान्तःकरणे कथं जनिं लभेत तदर्थं व्याकरणाध्ययनप्रयोजन-दर्शनव्याजेनान्तःकरणशुद्धिः कथं स्यादेतदर्थमपि मोक्षोपयभूतसाधनं व्याकरणाध्ययनादिदं फलमाह 'रक्षोहागमलघ्वसन्देहाः प्रयोजनम्'[१] इत्यत्र प्रयोजनशब्दः फलपरकः प्रयोजकपरश्चेति। फलपरके प्रयोजनशब्दस्य व्युत्पत्तिः– प्रयुज्यते विधीयते यत्तत् प्रयोजनम्" फलमित्यर्थः। कर्मणि ल्युटि कृते प्रयोजनमिति शब्दस्य साधुत्वमवधेयम्। प्रयोजकपरके तु प्रयुज्यते प्रवर्त्यतेऽनेनेति करणल्युडन्तः, प्रयोजयतीति कर्तृव्युत्पत्या बाहुलकात् कर्तृल्युडन्तो वा, उभयथापि प्रवर्तकविधिपरः पुँल्लिङ्गः प्रयोजनशब्द एकः, फलपरः क्लीबोऽपरः। प्रयोजकपरः पुँल्लिङ्गः बाहुलकात् कर्तरि ल्युटि आगमप्रयोजकं न तु फलम्। एवं हि प्रयोजनं च प्रयोजनश्चेति विग्रहे नपुंसकमनपुंसकेनैकवच्चान्यतरस्याम् (अष्टा० १.२.६९) इति नियमेनैकशेषः। यः शिष्यते स लुप्यमानार्थाभिधायीति रीत्या प्रयोजकार्थपरः प्रयोजनशब्दः वर्तते। तत्र विवक्षितत्वात् प्रश्ने बहुवचनमुत्तरे एकवचनमस्ति। अतः व्याकरणाध्ययनस्य किं फलं किं च प्रयोजकमिति जिज्ञासा समुदेति अतो हेतो रक्षोहालघ्वसन्देहाः व्याकरणाध्ययनस्य शब्दज्ञानेन चत्वारि फलानि प्रयोजनानि आयान्ति। तथा आगमः प्रयोजकपदेन गृह्यते। अत्र वेदानां रक्षा यथा स्यादेतदर्थमध्येयं व्याकरणमित्यादिकं व्याचख्युः महाभाष्यकाराः। वेदानां रक्षणेन को लाभः स्यादित्यादिप्रश्ने किमुत्तरं देयं भावना समुदेत्येव व्याकारणाध्ययनाध्यापनरतानाम्। ममान्तःकरणे तु स्फुरति समाधानं– वेदशास्त्ररक्षया संस्कृतिः रक्षिता भवति रक्षितसंस्कृतिः अस्मान् रक्षयति। अस्मद्रक्षणं तु तदैव सम्भवति यदा दुःखनिवृत्तिः स्याद् अथ च आनन्दानुभूतिस्स्याद्। एतेन सिद्ध्यति व्याकरणस्य चरमं फलं दुःखध्वंससमकालिकानन्दावप्तिः। तत्र वेदानां पाठकरणेन पुण्यं जायते इत्यत्र मानं तु महाभाष्यवचनमेव तथा हि– अप्रयुक्ते दीर्घसत्रवत्। तद् यथा दीर्घसत्राणि वार्षशतिकानि वार्षसहस्रिकाणि च न चाद्यत्वे कश्चिदप्याहरति। केवलमृषिसम्प्रदायो

[१]महाभाष्ये पस्पशाह्निके

धर्म इति कृत्वा याज्ञिका शास्त्रेणानुविदधते।[२] एतस्य तात्पर्यमाह श्रीमान् शेषनारयणः– इदानीं सामग्र्यभावाद् दीर्घकालानि सत्राणि याज्ञिकैर्यद्यपि नानुष्ठीयन्ते तथापि ऋषिर्वेदः सम्प्रदायोऽवच्छिन्नं मूलमस्य धर्मस्येति कृत्वा शास्त्रेण वेदाख्येन कारणेनानुविधीयन्ते ज्ञायन्ते। लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः। इत्यतः समायाति धर्मः व्याकरणसूत्रस्मरणपूर्वकशब्दव्यवहारेण जायते। यदि निष्कामभावेनानुष्ठितो भवति तदा चित्तशुद्धिकरो धर्मो भवति। अत एवोक्तम्– आगमः खल्वपि। ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयः।[३] निष्कारण इति। दृष्टं कारणमनपेक्ष्येत्यर्थः। नित्यकर्मवद् व्याकरणाध्ययनमन्तःकरणशुद्धिद्वारा मोक्षसाधकं भवति। तथा चोक्तं वेदान्तसारे– एतेषां नित्यादीनां बुद्धिशुद्धिः परं प्रयोजनम्। मोक्षमार्गविषये व्याकरणमाद्यं शास्त्रं भवति। तथा च महर्षिचरणानुचरचञ्चरीकविविधशास्त्रशासितान्तःकरणकः कृत्साक्षाद्धर्मा ऋषिकल्पः भर्तृहरिः व्याचख्यौ व्याकरणस्य मोक्षपरत्वम्। तथाहि–

इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम्।
इयं सा मोक्षमाणानामजिह्मा राजपद्धितिः॥ (वाक्यपदीये ब्रह्मकाण्डे)

अत्राम्बाकर्त्री– इदं व्याकरणम्। सिद्धिसोपानपर्वणां– सिद्धिर्मोक्षः; तस्य या अन्तरालावस्था भूमिकासप्तकादयो योगशास्त्रप्रसिद्धास्तास्तत्प्राप्तौ सोपानतुल्यात्वात्। सोपानानि तेषां प्रत्येकं विभागाः। पर्वाणि तेषां मध्ये प्रथमं पर्व इयं व्याकरणविद्या। मोक्षमाणानां पुंसां सा मुखं व्याकारणं प्रोक्तम् इत्यादिशास्त्रप्रसिद्धा विद्वदनुभवसिद्धा च। अजिह्मा अवक्रा सरला राजपद्धती राजमार्गः मोक्षप्राप्तावित्यर्थः[४]। मोक्षमार्गस्योपदेशोऽपि लभते व्याकरणे तथाहि एकः शब्दः सम्यग् ज्ञातः सुप्रयुक्तः स्वर्गे लोके कामधुग् भवति। अन्यत्रापि उपलभ्यते भाष्ये। तथाहि–

नाकमिष्टसुखं यान्ति चतुर्भिर्वाडवै रथैः।
अथ पत्काषिणो यान्ति येऽचीकमतभाषिणः। (महाभाष्ये ३.१.२८ सूत्रस्य भाष्ये)।

सक्तुमिव तितउना पुनन्तो

---

[२]महाभाष्ये पस्पशाह्निके

[३]तत्रैव

[४]अस्याः कारिकाया अम्बाकर्त्रीव्याख्यानम्

यत्र धीरो मनसा वाचमक्रमत।
अत्रा सखायः सख्यानि जानते
भद्रैषा लक्ष्मीर्निहिताधिवाचि॥

अत्र महाभष्ये अत्रा सखायः सन्तः सख्यानि जानते =सायुज्यानि जानते।[५] अत्र कैयटः- सख्यानि समानख्यातयो भेदग्रहस्य निवृत्तत्वात् सर्वमेकमिति मन्यन्ते। सख्यानि सायुज्यानि। एकगम्यो वाग्विषयः। ज्ञानैकप्राप्यः। उद्योते ऋङ्मन्त्रव्याख्यानम्– यत्र व्याकरणे धीराः ध्यानवन्तः सन्तः तितउना सक्तुमिव ध्यानयुक्तमनसा तत्करणज्ञानेन वाचमक्रमत अकृषत असाधुशब्देभ्यो विविक्तां कृतवन्तस्ते तत्करणेन शुद्धचित्ता अत्र ब्रह्मप्रतिपादकशब्दे शब्दार्थयोरभेदबुद्ध्या सखायः समानख्यातयः समानज्ञानाः। तच्छब्दे ब्रह्मैकत्वज्ञानवन्तः तेन दृष्टान्तेन सर्वपदार्थेषु ब्रह्मनिरूपिताभेदज्ञानवन्तः सख्यानि सायुज्यानि जानते प्राप्नुवन्तीत्यर्थः। यत एषां वाचि भद्रा लक्ष्मीः स्वप्रकाशब्रह्मरूपा। अधि अधिकं निहिता स्थिता भवतीति ऋगर्थः। सख्यानि सायुज्यानि इत्यत्र बहुवचनोल्लेखेन चतुर्विधाः ख्याताः मोक्षभेदाः गृहीताः भवन्ति। तद्यथा–

अन्ये वेदान्तवाक्यार्थविचारात्परमर्षयः।
सालोक्यादिविभागेन चतुर्धा मुक्तिरीरिता॥
मयि सर्वात्मके भावो मत्सामीप्यं भजत्ययम्।
सैव सालोक्यसारूप्यसामीप्या मुक्तिरिष्यते।
सैव सायुज्यमुक्तिः स्याद्ब्रह्मानन्दकरी शिवा।
चतुर्विधा तु या मुक्तिर्मदुपासनया भवेत्॥ (मुक्तिकोपनिषदि २-२५)

सायुज्यम्- सयुग्भावं समानदेहेन्द्रियाभिमान्ययम्। यत्र परमात्मनः समानं शरीरादिकं भवति। सालोक्यम्-यत्र परमात्मना सह समानलोकभावो विद्यते। यथा- समानलोकताम् देवतायै सायुज्यं सालोकतां जयति।

एतत्सर्वं साधुशब्दव्यहारद्वारा चित्तशुद्धिं सम्पाद्य उपासनया चित्तैकाग्रतां विधाय श्रुतिस्मृतिशास्त्रबोधितसाधनाहितभावभाविताऽन्तःकरणरमणक्रीडाक्षेत्र-श्रवणादिषु मुमुक्षुः स्वचित्तं योजयेत्। तेन संशयभावना असम्भावना विपरीतभावना एतत्प्रतिबन्धत्रयं नाशतां याति। श्रवणेन शब्दप्रमाणभूतो-पनिषदामद्वैते परमात्मनि

[५] महाभाष्ये पस्पशाह्निके

तात्पर्यं सिद्ध्यति। तेन संशयभावना नश्यति। ततः मननेन असम्भावना नाशतां याति।तत्र सम्भावना नाम सत्येन प्रतीयमानेषु जीवेश्वरसंसारेषु परस्परभिन्नेषु सत्स्विति चित्तावधारणा। एतस्या विनाशः त्वनादिनिदर्शनमादाय युक्तितः विचारसम्पादनात्मकेन मननेन जायते। ततः श्रवणमननोत्तरकालिकोद्भूत-परमात्मैकाकार-सततबोधप्रवाहप्रवाहितात्मकेन निदिध्यासनेन विपरीतभावना लोलुप्यते। ततः ज्ञानाग्निः अविद्यां तत्कार्यं जगज्जन्मादि सर्वं दग्धुं समर्थतां याति। ततः कैवल्यभावरूपां मुक्तिं लभते। मुक्त्यपरनामा मोक्षः सिद्ध्यति।

मोक्षस्वरूपं किं व्याकरणशास्त्रे इत्यत्र विदुषां का सम्मतिः इति न जाने। यतो हि कुत्रापि साक्षात् कथितं न वर्तते। मोक्षस्तु व्याकरण सम्मतेषूत्तरग्रन्थेषु चर्चितो दरीदृश्यते एतदपि मया ख्यापितोऽत्र। परन्तु यथा नैयायिकैः एकविंशतिदुःखध्वंसः मोक्षः कथ्यते। इतरैः प्रकृतिपुरुषसंयोगवियोगः एव मोक्षः। दुःखनिवृत्तिरपि मोक्षशब्दख्यातितः ख्यातितां लभते अथवा विषयासंसर्गिविषयनिरवच्छिन्नशाश्वदानन्दावाप्तिश्च मोक्षः वेदान्तडिण्डिमघोषघोषितो वा मोक्षः। शब्दैककथनपरायणनिर्भय-मानसमननविषयकरुणावरुणालयशिवशिवभावाहिताविर्भूतोत्साहोर्मिशब्दमहोदधि-तरङ्गकारणसाधितान्तःकरणाऽखण्डाकाराकारितवृत्तिसमुद्भूताऽविद्यानिवृत्त्यधिष्ठान-स्वरूपानन्दरूप-स्वस्वरूपावाप्तिरेव मोक्ष इति त्रिमुनिचरणानुयायिनः शाब्दिकाः महेश्वरकृपाभिलाषिणः निरूपयन्ति। इदमित्थं सिद्ध्यति– समं स्यादश्रुतत्वादिति[६] न्यायमुररीकृत्य शब्दप्रमाणकाः वयम् इति भूयसा महाभाष्यकारः चकथ्यांचकार इति विमर्श्य वक्तुं शक्यते, औपनिषददर्शनदर्शितमोक्षपदार्थ एवात्र स्वकृतो दरीदृश्यते। समं स्यादश्रुतत्वादिति न्यायस्य भावः– यथा पाणिनिव्याकरणे प्रथमा, द्वितीया, तृतीया, चतुर्थी, पञ्चमी, षष्ठी, सप्तमी, संज्ञा न कृता महर्षिपाणिनिना, परन्तु व्यवहारो व्यवहृतः। तत्कथं सङ्गच्छते इति शङ्कायां शाब्दिकैः समाधीयते समं स्यादश्रुतत्वादिति न्यायमाश्रित्य। यस्य विषये किमपि न निरूपितमर्थात् किमपि न श्रुतं भवति विधिनिषेधात्मकं तत्र समं भवति, अर्थात् पूर्वाचार्यैः यथा बोधितं तथैव मयापि स्वीकृतम्। मोक्षोपयत्वेन व्याकरणशास्त्रं राजते परन्तु लक्ष्यभूतो मोक्षः पदार्थः कः इति तु नोपलभ्यते। तर्हि उक्तन्यायेनाश्रुतत्वात् सममेव स्याद् वेदान्तदर्शनवत् किञ्च तत् त्वौपनिषदं

[६] अर्थवत्सूत्रस्य तत्त्वबोधिनीव्याख्यायाम्

पुरुषं पृच्छामि (बृहदारण्यकोपनिषदि) इति वाक्याद् शब्दप्रमाणैकगम्यः मोक्षपदार्थः शब्दप्रमाणका वयम् इति कथनेन शब्दप्रमाणसाधितो मोक्षपदार्थः स्वीकृतो वर्तत एवेत्यत्र नास्ति संशयजनिकारणलेशोऽपि लौकिकवैदिकशब्दसाधुत्वप्रतिपादकभावनाभावितान्तःकरणकानां शाब्दिकानां सम्प्रदाये। मोक्षपदार्थः कः? आनन्दस्वरूपावाप्तिः।आनन्दो नाम सुखम्। तच्च सुखं द्विविधं भवति सातिशयनिरतिशयभेदात्, तत्र सातिशयं सुखं विषयासम्पर्कोद्भूतान्तःकरण-वृत्तिगततारतम्य-जनितानन्दलेशा-विर्भावस्थितिविशेषः। एतस्येदं हार्दम्– आनुकूल्येन विषयसम्बन्धे जाते या काचनान्तःकरणवृत्तिरुदेति, तयावच्छिन्नः य आनन्दरूपात्मांशः तमेवादाय वयं सुखिन इति लौकिकाः प्रतियन्ति। वृत्तिगतातिशयेन च तत्रापि अल्पं सुखं, महत्सुखम्, इत्याद्यतिशयमानं भवति। तत्र निरतिशयं सुखं तु परमात्मैव। तथा च श्रुतिः आनन्दो ब्रह्मेति व्यजानात् इति। एतादृशानन्द एव मोक्षः। तथा च ग्रन्थः– आनन्दात्मकब्रह्मावाप्तिश्च मोक्षः। ब्रह्मविद् ब्रह्मैव भवति। अत्र अवाप्तस्यावाप्तिः भवति न तु लोकान्तरगमनवदवाप्तिः भवति। तथा च लौकिको व्यवहारः विस्मृतहस्तगतसुवर्णः पुरुषः, तव हस्ते सुवर्णमित्याप्तोपदेशाद् अप्राप्तमिव प्राप्नोति। एवं प्राप्तस्यानन्दस्य प्राप्तिः बोध्या। अयं च मोक्षः ज्ञानैकसाध्यः। तथाहि श्रुतिः– तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्थाः विद्यतेऽनाय इति। अयं मोक्षः शिष्टोपदिष्टमहावाक्यजन्यापरोक्षानुभवसाध्यः। तत्र शिष्टास्तु वैयाकरणा एव भवन्ति। तथा हि महाभाष्यम्– के पुनः शिष्टाः? वैयाकरणाः। कुत एतत्? शास्त्रपूर्विका हि शिष्टिः, वैयाकरणाश्च शास्त्रज्ञाः।[७] शास्ति हितमुदिशति इति शास्त्रम्। तच्चैपनिषददर्शनमेव सम्भवति। तदर्थनिर्णायस्तु व्याकरणाधीनमिति कृत्वा व्याकरणं शास्त्रम्। तज्ज्ञाः वैयाकरणाः। ते एव शिष्टाः। एतान् सर्वशास्त्रपारिषदविदश्शाब्दिकान् नमन्नहं विरमामि रमामि च शिष्टचरणेषु, अनुभवामि चानन्दम्।

☆ ☆ ☆

[७] ६.३.१०९ इति सूत्रे भाष्ये

# मिदचोऽन्त्यात्परसूत्रस्थवार्त्तिकैकदेशप्रत्याख्यानम्

पङ्कजकुमारव्यासः*

विज्ञप्तिः

लेखेऽस्मिन् "मिदचोऽन्त्यात्परः" (पा.सू.१-१-४७) इति सूत्रं भाष्यरीत्या संक्षेपेण व्याख्याय "अन्त्यात्पूर्वो मस्जेर्मिदनुषङ्गसंयोगादिलोपार्थम्" इति प्रकृतसूत्रस्थवार्त्तिकस्य 'संयोगादिलोपार्थमि'त्यमुमंशं प्रत्याख्यातुं कश्चन प्रयासः। साध्वसाधुनिर्णयाय विद्वांसोऽत्र प्रमाणम्।

## ०. भूमिका

"मिदचोऽन्त्यात्परः" (पा.सू.१-१-४७) इति चतुष्पदात्मकं सूत्रमिदम्। मित्, अचः, अन्त्यात्, परः इति च्छेदः। मकार इत् यस्य स मिदिति विग्रहः। अच इति निर्द्धारणे षष्ठी। "आद्यन्तौ टकितौ" (पा.सू.१-१-४५) इति पूर्वसूत्रात् अन्त इति पदमनुवृत्तम्। "क्वचिदेकदेशोऽप्यनुवर्तते" इति परिभाषया। अतः फलितमाह – अचां मध्ये योऽन्त्यादचः परो मित् स्यादिति। "षष्ठी स्थानेयोगा" (पा.सू.१-१-४६) इत्यस्य स्थानेयोगत्वस्य, "परश्च" ३-१-२ इत्यस्य परत्वस्य चापवादः। वनानि, यशांसि, रुणद्धि इत्यादीनि उदाहरणानि।

न च पूर्वपदस्य परश्च (पा.सू.३-१-२) इत्येतद्बाधकत्वानापत्तिः। बाध्यसामान्यचिन्तायां स्वविषये प्राप्तं सर्वं बाध्यते इत्यभ्युपगमात्। अन्यथा श्नमो मित्ववैयर्थ्यात्।

अयमाशयः– इदमपि "आद्यन्तौ टकितौ" इतिवत् पुरस्तादपवादन्यायेन स्थानेयोगत्वमात्रस्यापवादो भवतु, न तु "प्रत्ययः" (पा.सू.३-१-१) "परश्च" (पा.सू.३-१-२) इत्यस्यापि, इति चेदत्रोच्यते – बाध्यसामान्यचिन्तापक्षोऽत्राश्रीयते। तेन स्वविषये यद्यत् प्राप्तं तावत्सर्वं बाध्यत इति कथनात् परत्वस्यापि अपवाद एव। अत्र च प्रमाणं – "तृणह इम्" (पा.सू.७-३-९२) इति पाणिनिनिर्देशः। अन्यथा श्नमो मित्वेनैवेष्टसिद्धौ किमनेन इमो मित्करणेन ? इमो मित्करणं

---

*अध्यापकः, व्याकरणविभागे, हरियाणासंस्कृतविद्यापीठे, बघौलास्थे (पलवले) – १२११०२
e-mail: pkvyas@gmail.com

व्यर्थीभूय प्रकृतसूत्रे बाध्यसामान्यचिन्ताश्रयणे प्रमाणं भवति। तथा च प्रत्ययपरत्वस्याप्यपवादत्वेनान्त्यादचः परं प्रवृत्त्यङ्गीकारे प्राप्तयोः इमः श्नमोरनवकाशत्वात् "इम्" श्नमं बाधेत। अतः "तृणह" इति निर्देशेन श्नमः परमेव "इम्" प्रवर्तते न तयोर्बाध्यबाधकभाव इति। अन्यथा "तृहेरिम्" इत्येव वदेत् पाणिनिः। स्पष्टमेतत् प्रकृतसूत्रव्याख्याने "तृणह" इति सूत्रव्याख्याने च सिद्धान्तकौमुद्याः टीकयोः तत्त्वबोधिनीबालमनोरमयोः।[1] अतः "तृणह" इति निर्देशो बाध्यसामान्यचिन्तायां प्रमाणम्।

## १.१. अत्र केचित्

"अच" इति पञ्चमी, "अन्त्यात्" इति सूत्रघटितपदेन सामानाधिकरण्यात्। सम्भवति सामानाधिकरण्ये वैयधिकरण्यस्यान्याय्यत्वाच्च। इति चेन्न। सामानाधिकरण्याश्रये "शे मुचादीनाम्"(पा.सू.७-१-५६) इति सूत्रानुसारेण विहितस्य नुमागमस्य मुचादिषु धातुषु अन्त्यस्याचोऽभावेन प्रकृतसूत्राप्रवृत्तौ "अलोऽन्त्यस्य" (पा.सू.१-१-५) इत्यनेनान्त्यस्य स्थाने प्रवृत्त्यापत्तेः। नुमो मित्करणस्य वैयर्थ्यापत्तेश्च।

## १.१. अत्र पक्षान्तरम्–

अन्ये तु 'अच' इति अस्तु पञ्चम्येव। किं तथा सति सर्वथैव नुम् न स्यादिति विवक्षितम् उत इष्टदेशे न स्यादिति। नाद्य; वचनवैयर्थ्यात् सूत्रवैयर्थ्यादित्याशयः। नान्त्यः; अन्त्यबाधेऽप्यचः परत्वसम्भवात्। प्रधानबाधापेक्षया गुणबाधस्य कल्पयितुमुचितत्वादिष्टसिद्धेरिति। अन्त्यबाधेऽप्यचः परत्वसम्भवादित्यस्य त्वयमर्थः – मित्करणस्य वैयर्थ्यस्य "अलोऽन्त्ये"त्यस्यान्यत्र चारितार्थ्येन अचः परत्वेनैव प्रवृत्तिसम्भव इति। अतः पञ्चमीपक्षाश्रयणेऽपि न दोषः।

## २. पूर्वान्तत्वपक्षसमर्थनम्, अभक्तत्वादिपक्षदूषणञ्च–

अत्र "शे मुचादीनाम्" (पा.सू.२-१-५९) इति सूत्रविहितनुमो मित्करणात्सामर्थ्यात् 'अच' इति षष्ठ्यन्तमेवाश्रीयते। अत एव कौमुद्यां दीक्षितः "अचां मध्ये योऽन्त्य-स्तस्मात् परस्तस्यैवान्तावयवो मित् स्याद्" इति प्राह।[2] 'अच' इति वैयधिकरण्येननान्वयस्तेन "नपुंसकस्य झलचः" (पा.सू.७-१-७२)

---

[1] सि.कौ. बालमनोरमोतत्त्वबोधिनीसहिता भागः -३ पृ.सं. ३७०

[2] सि.कौ. बालमनोरमोतत्त्वबोधिनी भागः -१ पृ.सं. ४३

इत्यादिसूत्रविहिता नुमादय आगमिनोऽवयवा इति सिध्यति। अनेनावयवसिद्धे कस्यावयवोऽयमिति शङ्कायां समाधिरयं यत् 'पूर्वसूत्रे द्वन्द्वनिर्दिष्टस्यापि अन्तग्रहणस्यात्रानुवृत्तेर्मित् पूर्वान्तः' इति।

## २.१ अभक्तत्वे दोषाः

"ता ता पिण्डानाम्" इत्यादौ तच्छब्दात् जसि "जश्शसोः शिः" (पा.सू.७-५-२०) इति शि आदेशे, "शि सर्वनामस्थानम्" (पा.सू.१-१-४२) इति सर्वनामस्थानसंज्ञायां "नपुंसकस्य झलचः" (पा.सू.७-१-७२) इति नुमागमे "सर्वनामस्थाने चाऽसम्बुद्धौ" (पा.सू.६-४-८) इति उपधादीर्घे तान् इ इत्यवस्थायां "शेश्छन्दसि बहुलम्" (पा.सू.६-१-७०) इति शिलोपे "न लोपः प्रातिपदिकान्तस्य" (पा.सू.८-२-७) इति नलोपे "ता ता पिण्डानाम्" इतीष्टसिद्धिः। अभक्तत्वे हि नुमः अन्तावयवत्वाभावात् नलोपो न स्यात्। "वहंलिह" इत्यत्र च "वहाभ्रे लिहः" (पा.सू.३-२-३२) इति खशि, शित्वात् सार्वधातुकसंज्ञायां "कर्त्तरि शप्" (पा.सू.३-१-६८) इति शपि अदादित्वात्तस्य लुकि "अरुर्द्विषजन्तस्य मुम्" (पा.सू.७-३-७७) इति मुमि वहम् + लिह् + अ इति जाते "मोऽनुस्वारः" (पा.सू.८-३-२३) इति अनुस्वारे वहंलिह इतीष्टसिद्धिः। अभक्तत्वे तु मुमो मकारस्य मान्तस्य पदस्यानुस्वारः स्याद्धलि इत्यर्थे विहितानुस्वारस्यैवाभावः पदान्तत्वाभावात्। एवञ्च दुष्टोऽयं पक्षः।

## २.२. परादित्वे दोषाः

यद्यत्र पूर्वसूत्राद् आदिग्रहणमनुवर्त्त्य परादिरयम्मिदिति स्वीक्रियेत तर्हि वारिणे इत्यत्र गुणः स्यात्। तथा हि वारि + ङे इति चतुर्थ्येकवचनावस्थायां "नपुंसकस्य झलचः" (पा.सू.७-१-७२) इति नुमः प्रत्ययाद्यवयवत्वे अङ्गस्येकारान्तत्वमाश्रित्य "शेषो घ्यसखि" (पा.सू.१-४-७) इति घिसंज्ञायां "घेर्ङिति" (पा.सू.७-३-१११) इति गुणः स्यात्। नेष्टम्। "वहंलिह" इत्यनुस्वारो न स्यात् पदान्तत्वाभावात्। एवमतिशयितः सखा येषां तानि "अतिसखीनि ब्राह्मणकुलानि" इत्यत्र "सख्युरसम्बुद्धौ" (पा.सू.७-१-९२) इति णित्वप्रयुक्ता वृद्धिः प्राप्नोति। सा हि गौणत्वेऽपि भविष्यति अस्थ्याद्यनङ्वत्। अतोऽयमपि पक्षो दुष्टः।

तस्मादुक्तपक्षद्वयेऽपि दोषसत्त्वात् पूर्वान्तपक्ष एवाश्रयणीय इति समाधिः। अत्र च भाष्ये इदं वार्त्तिकम् – "अन्त्यात्पूर्वो मस्जेर्मिदनुषङ्गसंयोगादिलोपार्थम्" इति।

अस्य वार्त्तिकस्यायमभिप्रायः– "मस्जिनशोर्झलि" (पा.सू.७-१-६०) इति सूत्रेण विधीयमानो नुम् अन्त्यवर्णात्पूर्वं प्रवर्तते, न तु अन्त्यादचः परः। मग्नः, मग्नवान् इत्याद्युदाहरणम्। तथा हि – मस्जधातोः क्ते प्रकृतसूत्रेण नुमि, तच्च वार्त्तिकबलात् जकारात्पूर्वम्। मस्न्ज् + त इतिदशायां नकारस्योपधात्वेन "अनिदितां हल उपधायाः क्ङिति" (पा.सू.६-४-२४) इत्यनेन लोपे, "स्कोः संयोगाद्योरन्ते च" (पा.सू.८-२-२६) इति सकारलोपे मज् + त इति जाते "चोः कुः"(पा.सू.८-२-३०) इति कुत्वे "ओदितश्च" (पा.सू.८-२-४५) इति निष्ठातकारस्य नत्वे मग्न इति सिद्धम्। यद्यत्र नुमागमोऽन्त्यादचः परत्वेन स्यात्तर्हि नकारस्योपधात्वाभावाल्लोपो न स्यात्। नकारस्यैव संयोगादित्वेन सकारस्य चातथात्वात् संयोगादिलोपो न स्यात्। अतः प्रकृतेऽनुषङ्गलोपार्थं संयोगादिलोपार्थञ्च नुमागमस्यान्त्यवर्णात्पूर्वं प्रवृत्त्यर्थं वार्त्तिकमिदमावश्यकमेव। अनुषङ्ग इति नकारस्योपधायाः प्राचां संज्ञा।

अत्र केचिद् – अन्त्यादचः परत्वेनैव भवतु, "स्कोः संयोगाद्योरन्ते च" (पा.सू.८-२-२९) इति सलोपे नकारस्योपधात्वमक्षतम्, तेनेष्टसिद्धिश्चेदतीव मन्दं तत्। यतः अन्त्यादचः परत्वेनैव इति क्रियमाणे मन्स्ज् + त इति दशायां सलोपे कृतेऽपि तस्यासिद्धत्वात् नकारस्य नोपधात्वम्। तेन नकारलोपो नैव स्यात्। किञ्च बहूनां संयोगसंज्ञेति पक्षे तु स्कोरिति सलोपोऽपि न। अतः वार्त्तिकमपेक्षितमेव। एवमेव मङ्क्ता, मङ्क्तव्यमिति च बोध्यम्।

एवं भरुजा, मरीचयः इत्यादिसिद्ध्यर्थं "भर्जिमर्च्योश्च" इति वार्त्तिकस्याप्यावश्यकता। तथा हि – भृजी भर्जने। औणादिके अचि कृते उगागमः। भरुजा। मर्ज-शब्दे चुरादिः। औणादिकः इप्रत्ययः, ईगागमः। मरीचिः। वस्तुतस्तु "निपातनात् सिद्धम्"[3] इति भाष्यकारवचनेन प्रत्याख्येयमिदं वार्त्तिकमिति ज्ञेयम्।

## ३. 'संयोगादिलोपार्थमि'त्यंशस्य प्रत्याख्यानविचारः

"अन्त्यात्पूर्वो मस्जेर्मिदनुषङ्गसंयोगादिलोपार्थम्" इति वार्त्तिकमनुषङ्गलोपार्थं, संयोगादिलोपार्थञ्चापेक्षितमिति भाष्ये वर्त्तते। तत्रानुषङ्गलोपार्थन्तु अवश्यमभ्युपेयमिदम्। संयोगादिलोपाग्रहणेऽपि वार्त्तिके न क्षतिरिति मे धीः। तथाहि– संयोगादिलोपोदाहरणम् – मङ्क्ता इति तृजन्तम्, मङ्क्तव्यम् इति

[3]प्रकृतसूत्रभाष्ये वार्त्तिकवचनम् पृ.सं. ४०२

तव्यान्तम्। अत्र यथाश्रुतार्थेऽचः परत्वेन कृते नुमागमे मन्स्ज् + तृ इति दशायां द्वयोर्द्वयोस्संयोगसंज्ञेति पक्षे "स्कोः संयोगाद्योरन्ते च" (पा.सू.८-२-२९) इति संयोगादिलोपे मन् ज् + तृ इति दशायां जस्य "चोः कुः" (पा.सू.८-२-३०) इति कुत्वे, "नश्चापदान्तस्य झलि" (पा.सू.८-३-२४) इत्यनुस्वारे "अनुस्वारस्य ययि परसवर्णः" (पा.सू.८-४-५८) इत्यनुस्वारस्य परसवर्णे "खरि च" (पा.सू.८-४-५५) इति चर्त्वे ककारे विभक्त्यादिकार्ये मङ्क्ता इति रूपम्। एवं प्रक्रियया स्पष्टं ज्ञायते यद् अत्रोदाहरणे संयोगादिलोपार्थमित्यस्य न चारितार्थ्यम्। अतः संयोगादिलोपाग्रहणे लाघवमेव। "अन्त्यात्पूर्वो मस्जेरनुषङ्गलोपार्थम्" इतिमात्रमुच्यमानेऽपि न काचित् क्षतिः। न च 'मग्नः मग्नवान्' इत्यादौ तच्चारितार्थ्यमिति वाच्यम्, मग्न इत्यादौ संयोगादिलोपार्थं तस्यानुपयोगात्। "अनिदितां हल उपधायाः क्ङिति" (पा.सू.६-४-२४) इति उपधानकारलोपे कृते जकारपरकत्वात् झल्पदार्थस्य सत्त्वात् संयोगादिलोपस्याक्षतत्वात्। तर्हि भाष्ये कुत इयं परिकल्पना न दृश्यते, कुतो वा भाष्ये उद्योते हि नायमंशः प्रत्याख्यात इति तु न शङ्क्यम्। तत्रत्यो ग्रन्थो हि बहूनां संयोगसंज्ञापक्षाश्रयणेन नेयः, तथा सत्येव तद्भाष्यस्य सङ्गतिः। अस्माकं तु द्वयोर्द्वयोस्संयोगसंज्ञापक्षस्यापि भाष्यसम्मतत्वात् तदेवास्मदुक्तकल्पनायां मानमिति निर्णयः।

## ४. उपसंहारः

अनया रीत्या यथामति प्रकृतांशप्रत्याख्यानविचारो विदुषां पुरतः समालोचनायै प्रस्तुतः। अस्य युक्तायुक्तत्वे त एव प्रमाणमिति शम्।

☆ ☆ ☆

## परिशीलिता ग्रन्थाः –

१. गिरिधरशर्मा, परमेश्वरानन्दशर्मा (सम्पा.). (२००१). भट्टोजीदीक्षितविरचिता वैयाकरणसिद्धान्तकौमुदी. वाराणसी. मोतीलाल बनारसीदासः।

२. भार्गवशास्त्रिजोशी(सम्पा.). (२०११). पतञ्जलिकृतं महाभाष्यम् (प्रदीपो-द्योतसहितम्). दिल्ली. चौखम्बासंस्कृतप्रतिष्ठानम्।

३. नेने गोपालशास्त्री, पुणतामकरः मुकुन्दशास्त्री (सम्पा.). (१९९१) शब्दकौस्तुभः (प्रथमो भागः). वाराणसी. चौखम्बासंस्कृतसीरीज् ऑफिस्।

४. दूबे सत्यप्रकाशः(सम्पा.). (१९९९). व्याकरणसिद्धान्तसुधानिधिः (प्रथमो भागः) आचार्यविश्वेश्वरविरचितः. जयपुरम्. राजस्थानपत्रिका।

# कथं तर्हि दुर्धियः वृश्चिकभिय इत्यादि?

## यदुवीरस्वरूपः*

## ०. भूमिका

'एरनेकाचोऽसंयोगपूर्वस्य' (अष्टा० ६-४-८२) इति सूत्रस्य प्रपञ्चावसरे 'गतिकारकेतरपूर्वपदस्य यण् नेष्यते' इति वार्तिकं समुपस्थायि दीक्षितेन सिद्धान्तकौमुद्याम्। तत्रास्य उदाहरणत्वेन 'कथं तर्हि दुर्धियः वृश्चिकभिय इत्यादि' इत्यदीयत। ननु कस्तावदस्य वार्तिकस्यार्थः? उच्यते– 'उपसर्गाः क्रियायोगे' (अष्टा० १-४-५९) 'गतिश्च' (अष्टा० १-४-६०) इत्याभ्यां सूत्राभ्यां प्रादीनाम् असत्त्वभूतक्रियायोगे गतिसंज्ञा, उपसर्गसंज्ञा च विहिता। तथा च दीक्षितेनाभिहितम् 'प्रादयः क्रियायोगे उपसर्गसंज्ञा स्युः' इति। कारकाणि षट्–

कर्ता कर्म च करणं सम्प्रदानं तथैव च।
अपादानमधिकरणमित्याहुः कारकाणि षट्॥[१]

क्रियाजनकत्वञ्च कारकत्वमिति। विभक्तिः द्विधा कारकविभक्ति-रुपपदविभक्तिश्चेति। कारकविभक्तिः क्रियायोग एव, उपपदविभक्तिस्तु तदभावेऽपीति विशेषः। एवञ्च वार्तिकार्थः सम्पद्यते– 'गतिभिन्नपूर्वपदकस्य कारकभिन्नपूर्वपदकस्य यण् न भवति अजादाविति'। उदाहरणम्– शुद्धधियौ। परमधियौ। शुद्धा धीर्ययोः इति विग्रहे बहुव्रीहिसमासे सति शुद्धधी+औ इत्यवस्थायाम् 'धात्ववयवसंयोगपूर्वो न भवति य इवर्णस्तदन्तो यो धातुस्तदन्तस्यानेकाचोऽङ्गस्य यण् स्यादजादौ प्रत्यये परे' इत्यर्थकेन 'एरनेकाचोऽसंयोगपूर्वस्य' इति सूत्रेण यणादेशः प्राप्तः। स न भवति प्रकृतवार्तिकेन। विग्रहे शुद्धार्थस्य सत्त्वभूतार्थकधीशब्दार्थे विशेषणत्वाद् गतिकारकत्वाभावाच्चेति।

न च प्रथमान्तस्य क्रियानपेक्षत्वात् कारकत्वं नास्तीति अभिमानेन दीक्षितेनेदमुदाहरणद्वयं प्रादायि। वस्तुतस्तु 'अस्तिर्भवन्तीपरः प्रथमपुरुषोऽप्रयुज्यमानोऽप्यस्ती'ति[२] भाष्योक्तेरस्तिक्रियायाः सर्वत्र

---

*अतिथि-अध्यापकः, व्याकरणविभागे, राष्ट्रियसंस्कृतसंस्थानस्य लक्ष्णौपरिसरे

[१]परमलघुमञ्जूषायां कारकार्थनिरूपणे

[२]अनभिहिते इति सूत्रे महाभाष्ये।

सत्त्वात् प्रथमाया अपि कारकत्वम् अस्त्येव। तदा च प्रकृते शुद्धा धीः ययोः इत्यादावपि प्रतीयमानामस्तिक्रियामपेक्ष्य शुद्धा इत्यस्य प्रथमान्तस्यापि कारकत्वमायातम्, अन्यथा सुबेव न उत्पद्येत। अत एव दध्योदनमित्यादावुपसेचनक्रियामन्तर्भूतामधिकृत्यैव समासविधानं दृश्यते। एवञ्चात्रापि कारकपूर्वत्वाद् यण् स्यादिति शङ्कनीयम्। प्रत्यासत्त्या यां क्रियामाश्रित्य सुबुत्पत्तिस्तां प्रत्येव कारकत्वमिति विवेचनान्न दोषः। प्रकृते तु सत्त्वभूतार्थकधीशब्दस्य विशेणत्वाच्छुद्धस्य कथमपि न कारकत्वमिति, प्रतीयमानास्तिक्रियां प्रति कारकत्वेऽपि न क्षतिः, तस्य अप्रयुक्तत्वादिति। बृहच्छब्दरत्ने तु अत्रोक्तशङ्कासमाधानमित्थं– 'न च शुद्धा धीर्यस्येत्यत्रास्तीत्यध्याहारस्याऽवश्यकत्वेन कर्तृत्वात् कारकपूर्वपदत्वमस्त्येवेति वाच्यम्। कारकशब्दोपादानेन स्वरितत्वप्रतिज्ञया कारकाधिकारपठितस्यैव ग्रहणेन, क्रियाश्रयत्वरूपकर्तृत्वस्य प्रथमयाऽनभिधानात्। वृत्तौ विशेषणविशेष्यभावव्यत्यासेन पुरुषपरत्वेनाऽकारकत्वाच्च। प्रत्यासत्तिन्यायेन यणस्थान्यवयवकधात्वर्थकारकस्यैव ग्रहणाच्च'[३]। एवमेव परमा धीः ययोः इति परमधियौ। अत्रापि सत्त्वभूतधीविशेषणतया परमेत्यस्य न कारकत्वमिति। तथा चोक्तं कैयटेन प्रदीपे "परमशब्दोऽत्र न गतिर्न च कारकम्। किन्तर्हि? उत्तरपदार्थस्य समानाधिकरणं विशेषणम्"[४]।

अत्रायं विशेषः– शुद्धं ब्रह्म ध्यायतीति विग्रहस्तदा शुद्धपदार्थस्य ध्यानक्रियान्वयित्वात् कर्मकारकपूर्वपदत्वाद् यण् भवत्येव। शुद्धध्यौ, शुद्धध्य इत्यादि। एवमेव परमं ब्रह्म ध्यायतीत्यादावपि ज्ञेयम्।

## १. आक्षेपः

ननु 'एरनेकाचः' इति सूत्रे महाभाष्ये गतिकारकपूर्वस्यैवेष्यते इत्येव पठितम्। तथा च भाष्यम् "इह कस्मान्न भवति– ब्राह्मणस्य नियौ, ब्राह्मणस्य नियः? अङ्गाधिकारात्। अङ्गस्य इति वर्तते। एवमपि– परमनियौ, परमनिय इत्यत्रापि प्राप्नोति गतिकारकपूर्वस्यैवेष्यते"[५]। एवञ्च कथं दीक्षितेन "गतिकारकेतरपूर्वपदस्य यण्नेष्यते" इति स्वरूपं प्रादर्शि? उच्यते– गतिकारकपूर्वस्यैवेष्यत इति वचनं

[३]प्रौढमनोरमा पृ.सं. ४०१

[४]एरनेकाचः इत्यादिसूत्रस्य महाभाष्यस्य प्रदीपव्याख्याने

[५]एरनेकाचः इत्यादिसूत्रस्य महाभाष्ये

भगवता भाष्यकारेण इष्टिवचनत्वनियमरूपतयोपन्यस्तम्। तत्फलितार्थकथनमेव गतिकारकेतरपूर्वपदस्य यण् नेष्यते इति। तथा च दीक्षितस्य भाष्येण सह नासङ्गतिः। गतिकारकपूर्वस्यैवेत्यत्रैवकारो नियमार्थः। नियमवाक्यानां तावद् द्विविधा प्रवृत्तिः दृश्यते, विधिमुखेन निषेधमुखेन चेति। नियम्यशास्त्रीयोद्देश्यतावच्छेदकव्याप्यं नियामकशास्त्रीयोद्देश्यतावच्छेदकव्यापकञ्च यद्रूपं तद्रूपावच्छिन्नातिरिक्तत्वेन नियम्यशास्त्रीयोद्देश्यतावच्छेदकावच्छिन्ने यदि सङ्कोचः क्रियते तदा विधिमुखीया प्रवृत्तिरागच्छति नियामकशास्त्रस्य। निषेधमुखेन प्रवृत्तौ तु नियम्यशास्त्रीयोद्देश्यतावच्छेदकव्याप्यं नियामकशास्त्रीयोद्देश्यतावच्छेदकव्यापकञ्च यद्रूपं तद्रूपावच्छिन्ने नियामकशास्त्रीयोद्देश्यतावेच्छेदकावच्छिन्नातिरिक्तत्वेन सङ्कोचं कृत्वा नञ्पदमध्याहृत्य च नियमो भवति। यद्यपि पक्षद्वयस्यापि चर्चा व्याकरणशास्त्रे बहुधाऽगता, तथापि एवं रीतिः सर्वत्र प्रसिद्धस्थलीया एव दृग्गोचरीभवति। न चेत्थम्भूतविधिनिषेधमुखाभ्यां प्रवृत्तौ किं बीजमिति शङ्कनीयम्। नियामकशास्त्रेण यो नियमः क्रियते, तत्र विधिनिषेधयोः उभयोः सत्त्वादेव एतादृशी प्रवृत्तिर्जायते। तस्माद् नियमस्वरूपगतप्रतीतिरेव नियमसूत्रस्य द्विधा प्रवृत्तौ बीजमिति। प्रकृतौ च नियमवाक्यस्य निषेधमुखेन प्रवृत्तिस्वीकारे गतिकारकपदं स्वेतरपरम्। 'इष्यते' इति तु निषेधपरमिति। तथा च गतिकारकपूर्वभिन्नस्य यण् नेति फलति। गतिकारकपूर्वभिन्नः तत्सदृशश्च सपूर्व एवेति भावः। 'ब्राह्मणेतरदानय' इत्यादाविव सदृशार्थप्रतीतेर्व्युत्पत्तिसिद्धत्वेन गतिकारकयोः पदत्वादितरस्यापि तादृशस्यैवौचित्यात्। एवञ्च पर्युदासन्यायेन सपूर्वत्वलाभेन, गतिकारकपूर्वभिन्नस्य सपूर्वस्यैव ग्रहणेन च नियमकोट्यप्रविष्टतया निनि+अतुस् इत्यत्र गतिकारकपूर्वत्वाभावेऽपि यण् भवत्येव, तेन निन्यतुरिति सिध्यति। नियमास्वीकारे तु नदीसञ्ज्ञासूत्रे 'प्रथमलिङ्गग्रहणञ्च' इति वार्तिकस्य प्रयोजनावसरे 'कुमार्य्यै ब्राह्मणाय' इत्यत्र भाष्यकृतो यणादेशकरणमनुपपन्नं स्याद्, गतिकारकपूर्वत्वाभावादिति। गतिकारकपूर्वभिन्नः तत्सदृश एवेति कथनेन बहुच्-पूर्वस्य बहुधीशब्दस्य यण् भवत्येव– 'बहुध्यौ'। तथा गतिकारकपूर्वस्यापि यण्– प्रध्यौ, ग्रामण्यौ। एतत्सर्वं मनसि निधायोक्तञ्च उद्योते वैयाकरणकेशरिणा श्रीमता नागोजिभट्टेन "गतिकारकपूर्वस्यैवेति नियमः सपूर्वपदस्य चेद्गतिकारकपूर्वस्यैवेष्यते न तु गतिकारकपूर्वभिन्नस्येष्येत इत्यर्थः। तेन निन्यतुरित्यादि सिध्यति"[६]।

[६]एरनेकाचः इति सूत्रे शेखरे

बृहच्छब्दरत्ने तु एवमभ्यधायि "नियमवाक्यानां निषेधमुखेन प्रवृत्तिरिति पक्षे गतिकारकपदेन तद्भिन्नं लक्ष्यते। 'इष्यते' इत्यनेन निषेधो लक्ष्यते। अत एव नियन्तुरित्यादौ यण्सिद्धिः। गतिकारकेतरञ्च गतिकारकसदृशमेव गृह्यते। तथैव व्युत्पत्तेः। अत एव बहुच्प्रत्ययपूर्वकबहुधीशब्दे यण्।"[७] अमुमेवाऽर्थं हृदि निधाय मूलकारेणोक्तं-गतिकारकेतरपूर्वपदस्य यण् नेष्यते। शुद्धधियौ। परमधियाविति।

ननु गतिकारकेतरपूर्वपदस्यैव यण् न, किन्तु गतिपूर्वस्य कारकपूर्वस्य तु यणादेशो भवत्येवेति चेत्– तर्हि दुर्ध्यायन्तीति दुर्धियः, इत्यर्थे, दुष्टा धीः ध्यानं येषामिति बहुव्रीहिसमासे वा उभयत्रापि दुःशब्दस्य ध्यानरूपासत्वभूतक्रियान्वयेन 'गतिश्च' इति सूत्रेण गतित्वम्। गतिपूर्वकत्वाच्च दुर्धियौ, दुर्धिय इत्यादौ, वृश्चिकाद् भीः इति वृश्चिकभीः। बहुवचने वृश्चिकभियः। अत्र 'भयभीतिभीतभीभिरिति वाच्यम्' इति वार्तिकेन पञ्चमीतत्पुरुषसमासः। अत्रापि भीतिक्रियां प्रति वृश्चिकस्यापादानकारकत्वात्। कारकपूर्वकत्वाच्च वृश्चिकभियौ, वृश्चिकभियः इत्यादौ चेयङपवादो यणादेशः कथं वार्यत इति प्रश्नः? इममेव प्रश्नं मनसि निधाय भट्टोजिदीक्षितेन सिद्धान्तकौमुद्यां समाधानत्वेन अवादि "दुःस्थिता धीर्येषाम् इति विग्रहे दुर् इत्यस्य धीशब्दं प्रति गतित्वमेव नास्ति इति।"

अत्रायम्भावो दीक्षितस्य– दुर्ध्यायन्ति, दुष्टा धीः ध्यानमेषामिति वा विग्रहाभिप्रायो नास्ति। किन्तर्हि? दुःस्थिता धीर्येषामिति विग्रहाभिप्रायः। दुष्टा स्थिता इति दुःस्थिता 'प्रादयो गताद्यर्थे प्रथमया' इत्यनेन तत्पुरुषे, ततश्च दुःस्थिता धीर्येषामिति विगृह्य 'प्रादिभ्यः परं यद्धातुजप्रकृतिकप्रथमान्तं तस्यान्येन प्रथमान्तेन बहुव्रीहिः स्यात्, प्रादिभ्यः परस्य उत्तरपदस्य धातुजस्य लोपश्च वा' इत्यर्थकेन 'प्रादिभ्यो धातुजस्य वाच्यो वा चोत्तरपदलोपः' इति वार्तिकेन बहुव्रीहिसमासे उत्तरपदस्य धातुजस्य स्थिताशब्दस्य च लोपे, दुर्धीति जाते दुर्धी+औ, दुर्धी+अस् प्रथमाविभक्तौ द्विवचने बहुवचने च 'अचिश्नुधातुभ्रुवां य्वोरियङुवङौ' इत्यनेन इयङादेशे दुर्धियौ, दुर्धिय इति रूपे सिध्यतः। अत्र दुःशब्दोपात्तदुष्टत्वार्थस्य स्थितिक्रियां प्रति विशेषणत्वं गतित्वं च वर्तते, न तु धीशब्दार्थं प्रति। अतः दुर्धीशब्दस्य गतिपूर्वकत्वाभावान्न यणादेशः। न च स्थितिक्रियां प्रति विशेषणत्वमस्तु किन्तु धीधात्वर्थं प्रति तु गतित्वम् अस्ति एवेति वाच्यम्। धीशब्दश्चात्र बुद्धिरूपगुणवाची न तु क्रियावाची। अतो नहि तं बुद्धिरूपगुणवाचिनं

[७] एरनेकाचः इति सूत्रे बृहच्छब्दरत्ने।

प्रति गतित्वं भवितुमर्हतीति। ननु तर्हि 'प्रध्यै ब्राह्मण्यै' इति भाष्यप्रयुक्तप्रध्यै इत्यत्र कथं यण्? प्रकृष्टा धीर्यस्या इति विग्रहे प्रशब्दस्य कृषधात्वर्थक्रियां प्रत्येव गतित्वादिति चेन्न। प्रकृष्टा धीर्यस्य इत्यादौ तु प्रशब्दार्थप्रकर्षस्य धीशब्दोपात्तार्थे भासमानासत्त्वभूतध्यानक्रियाविशेषणतया गतित्वाक्षतेरिति। तस्माद्यणादेशो भवत्येव। न च दुर्धियावित्यत्र लुप्तस्य स्थिताशब्दस्य क्रियाप्रवृत्तिनिमित्तकत्वात् तं स्थिताशब्दं प्रति दुरो गतित्वमस्त्येवेति वाच्यम्। यया क्रियया सह युक्ताः प्रादयः तत्क्रियावाचकशब्दं प्रत्येव गतिसंज्ञकत्वादित्यर्थस्वीकारेण न दोषः। प्रकृते च दुरः स्थिताशब्दं प्रत्येव गतित्वं न तु धीशब्दं प्रतीति। न चैवमपि लुप्तं स्थिताशब्दं प्रति दुरो गतित्वं वर्तत एव, तदादाय दुर्धीशब्दस्य गतिपूर्वकत्वमक्षतमेवेति शङ्क्यम्। यत्क्रियायुक्ताः प्रादयः, तत्क्रियावाचकशब्दं प्रत्येव गत्युपसर्गत्वमित्यतो न दोषः। अर्थात् स्थितिक्रियां प्रति गतित्वेऽपि धीशब्दार्थध्यानं प्रति गतित्वाभावान्न 'दुर्धी' इत्यस्य गतिपूर्वकत्वमिति। उक्तञ्च दीक्षितेन "यत्क्रियायुक्ताः प्रादयस्तं प्रत्येव गत्युपसर्गसञ्ज्ञाः"।

ननु असत्त्वभूतक्रियायोगे गत्युपसर्गसंज्ञा भवतीत्यर्थ एव 'उपसर्गाः क्रियायोगे' इति सूत्राज्जायते न तु यत्क्रियायुक्ताः प्रादयस्तं प्रत्येव गत्युपसर्गसञ्ज्ञेति न शङ्कनीयम्। 'यत्क्रियायुक्ताः' इत्याकारकार्थः प्रत्यासत्तिन्यायेन लभ्यते। तत् कथमिति चेत्, 'उपसर्गाः क्रियायोगे' इति सूत्रस्य स्थाने 'उपसर्गाः क्रियायाम्' इत्याकारकमेव सूत्रमस्तु। तत्र च अन्वेतीत्यस्य अध्याहारं कृत्वा सूत्रार्थो जायते "प्रादयः क्रियायामन्वयिन उपसर्गसञ्ज्ञका गतिसञ्ज्ञकाश्च स्युः" इति। एवमर्थलाभसम्भवे सूत्रे योगग्रहणं अधिकार्थम्। तेन यदर्थे प्रादीनामन्वयः तं प्रत्येव गत्युपसर्गसञ्ज्ञका नान्यं प्रति। तेन प्रगतः ऋच्छकः प्रर्च्छकः इत्यत्र 'प्रादयो गताद्यर्थे प्रथमया' इति वार्तिकेन प्रादिसमासे प्र+ऋच्छक इत्यत्र 'उपसर्गादृति धातौ' (अष्टा० ६.१.९) इति सूत्रेण वृद्धिर्न भवति। गमनक्रियां प्रत्येव प्रेत्यस्य उपसर्गत्वं न तु ऋच्छतिं प्रति। एवमेव विगताः सेचका अस्मादिति 'विसेचको ग्रामः' इत्यत्र 'उपसर्गात् सुनोतिसुवतिस्यतिस्तौतिस्तोभतिस्थासेनयसेधसिचसञ्जस्वञ्जाम्' (अष्टा० ८.३.६५) इत्यनेन सेचकघटकसकारस्य षत्वं न भवति।

ननु गतिकारकेतरपूर्वपदस्येति वार्तिके पूर्वपदग्रहणे समासोपस्थितेः सत्त्वेन तत्र च गतिपदेन 'नित्यं क्रीडाजीविकयोः' (अष्टा० २.२.१७)

इति नित्याधिकारस्थः 'कुगतिप्रादयः' (अष्टा० २.२.१८) इति सूत्रेण विहितो गतिसमास एव 'लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम्' इति परिभाषया प्रतिपदोक्तत्वाद् गृह्यते। प्रतिपदोक्तत्वञ्चात्र स्वीयोद्देश्यतावच्छेदकसमर्पकज्ञानविषयीभूतानुपूर्वीसजातीयानुपूर्वीमत्पदघटित-शास्त्रविधेयत्वमिति। तथा च समन्वयः– स्वं "घुमास्थागापाजहातिसां हलि" इति तदीयोद्देश्यतावच्छेदकसमर्पकज्ञानविषयीभूतानुपूर्वी 'पा' इत्याकारिका, तादृशानुपूर्वीमत्पदघटितं शास्त्रं 'पा पान' इति शास्त्रम्। तद्विधेयत्वमपि पाशब्दादाविति। तेन पा पाने इति धातोः कर्मणि लटि, यकि 'घुमास्था' इतीत्वे पीयते इति रूपम्। 'पै शोषणे' इति धातोः कर्मणि लटि, यकि 'आदेच उपदेशेऽशिति' इति सूत्रेण आत्वे पायते इत्येव रूपं भवति। यतो हि 'पा' इत्यस्य लाक्षणिकत्वात् प्रतिपदोक्तत्वाभावाच्चेति। एवमेव प्रकृतेऽपि स्वं= 'गतिकारकेतरपूर्वपदस्यैव यण् इष्यते' इति तदीयोद्देश्यतावच्छेदकसमर्पकज्ञानविषयीभूतानुपूर्वी गतित्वरूपा, तादृशानुपूर्वीमत्पदघटितशास्त्रं 'कुगतिप्रादयः' इति तद्विधेयत्वमपि गतिसमासस्यैव, तस्यैव प्रतिपदोक्तत्वाद्ग्रहणं न तु 'अनेकमन्यपदार्थे' इति सूत्रविहितबहुव्रीहिसमासस्येति। अतः प्रकृष्टा धीः प्रधीरित्यत्र गतिसमासस्य प्रतिपदोक्तत्वात् 'गतिकारक' इति वार्तिकसहकृतेन 'एरनेकाचः' इत्यनेन यणादेशो भवति। न तु प्रकृष्टा धीर्यस्येति लाक्षणिकबहुव्रीहिसमासे। एवञ्च दुष्टा धीर्येषाम् इति दुर्धियः इत्यत्र बहुव्रीहिसमाससत्वात्, तस्य च लाक्षणिकत्वादेव यणादेशो न भविष्यतीति न भणितव्यम्। भाष्ये 'गतिकारकपूर्वस्यैवेष्यते' इति वार्तिके पूर्वपदग्रहणाभावात् समासोपस्थितेरभावेन समासत्वरूपविधेयता-वच्छेदकावच्छिन्नोद्देश्यताकत्वस्याभावेन प्रतिपदोक्तपरिभाषाया अप्रवृत्त्या प्रतिपदोक्तसमासो भवतु, लाक्षणिको वेति विशेषविषयाभावाद् न त्वदुक्तपथा यणो वारणं भवति। न च दीक्षितेन गतिकारकेतरपूर्वपदस्य यण् नेष्यते इति वार्तिके 'पूर्वपदमि'ति गृहीतमेवेति वाच्यम्। भाष्यपठितगतिकारकपूर्वस्यैवेति वार्तिकनियमलभ्यार्थानुवादकत्वाद् गतिकारकेतरपूर्वपदस्य यण् नेष्यते इति कथनेऽपि न क्षतिरिति। गतिकारकेत्यत्र प्रतिपदोक्तपरिभाषाया अप्रवृत्त्यैव नदीसञ्ज्ञासूत्रे भाष्ये प्रकृष्टा धीर्यस्येति बहुव्रीहिसमासविग्रहाभिप्रायेण 'प्रध्यै ब्राह्मण्यै' इति प्रयोग उपपन्नो भवति। त्वदुक्तरीत्या तु न स्यादिति। एतत्सर्वं

मनसि निधाय अभ्यधायि च भट्टनागेशेन शेखरे "यत्तु अत्र गतिसमासो नित्याधिकारस्थ एव प्रतिपदोक्तत्वाद् गृह्यत इति, तन्न; भाष्ये पूर्वपदग्रहणाभावेन समासोपस्थितेरभावेन विशिष्टरूपोपादानविषयप्रतिपदोक्तपरिभाषाया अप्रवृत्तेः। अत एव नदीसञ्ज्ञासूत्रस्थः 'प्रकृष्टा धीर्यस्या' इति विग्रहाभिप्रायेण प्रवृत्तः 'प्रध्यै ब्राह्मण्यै' इति भाष्यप्रयोगः सङ्गच्छते"[८]। एतेन उपर्युक्तव्याख्यानेन गतिसमाससहचर्य्येण कारकसमासस्य कर्तृकरणे कृता बहुलम् (अष्टा० २.१.३२) इति सूत्रविहितसमासस्यैव ग्रहणं भवति तस्मात् दुष्टा धीर्येषाम्, वृश्चिकाद् भीः इत्यर्थकदुर्धीवृश्चिकभीशब्दयोः यणादेशो न प्राप्नोतीति दीक्षितोक्तसमाधानप्रयासो व्यर्थ एवेति ब्रुवाणाः परास्ता इति।

यत्तु श्रीपतिदत्तेन दुर्धियः इत्यादौ यणादेशवारणाय भणितम्– "गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः" इति वचनाद् यत्र गतिकारकयोः क्विबन्तावस्थायामेव समासो भवति तत्रैवायं यण् भवति। यथा– प्रध्यौ, ग्रामण्यावित्यादौ। अत्र च ध्यै चिन्तायामित्यतः 'ध्यायतेः सम्प्रसारणञ्च' इति वार्तिकेन क्विपि, सम्प्रसारणे पूर्वरूपे च 'हलः' इति सम्प्रसारणस्य दीर्घे निष्पन्नः धीशब्दः; तस्य च गतिसंज्ञकप्रकृष्टार्थप्रशब्देन सह क्विबन्तावस्थायां सुबुत्पत्तेः प्रागेव समासो भवतीत्यतो यणादेशो भवति। इह दुर्धिय इत्यादौ तु दुष्टा धीर्येषाम् इत्यर्थे सुबन्तेन सह समास इति यणोऽप्रसङ्ग इतीयङुपपद्यत एवेति। तन्न, 'प्रध्यौ' इति बहुव्रीहिसमासे यण्निवृत्त्यापत्तेः। अत एव तत्र प्रकृष्टा धीरस्येति विगृह्य क्विबन्तस्य गतिकारकपूर्वस्य यणिष्यते इत्यत्र तु नेति प्रक्रियाकौमुद्याः प्रसादटीकाकारस्य विट्ठलाचार्यस्य व्याख्यानमपि गगनकुसुममिवैव। भगवता भाष्यकारेण बहुव्रीहिसमासाभिप्रायेण 'प्रध्यै ब्राह्मण्यै' इति प्रयुक्तत्वाद्। किञ्च प्रक्रियाकौमुदीकृता श्रीरामचन्द्राचार्येण 'गतिकारकपूर्वस्य क्विबन्तस्यैवेष्यते' इति वार्तिकस्वरूपं प्रत्यपादि। तन्न, भाष्ये तथानुक्तत्वादिति।

एतर्हि वृश्चिकभिय इत्यादौ इयङपवादयणो वारणाय लिख्यते। दीक्षितेन सिद्धान्तकौमुद्यां प्रोक्तम्– वृश्चिकशब्दस्य बुद्धिकृतमपादानत्वं नेह विवक्षितम्। वृश्चिकसम्बन्धिनी भीर्वृश्चिकभीरित्युत्तरपदलोपो वा इति। इयङपवादयणो वारणाय समाधिद्वयमदायि। तत्र प्रथमसमाधिः भीत्रार्थानां भयहेतुः इति सूत्रस्य प्रत्याख्यानपक्षे, द्वितीयश्च सूत्रारम्भपक्षे इति दीक्षिताशयः। वृश्चिकाद् भीरिति

---

[८] एरनेकाचः इति सूत्रे लघुशब्देन्दुशेखरे

वृश्चिकभीरित्यत्र विग्रहाभिप्रायो नास्ति। तथा सति अपादानकारकपूर्वत्वात् वृश्चिकभिय इत्यत्र इयङपवादो यण् दुर्वार एव स्यात्। किन्तु सम्बन्धसामान्येऽर्थे षष्ठीं कृत्वा वृश्चिकस्य भीः वृश्चिकभीरिति षष्ठीतत्पुरुषसमासाभिप्राय एवेति। ननु भीत्रार्थानां भयहेतुः इति सूत्रसत्वात् कथन्नात्र अपादानत्वात् पञ्चमी। ततश्च वृश्चिकाद् भीः इति वृश्चिकभीः कारकपूर्वत्वम् अस्त्येवेति चेन्न। भीत्रार्थानां भयहेतुः इति सूत्रस्य भाष्ये बुद्धिकृतमपादानत्वमादाय प्रत्याख्यातत्वात्, बुद्धिकृतापादनत्वस्य चेहाविवक्षणात् सम्बन्धसामान्यस्य च विवक्षणान्न दोषः। तथा च भीत्रार्थेति सूत्रप्रत्याख्यानभाष्यम्– "भीत्रार्थानां भयहेतुः। अयं योगः शक्योऽवक्तुम्। कथं वृकेभ्यो बिभेति, दस्युभ्यो बिभेति, चोरेभ्यस्त्रायते दस्युभ्यस्त्रायत इति? य एष मनुष्यः प्रेक्षापूर्वकारी भवति। स पश्यति यदि मां वृकाः पश्यन्ति ध्रुवो मे मृत्युरिति। स बुद्ध्या सम्प्राप्य निवर्तते, तत्र 'ध्रुवमपाये अपादानम्' इत्येव सिद्धम्। इह चौरेभ्यस्त्रायते, दस्युभ्यस्त्रायते इति यः पश्यति। स प्रेक्षापूर्वकारी सुहृद् भवति। स पश्यति–यदीमं चोराः पश्यन्ति ध्रुवमस्य वधबन्धनादिपरिक्लेशा इति। स बुद्ध्या सम्प्राप्य निवर्तयति। तत्र 'ध्रुवमपाये अपादानम्' इत्येव सिद्धम्"[१]।

एतेन भाष्येण 'विवक्षातः कारकाणि भवन्ति' इत्यपि प्रतिपादितं भवति। एवञ्च वृश्चिकशब्दस्यापादानत्वं प्राप्तं तथापि बुद्धिकृतसंयोगविभागस्य नात्र विवक्षा, किन्तु सम्बन्धसामान्यस्यैव विवक्षा। ततश्च कारकपूर्वत्वाभावान्न यण्। ननु वृश्चिकशब्दार्थस्य बुद्धिकृतापादानत्वं कुतो न विवक्षितं, सम्बन्धसामान्ये षष्ठी एव कुतो विवक्षितेति चेदुच्यते– वृश्चिकशब्दस्य बुद्धिकृतमपादानं न वास्तविकमपि तु आरोपितमेव। तस्मादवास्तविकत्वादविवक्षितमिति।

'ध्रुवमपायेऽपादानम्' इति सूत्रेण विभागावधित्वमपादानत्वं बोध्यते। यथा वृक्षात् पर्णं पतति इति वाक्ये पर्णविभागे वृक्षस्य अवधित्वमस्ति। अतस्तदपादानत्वं भवति। अनयैव रीत्या वृश्चिकाद् भीरित्यत्र भयविभागे वृश्चिकस्यावधित्वं नास्ति। यतो हि संयोगपूर्वक एव विभागो भवति। यथा वृक्षपर्णयोः संयोगः अनन्तरकाले च विभागः। एवञ्च वृश्चिके भयस्य संयोगो नास्ति, द्रव्ययोरेव संयोगात्। भीतिश्चात्र क्रियेति। तथा चारोपस्य वक्तुरधीनत्वादपादानत्वाविवक्षायां सम्बन्धमात्रविवक्षायां 'शेषे षष्ठी' इति षष्ठ्यन्ते समासे कारकपूर्वत्वं नास्तीति गतिकारकेतरपूर्वपदतया यणादेशो न भवतीति।

---

[१]भीत्रार्थानाम् इति सूत्रस्य महाभाष्यम्

ननु वृश्चिकाद् भीरित्यादौ बुद्धिकृतमेवापादानत्वमादाय पञ्चम्युपपत्तेः भीत्रार्थानामिति सूत्रस्य भाष्यकृता प्रत्याख्यानेऽपि सूत्रकारमते सूत्रारम्भपक्षे सम्बन्धसामान्ये प्राप्तां षष्ठीं बाधित्वा यदा अपादाने पञ्चमी तदा कारकपूर्वकत्वाद् यण् दुर्वार एवेति। प्रोक्तञ्च कैयटेन प्रदीपे "सूत्रारम्भपक्षे तु कारकशेषत्वात् षष्ठ्यां प्राप्तायामिदं वचनम्"[१०]। एवञ्च आरम्भप्रत्याख्यानयोः फलभेदत्वान्न प्रत्याख्यानं वरमिति मनसि धृत्वा दीक्षितेन समाधानान्तरमुक्तम् 'वृश्चिकसम्बन्धिनी भीः वृश्चिकभीरित्युत्तरलोपो वा'। द्वितीयसमाधानस्यायमाशयः– वृश्चिकस्य सम्बन्धिनीति वृश्चिकसम्बन्धिनी इति षष्ठीतत्पुरुषः। ततश्च वृश्चिकसम्बन्धिनी चासौ भीश्चेति कर्मधारयसमासे "शाकपार्थिवादीनां सिद्धय उत्तरपदलोपस्योपसंख्यानम्" इति वार्तिकेन पूर्वपदघटकसम्बन्धिनीशब्दस्य लोपः। एवञ्च वृश्चिकस्य भयसम्बन्धाभावान्नापादानकारकत्वमिति सूत्रकृन्मतेऽपि न दोषः। तथा चोक्तं तत्त्वबोधिनीकारेण "एवं च भययोगाभावाद् वृश्चिकस्य नापादानकारकत्वमिति सूत्रमतेऽपि न दोष इति भावः।"

वस्तुतस्तु प्रथमसमाधानापेक्षया न द्वितीयसमाधानस्य वैलक्षण्यं किन्तु परिहारान्तरमेव। उपायस्योपायान्तरादूषकत्वादिति न्यायात्। यत्तु कैयटेन तदनुयायिना दीक्षितेन च वैतण्डिकतया (स्वपक्षस्थापनाग्रहरहितः परपक्षखण्डनतत्परो वैतण्डिकः) अभिहितम्– भीत्रार्थानामिति सूत्रं सूत्रारम्भपक्षे षष्ठीबाधनार्थम्। तथा च बुद्धिकृतापादानत्वमाश्रित्य भीत्रार्थानामिति सूत्रप्रत्याख्यानपक्षे शेषत्वविवक्षायां षष्ठी सुलभा। तदारम्भपक्षे तु षष्ठ्या दुर्घटत्वेनारम्भप्रत्याख्यानयोः फलभेदसत्वात्, नैव प्रत्याख्यानं नैव च शेषत्वविवक्षायां षष्ठीति। तन्न रोचयामहे।

सूत्रारम्भपक्षेऽपि भीत्रार्थानामिति सूत्रं षष्ठीबाधनार्थं नास्ति, अपि तु हेतुत्वप्रकारकबोधे तृतीयाबाधनार्थमेव। अत एव भीत्रार्थानां प्रयोगे भयहेतुत्वेन विवक्षितोऽर्थः अपादानमिति सूत्रार्थः। दीक्षितेन च कौमुद्यां भयहेतुरपादानं स्यात् इति प्रोक्तम्। एवञ्च सूत्रारम्भेऽपि हेतुत्वाविवक्षायां षष्ठी निर्बाधतया जायत एव। आरम्भप्रत्याख्यानपक्षद्वयेऽपि फलभेदस्याभावेन न षष्ठीसमासानुपपत्तिरिति।

ननु यदि भीत्रार्थानामिति सूत्रं तृतीयाबाधकं स्यात्तदा विभक्तिप्रकरणे एव 'अकर्तर्यृणे पञ्चमी' इति सूत्रानन्तरं भीत्रार्थानां भयस्येति अकरिष्यद्भगवान्

[१०] तत्रत्ये प्रदीपव्याख्याने

पाणिनिः। हेतौ (अष्टा० २.३.२३), अकर्तर्यृणे पञ्चमी (अष्टा० २.३.२४) इति सूत्राभ्यां हेतावित्यस्य पञ्चमीत्यस्य चानुवृत्त्या इष्टसिद्धिर्भविष्यत्येव। एवञ्च तत्रापठित्वा कारकप्रकरणे पठित्वा चैतदेव बोध्यते, यद् भीत्रार्थानामिति सूत्रं न हेतुतृतीयाबाधनार्थमपि तु षष्ठीबाधनार्थमेव। अत एव च कैयटग्रन्थोऽपि सङ्गतो भवति। उक्तञ्च प्रदीपे "सूत्रारम्भपक्षे तु कारकशेषत्वात् षष्ठ्यां प्राप्तायामिदं वचनम्"।

तन्न। विभक्तिप्रकरणे पाठे तु कारकत्वप्रयुक्तकार्यानापत्तेः। तथा च वृश्चिकभीत इत्यादौ 'थाऽथाघञ्क्ताऽजबित्रकाणाम्' इत्यादिकारकत्वप्रयुक्त-थाथादिस्वरादिकार्यनापत्तिस्स्यात्। किञ्च वृश्चिकभ्यावित्यादौ संज्ञामविधायैव पञ्चमी विधाने कारकसंज्ञाभावेन यण् न स्यादिति। उक्तञ्च भावप्रकाशे वैद्यनाथपायगुण्डेमहाशयेन "भीत्रेति सूत्रस्य। विभक्तिप्रकरणे तु न कृतम्। कारकत्वहेतुककार्यानापत्तेः। एतेन रत्नाकरदण्ड्याद्युक्तमपास्तमिति भावः"[११]। एतेनेदं प्रस्फुटितं भवति– भीत्रार्थानामिति सूत्रप्रत्याख्यानपक्षे शेषत्वविवक्षायां षष्ठी। सूत्रारम्भपक्षेऽपि हेतुत्वप्रकारकबोधे तृतीयाबाधकतया सार्थक्यात् षष्ठीबाधकत्वकथनमयुक्तम्। तथा च पक्षद्वयेऽपि शेषत्वविवक्षया षष्ठी एव भवतीति नास्ति फलभेदः। अतो दीक्षितोक्तद्वितीयसमाधानं पूर्वसमाधानेऽरुचिं वीक्ष्य पृथक् समाधानमिति न मन्तव्यम् अपि तु परिहारान्तरमेव। यतो हि सूत्रमते भाष्यमते च षष्ठ्या उपपन्नत्वेनैकेनैवालमस्तीति। तथा चोक्तं नागेशेन शेखरे "किञ्च हेतुत्वाविक्षायां सम्बन्धत्वेन विवक्षया षष्ठी, सूत्रारम्भेऽपीत्यपि बोध्यम्। अभ्युच्चयेनाह– वृश्चिकसम्बन्धिनीति"[१२]।

## २. निष्कर्षः

दुर्धियः, इत्यत्र दुर्ध्यायन्तीति, दुष्टा धीर्ध्यानं येषामिति वा विग्रहाभिप्राय एवाश्रीयते तदा तु दुःशब्दस्य ध्यानरूपासत्त्वभूतक्रियायोगेन गतित्वात् यणादेशो भवत्येव। दुर्ध्यौ, दुर्ध्यः इत्यादि। यदा च दुःस्थिता धीर्येषामित्येव विग्रहाभिप्राय आश्रीयते तदा दुःशब्दोपात्तदुष्टत्वस्य स्थितिक्रियानिरूपिता एव गतिसंज्ञा न तु धीशब्दोपात्तधात्वर्थनिरूपितेति। ततश्च यणादेशो न भवतीयङादेश एव। दुर्धियौ, दुर्धियः। एवमेव– वृश्चिकभियः इत्यत्र वृश्चिकशब्दस्य बुद्धिकृतमपादानं विवक्ष्यते,

[११]एरनेकाच इत्यादिसूत्रस्य शेखरव्याख्यायाम्

[१२]एरनेकाचः इति सूत्रे शेखरे

तदा वृश्चिकाद्भीरिति अपादानकारकपूर्वकत्वाद् यणादेशो भवत्येव। वृश्चिकभ्यौ, वृश्चिकभ्यः इत्यादि। यदा च बुद्धिकृतमपादानत्वन्न विवक्ष्यते किन्तु सम्बन्धसामान्ये षष्ठी, वृश्चिकस्य भीरिति वृश्चिकभीः। तदा कारकपूर्वकत्वाभावादियङादेश एव। वृश्चिकभियौ, वृश्चिकभियः इति दिक्।

☆ ☆ ☆

## सन्दर्भग्रन्थसूची

१. गिरिधरशर्मा, परमेश्वरानन्दशर्मा (सम्पा.). (२००१). भट्टोजीदीक्षितविरचिता वैयाकरणसिद्धान्तकौमुदी. वाराणसी. मोतीलाल बनारसीदासः।

२. भार्गवशास्त्रिजोशी(सम्पा.). (२०११). पतञ्जलिकृतं महाभाष्यम् (प्रदीपो-द्योतसहितम्). दिल्ली. चौखम्बासंस्कृतप्रतिष्ठानम्।

३. श्रीपादसत्यनारायणमूर्तिः (सम्पा.). (२००५). नागेशकृतः लघुशब्देन्दुशेखरः. तिरुपतिः. राष्ट्रियसंस्कृतविद्यापीठम्।

४. सीतारामशास्त्री (सम्पा.). (१९६४) भट्टोजिदीक्षितकृता प्रौढमनोरमा (बृहच्छब्दरत्नलघुशब्दरत्नसहिता). वाराणसी. काशीहिन्दूविश्वविद्यालयः.

५. भट्टोजिदीक्षितः. (२००३). प्रौढमनोरमा (शब्दरत्न-रत्नप्रकाशिका-भावप्रकाश-सरलासहिता). वाराणसी. चौखम्बासंस्कृतसंस्थानम्।

# कारकशब्दार्थविमर्शः

सौरभमण्डलः*

## ०. भूमिका

व्याक्रियन्ते विविच्यन्ते प्रकृतिप्रत्ययादयो यत्र तद्व्याकरणम्। प्रकृतिप्रत्ययविषयकमालोचनं यत्र स्फुटं भासते तदेव व्याकरणम्। संस्कृतव्याकरणनिकाये त्रिमुनिव्याकरयणस्यैव प्राधान्यं दरीदृश्यते। अस्मिन् व्याकरणे आलोचितेषु विविधेषु विषयेष्वन्यतमं तावत्कारकम्। पाणिनिना कारकविषये 'कारके' (पा.सू १-४-२३), 'ध्रुवमपायेऽपादानम्' (पा.सू १-४-२४) इत्यादीनि सूत्राणि प्रणीतानि। परवर्तिकाले पाणिनिसूत्रमादायैव न केवलं वैयाकरणा अपि तु नैयायिकादयोऽपि कारकशब्दार्थनिरूपणे प्रवृत्ताः।

वैयाकरणानां चरमसिद्धान्तस्तावत् स्फोटसिद्धान्तः। स्फोटशब्दस्यार्थो हि वाचकः। स्फुटति स्फुटीभवत्यस्मादर्थ इति स्फोटोऽर्थप्रत्यायको नाम वाचकः। स्फोटस्य नैकेषु भेदेष्वपि वाक्यस्फोट एव मुख्यतया सर्वैरेव स्वीक्रियते। वाक्यस्फोट इत्यस्य वाक्यं वाचकमित्यर्थः। सुबन्ततिङन्तपदसमूहश्च वाक्यम् एकतिङ् वाक्यम् इति निर्देशात्। ईदृशे सुबन्ततिङन्तसमूहात्मके वाक्ये सुबन्तस्य तिङन्तस्य वा प्राधान्यमिति चेदुच्यते तिङन्तस्यैव प्राधान्यमिति। तथाहि 'सर्वं वाक्यं क्रियया परिसमाप्यते' इति न्यायानुसारं वाक्ये क्रियाया एव प्राधान्यम्। तिङन्तञ्च क्रियाप्रधानम्। तेन तिङन्तस्यैव प्राधान्यमिति।

वाक्ये क्रियया सह नामार्थयोः सम्बन्ध एव कारकम् इत्युच्यते। इदानीं कारकशब्दार्थनिरूपणप्रसङ्गे वैयाकरणानामन्येषाञ्च मतान्याकलय्य आलोचनं प्रस्तूयते।

## १. क्रियानिमित्तत्वं कारकत्वम्

क्रियानिमित्तत्वं कारकत्वमिति दुर्गसिंहेन कलापव्याकरणे उक्तम्। किन्तु लक्षणमिदमतिव्याप्तम्। चैत्रस्य तण्डुलं पचतीति सम्बन्धिनि चैत्रादावतिव्याप्तेः। अनुमत्यादिप्रकाशनद्वारा संप्रदानादेरिव तण्डुलादिद्वारा सम्बन्धिनोऽपि क्रियानिमित्तत्वात्।

---

*विद्यार्थी, संस्कृतविभागे, पश्चिमवङ्गराज्यविश्वविद्यालयस्य, पश्चिमवङ्गस्थस्य।

काशिकायामुच्यते 'कारकशब्दश्च निमित्तपर्यायः। कारकं हेतुरित्यनर्थान्तरम्। कस्य हेतुः? क्रियायाः' इति। पदमञ्जर्यां हरदत्तेन काशिकोक्तवचनमिदं विशदं व्याख्यातम्। तेन कारकशब्दस्य द्विविधोऽर्थः स्वीकृतः- करोतीति कारकमिति ण्वुलन्तो व्युत्पन्नः, अपरश्चाव्युत्पन्नो निमित्तपर्यायः। प्रथमतो व्युत्पन्नं कारकशब्दमादाय विचारेण प्रायशः प्रागुक्तरीत्यैव तेन दर्शितं यद् देवदत्तः काष्ठैः पचतीत्यादौ करणत्वाद्यवस्थायां करणानां कारकशब्दोपनीतस्वातन्त्र्यमवस्थान्तरगतमेव तिष्ठति, साम्प्रतिकं स्वातन्त्र्यं तु कर्तुरेव तिष्ठतीति। तेन तदा वस्तुतः करणानां स्वातन्त्र्यं न वर्तते इत्येव तन्मतम्। अत एव क्रियाकर्तृत्वरूपे व्युत्पन्नार्थेऽस्वरसात्तेन काशिकानुसारं कारकस्य क्रियानिमित्तार्थकत्वमादृतं– यदि तर्हि व्युत्पत्तिपक्षेऽप्यवस्थान्तरगतमेव स्वातन्त्र्यम्, एवं तर्हि करणाद्यवस्थायां निमित्तभाव एवाभ्युपगतो भवति। यद्येवं किं दोषप्रतिविधानव्यसनेन। निमित्तपर्यायस्यैव ग्रहणमस्तु इति मन्यमान आह– 'कारकशब्दश्च' इति। यद्यपि काशिकाकृता 'कारकं हेतुरित्यर्थान्तरमि'त्युक्तं तथापि द्रव्यगुणविषयस्य हेतोः कारकत्वानुपपत्त्या क्रियाहेतुत्वं क्रियानिमित्तत्वं वा कारकत्वमित्युपदर्शितं हरदत्तपादेन– अनाश्रितव्यापारं निमित्तं हेतुः, आश्रितव्यापारं कारकम्, उक्तञ्च-

द्रव्यादिविषयो हेतुः कारकं नियतक्रियम्।
अनाश्रिते तु व्यापारे निमित्तं हेतुरिष्यते॥ इति।

कारकार्थनिरूपणावसरे सारमञ्जर्यामुक्तम्– तत्र क्रियानिमित्तत्वं कारकत्वमिति वैयाकरणाः। तन्न, मैत्रस्य तण्डुलं पचतीत्यादौ सम्बन्धिनि मैत्रे कारकत्वापत्तिः, सम्प्रदानादेरनुमतिप्रकाशनद्वारैव तण्डुलसम्पादनद्वारापि पाकनिमित्तत्वात्। विभक्त्यर्थद्वारा क्रियान्वयित्वं कारकत्वमिति नैयायिकाः। अत एव नामार्थधात्वर्थयोर्भेदेन साक्षादन्वयस्य अव्युत्पन्नत्वात् तद्वारीभूतविभक्त्यर्थोपस्थितेस्तन्त्रत्वं कल्प्यम्। विभक्तिस्तु क्वचित्सुबात्मिका क्वचित्तिङात्मिका चेति शेषः। स्तोकं पचतीत्यादौ क्रियाविशेषणेऽतिप्रसक्तिप्रसङ्गवारणाय विभक्त्यर्थद्वारेति। तत्र हि द्वितीया साधुत्वार्था। सम्बन्धिनः क्रियानिमित्तत्वेऽपि न क्रियान्वयित्वम्, अतो नातिव्याप्तिः। गुरुविप्रतपस्विदुर्गतानां प्रतिकुर्वीत भिषक्स्वभेषजैः इत्यादौ तु नामाध्याहारः कर्तव्योऽतो नातिव्याप्तिः इति।

## २. क्रियान्वयित्वं कारकत्वम्

भट्टोजिदीक्षितेन 'करोतीति कारकम्' इत्यन्वर्थसंज्ञया यद्वा करोति कर्तृकर्मादिव्यपदेशानिति व्युत्पत्त्या कारकशब्दस्य क्रियापदम् इत्यर्थं स्वीकृत्य क्रियान्वयित्वं कारकत्वमिति स्वीकृतम्। अत्र प्रमाणं– 'यावद्ब्रूयात्क्रियायामिति तावत्कारक इति' इति कारकसूत्रस्थं भाष्यम्। तथा च 'कारकाद्दत्तश्रुतयोरेवाशिषि' (पा.सू.६-२-१४८) इति सूत्रे कारकशब्दे स्वरितत्वप्रतिज्ञाबलात्कर्त्रादिषट्कस्यैव ग्रहणम्। तेन नटश्रुतमित्यादौ न दोषः।

परन्तु पक्षेऽस्मिन् शीघ्रं धावतीति वाक्ये क्रियाविशेषणस्य क्रियायां साक्षादन्वयात्कारकत्वं स्वीकार्यं यदेवानिष्टम्। भवानन्दसिद्धान्तवागीशः कारकचक्रे कारकलक्षणमालोचयन् एवमाह तत्र क्रियानिमित्तत्वं कारकत्वमिति न सामान्यलक्षणम्। सम्प्रदानादेरनुमतिप्रकाशनद्वारैव तण्डुलादिसम्पादनद्वारा सम्बन्धिनोऽपि पाकादिक्रियानिमित्तत्वेन सम्बन्धिनि चैत्रस्य तण्डुलं पचतीत्यादौ चैत्रादावतिव्याप्तेः। किन्तु विभक्त्यर्थद्वारा क्रियान्वयित्वं मुख्यभाक्तसाधारणं कारकत्वम्। क्रियानिमित्तत्वसहितं मुख्यमिति। स्तोकं पचतीत्यादौ क्रियाविशेषणेऽतिव्याप्तिवारणाय विभक्त्यर्थद्वारेति। चैत्रस्य पचतीत्यादौ सम्बन्धित्वं न पाकेऽन्वेति षष्ठ्या नामार्थसाकाङ्क्षतया क्रियाया अपि कर्मादिसाकाङ्क्षतया परस्पराकाङ्क्षाविरहात्, किन्तु तण्डुलमित्यादिपदाध्याहारेणैव चैत्रस्य तण्डुलं पचतीत्येवान्वयबोधः।

ओदनस्य भोक्ता मैत्रस्य पाक इत्यादौ कर्मत्वकर्तृत्वार्थककारकविभक्तिरेव, 'कर्तृकर्मणोः कृति' इत्यनेन तद्विधानात्। अत एव सम्बन्धस्य कारकत्वं नास्ति क्रियायोगाभावात् इति शाब्दिकाः। यदि 'गुरुविप्रतपस्विदुर्गतानां प्रतिकुर्वीत भिषक्स्वभेषजैरि'त्यादिप्रयोगे विनापि नामाध्याहारं धात्वर्थे षष्ठ्यर्थः सम्बन्धोऽन्वेति तदा कर्तृत्वकर्मत्वादिषट्कान्यतमत्वे सति क्रियान्वयित्वं कारकत्वमिति तत्त्वम्। अत एव भवानन्दमते कर्तृकर्मत्वादिषट्कान्यतमत्वे सति क्रियान्वयित्वं कारकत्वम् इति कारकलक्षणं स्वीकृतम्। शब्दशक्तिप्रकाशिकायाञ्च कारकार्थविषये एवमुच्यते– धात्वर्थांशे प्रकारो यः सुबर्थः सोऽत्र कारकम् इति।

वृत्त्या कारकस्य बोधिका तदन्यस्य चेत्येवं द्विविधोऽपि सुपो विभागः। तत्र यद्धातूपस्थाप्ययादृशार्थे प्रकारीभूय भासते यः सुबर्थः स तद्धातूपस्थाप्यतादृशक्रियायां कारकम्। 'वृक्षात् पतति, व्याघ्राद्बिभेति' इत्यादौ

'ब्राह्मणाय ददाति, पुत्राय क्रुध्यती'त्यादौ 'दात्रेण छिनत्ति, घटत्वेन जानाती'त्यादौ 'स्थाल्यां पचति, शुक्तौ भासते' इत्यादौ 'ग्रामं गच्छति, घटं पश्यती'त्यादौ 'चैत्रेण पच्यते, घटेन भूयते' इत्यादौ च पतप्रभृतिधात्वर्थे पतनादौ पञ्चम्याद्युपस्थापितो विभागादिः प्रकारीभूय भासत इति तत्तद्धातूपस्थापिततत्तत्क्रियायां विभागादिकं प्रकृते कारकमतो धात्वर्थे स्वार्थबोधकतया तत्र पञ्चम्यादिः कारकविभक्तिरुच्यते। यादृशेन नामार्थेनावच्छिन्नस्य सुबर्थस्य यादृशधात्वर्थेऽन्वयः स एव तादृशधात्वर्थे कारकतया व्यपदिश्यते, तेन वृक्षात् पततीत्यादौ वृक्षादेरपि पतनादिक्रियायामपादानादिकारकव्यवहारः।

लघुमञ्जूषानुसारन्तु कारकं क्रियाजनकत्वशक्तिः। भाष्ये करोति क्रियां निर्वर्तयति इति व्युत्पत्तिप्रदर्शनात्। ब्राह्मणस्य पुत्रं पन्थानं पृच्छतीत्यादौ ब्राह्मणस्य न कारकत्वमिति।

बृहच्छब्देन्दुशेखरे चोच्यते 'करोति कर्तृकर्मादिव्यपदेशानि'ति व्युत्पत्त्या 'कारकशब्दः'। तेन क्रियायामित्यर्थः। तदुक्तं भाष्ये 'यावद्ब्रूयात्क्रियायामिति तावत्कारक इति' इति। 'क्रियायां यद्विषयस्तत्कर्मादिसंज्ञमि'त्यर्थः। विषयत्वं च जनकत्वेनेति बोध्यम्। अत एवैषां क्रियायामेवान्वयः। 'क्रियाजनकमि'ति ज्ञाते का सा क्रियेत्याकाङ्क्षोदयेन क्रियाया जनकाकाङ्क्षया च तत्रैवान्वयस्योचितत्वात्। जनकत्वं चैषां तत्क्रियोपयोगिक्रियाश्रयत्वेनेति भाष्यारूढः पन्थाः।

अन्ये तु अन्वेतीत्यध्याहार्यम्। क्रियान्वयित्वञ्च कारकत्वमित्याहुः। तेषां कारकाणां भावनान्वयः इति वाक्यं घटत्ववान् घटत्ववानितिवत् स्यादिति बोध्यम्। 'कारकाद्दत्तश्रुतयोः' इत्यादौ च कारकशब्दः स्वर्यते। तेनैतदधिकारोक्तं कर्त्रादिषट्कं गृह्यते इति नटस्य श्रुतं नटश्रुतमित्यादौ नातिप्रसङ्गः। यद्वा कारक इति सप्तमी निर्धारणे। आवृत्त्या प्रथमया विपरिणम्यते च। तदुक्तं भाष्ये– 'किमिदं कारक इति'? 'संज्ञानिर्देश' इति। तत्र 'ध्रुवमपाये' इत्यादौ 'ध्रुवमपाये' इति योगं विभज्य, 'कारके' इत्यनुवर्त्त्य, कारकसंज्ञापि विधीयते। क्रियाजनकानां मध्येऽपाये ध्रुवं कारकसंज्ञं स्यात्, ततस्तदपादानसंज्ञं स्यादिति।

नन्वेकसंज्ञाधिकारात्पर्यायतापत्तिः। न चानुवृत्तिं विनैव कारके इति सूत्रेण संज्ञाविधानेनैव पर्याये सिद्धे, पुनरनुवृत्तिः समावेशार्था भविष्यति। न च संज्ञिनामनुपादानात्कथं तेन संज्ञाविधान, क्रियाजनकानामाक्षेपेण तत्सम्भवादिति वाच्यम्। आक्षेपापेक्षयानुवृत्तेरेव लघीयस्त्वात्। क्रियाजनकमात्रस्य तद्रीत्या कारकसंज्ञत्वेन नटस्य श्रुतं नटश्रुतमित्यादिवारणाय 'कारकाद्दत्ते'त्यादौ

स्वरितपाठाश्रयणेऽधिकगौरवाच्चेति चेन्न। अपादानमित्यत्र कारकमित्यनुवर्त्य कारकं सदपादानमित्यर्थे कारकसंज्ञाया अनुवाद्यत्वलाभात्समावेशसिद्धेः। तेन 'ग्रामे वासः' इत्यादावधिकरणत्वात्सप्तमी, कारकत्वात्कृदुत्तरपदप्रकृतिस्वरश्च सिद्धः। 'भीत्रार्थानामि'त्यादावप्यावृत्त्या उक्तरीत्यैव समावेशो बोध्यः।

यद्यपि कर्तरि ण्वुल्विधानात्कारकत्वं कर्तृत्वपर्यायः। एवञ्च कर्मत्वादिविवक्षायां कर्तृत्वाभावात् कारकं कर्मेति विरुद्धं, तथापि संज्ञाविधानसामर्थ्यात्कारकपदं स्वातन्त्र्यमात्रलक्षकम्।

'स्वतन्त्रः कर्ते'त्यत्र तु कारकत्वादेव स्वातन्त्र्ये लब्धे पुनस्तदुक्तिस्तात्कालिकी प्रधानीभूतधात्वर्थनिरूपितस्वातन्त्र्येण विवक्षा यस्य, तस्य ग्रहणार्था। कारकत्वं यदा कदाचिद् विद्यमानस्वनिष्ठतत्क्रियोपयोगिक्रियानिरूपितस्वातन्त्र्यमादायेति स्पष्टं भाष्यकैयटयोः। अन्वर्थसंज्ञाविज्ञानाच्च क्रियाया अजनकस्य न।

वैयाकरणभूषणसारे उच्यते कारकम्, 'कारके' इत्यधिकृत्य तेषां व्युत्पादनात्। कारकशब्दो हि क्रियापरः, करोति कर्तृकर्मादिव्यपदेशानिति व्युत्पत्तेः। तथा चाग्रिमेष्वपादानादिसंज्ञाविधिषु क्रियार्थककारकशब्दानुवृत्या क्रियान्वयिनामेव संज्ञेति भाष्ये स्पष्टम् इति।

तथा च प्रभाटीकायां– क्रियापर इति। तथा च भाष्यम् 'अथवा यावद्ब्रूयात् क्रियायामिति तावत्कारके इति' कारकशब्दः क्रियापर्याय इति तदर्थः। एवञ्च कृत्वा निर्देश उपपन्नो भवति कारके इति। इतरता हि कारकेष्विति ब्रूयात् इति भाष्यात् 'कारके' इति विषयसप्तमी, अन्वयी इत्यध्याह्रियते, तथा च क्रियायामन्वयी कर्मादिसंज्ञो भवति इति कर्मादिसंज्ञाविधायकानामर्थः। एवञ्च 'कारके' इत्यस्य क्रियायामित्यर्थे कारकसंज्ञा एव नास्ति। 'गतिकारकोपपदात्' इत्यादौ कारकपदे स्वरितत्वप्रतिज्ञया 'स्वरितेनाधिकारः' कारः इत्यर्थमादाय कर्मादीनां ग्रहणम्। क्रियान्वयिनामिति – क्रियायामन्वयि कर्मसंज्ञं स्यात्, क्रियायामन्वयि कर्तृसंज्ञं स्यादित्येवं रूपेणेत्यर्थः।

दर्पणटीकायामुच्यते– अन्ये तु उत्तरभाष्ये करोति क्रियां निर्वर्तयतीति व्युत्पत्तिप्रदर्शनात्कारकत्वम्। अत एव ब्राह्मणस्य पुत्रं पन्थानं पृच्छतीत्यादौ ब्राह्मणस्य न कारकत्वम्, पुत्रेणान्यथासिद्धत्वात्। अत एव तेषां क्रियायामन्वयः। क्रियाजनकमिति ज्ञाते का सा क्रियेत्याकांक्षोदयेन, क्रियाया अपि जनकाकांक्षया च तत्रैवान्वयस्य औचित्यात्। अत एव 'गतिकारकोपपदात्' इत्यादौ कारकशब्दस्यापादानादिपरता संगच्छते। 'कारके' इति तु प्रथमार्थे

सप्तमीत्याहुः।इति।

लघुशब्देन्दुशेखरे उच्यते– 'कारके' इति प्रथमार्थे सौत्री सप्तमी। तेन कारकं सत्कर्मसंज्ञमित्यर्थः।संज्ञिनः क्रियाजनकत्वन्तु महासंज्ञयाक्षिप्तम्। यद्वा सप्तमी यथाश्रुतैव। कारकपदञ्च क्रियापरम्, करोति कर्तृकर्मादिव्यपदेशानिति व्यत्पत्तेः। जनकमित्यध्याहारः। विषयत्वं सप्तम्यर्थः। कारकग्रहणे च स्वरितत्वप्रतिज्ञया एतदधिकारोक्तकर्त्रादिषद्कमेव, तेन नटश्रवणम् इत्यादौ न कृदुत्तरपदप्रकृतिस्वरः। ग्रामे वास इत्यादौ च तत्स्वरसिद्धिरित्यन्यत्र विस्तरः इति।

भैरवीटीकायामुच्यते करोतीति कारकम्। किं करोतीति प्रश्ने साध्यत्वेन योऽर्थः प्रतीयते तन्निरूपितसाधनत्वमेव गृह्यते। सा च क्रियैव, न तु द्रव्यम्, तत्स्वभावतः सिद्धत्वेनैव भासते। एतत्पक्षे एकसंज्ञाधिकारात्संज्ञाद्वयविधानेऽपि पर्यायः स्यादिति द्वयोः समावेशसिद्धये कारकं स्यादित्युक्तम्। गतिकारकोपपदात् (पा.सू.६-२-१३९) इति सूत्रे कारकशब्देन कारकसंज्ञकस्यैवोपस्थितिः। एवमेवैतदधिकारोक्तकर्त्रादिसंज्ञासु बोध्यम्। तेन 'ग्रामे वास' इत्यादौ कारकत्वात् कृदुत्तरप्रकृतिस्वरः। 'थाथघञि'ति विहितादिकरणत्वात् सप्तमी च सिध्यति। भाष्योक्तं प्रथमपक्षमुक्त्वा द्वितीयपक्षमाह यद्वेति। तन्न ह्येवमुक्तम्- "यावद्ब्रूयात् क्रियायामिति तावत्कारके" इति। एवञ्च कृत्वा निर्देश उपपन्नो भवति कारके इति। कारकशब्दस्य क्रियापरत्वे युक्तिमाह- करोति कर्तृकर्मादिव्यपदेशानिति। कारके इति वैषयिकाधारे सप्तमी, तदाह- विषयत्वमिति। स्वरितत्वमिदं दोषविशेषरूपं कारकशब्दबोध्यम्। 'स्वरितेनाधिकारः' इति सूत्रस्य स्वरितेनाधिकं कार्यमित्यर्थादेतदधिकारोक्तसंज्ञाविशिष्टस्यैव ग्रहणमित्येव कार्यं प्रकृते गृह्यते।

शब्दकौस्तुभे उच्यते अन्वर्था चेयं संज्ञा करोतीति कारकमिति। तेन क्रियानन्वयिनो न भवति। ब्राह्मणस्य पुत्रं पन्थानं पृच्छतीति। इह हि ब्राह्मणः पुत्रविशेषणं न तु क्रियान्वयी।

नन्वेवं करणं कारकमिति सामानाधिकरण्यं कथम्, अस्वातन्त्र्येण ण्वुल्प्रत्ययायोगात्। अन्यथा कर्तृसंज्ञापत्तौ करणसंज्ञायाः पर्यायापत्तेरिति चेदुच्यते अधिकारसामर्थ्यात् कारकशब्दोपनीतं स्वातन्त्र्यमवस्थान्तरगतं विज्ञायते। अवस्थान्तरे यत्स्वतन्त्रं तत्साधकतमं करणमिति। यथा 'कुरुक्षेत्रस्थाः काश्यां वसन्ती'त्यादौ। कर्तुस्तु साम्प्रतिकं स्वातन्त्र्यम्। तच्च कर्तृसंज्ञायामुपयुज्यते इति। यद्वा कारकशब्दः क्रियापरः करोति कर्तृकर्मादिव्यपदेशानिति व्युत्पत्तेः। तथा

च अपादानादिसंज्ञाविधौ क्रियायामित्यस्योपस्थित्या क्रियान्वयिनामेव तत्तत्संज्ञाः स्युः। 'कारकाद्दत्तश्रुतयोः' (पा.सू.६/२/१४८) इत्यादौ तु कारकशब्दः स्वर्यते। तेनैतदधिकारोक्तं कर्त्रादिषट्कमेव गृह्यते इति।

परमलघुमञ्जूषायामुच्यते- 'तत्र क्रियानिष्पादकत्वं कारकत्वम्' इति। विभक्त्यर्थनिर्णये गिरिधरोपाध्यायेन एवमुक्तं कारकत्वं न क्रियान्वयित्वम्। 'कुमार्य इव कान्तस्य त्रस्यन्ति स्पृहयन्ति च' इत्यत्र षष्ठ्यर्थस्य शेषस्यापि (सम्बन्धस्यापि) क्रियान्वयित्वात्तत्रातिव्याप्तेः। न च षष्ठ्यर्थभिन्यत्वे सति क्रियान्वयित्वं कारकत्वम्। अतो नातिव्याप्तिरिति वाच्यम्। तथा सति तण्डुलस्य पाक इत्यादौ षष्ठ्यर्थस्य कर्मत्वस्य अकारकत्वापत्तेरिति।

## ३. कारकपदस्य नानाविधं शक्यम्

निरर्थकपदसमभिव्याहारज्ञानाभाव-विशिष्टद्वितीयादिज्ञान-जन्योपस्थिति-विशेष्यतापन्नं कर्मत्वम्। तत्तद्विभक्तिजन्योपस्थितिविशेष्यतापन्नं कर्तृत्वं करणत्वं सम्प्रदानत्वमपादानत्वमधिकरणत्वं नानाविधं कारकपदस्य शक्यम्। नानार्थमेव कारकपदम्। तथा च कर्मत्वादिसकलसाधारणं कारकपदवाच्यत्वमेव कारकत्वमिति।

ननु नानार्थत्वाभ्युपगमेऽपि कारकपदस्य कारकपदवाच्यत्वं कारकत्वं न भवति कारकपदाधुनिकसङ्केतविषये द्रव्यादावतिव्याप्तेः। न च नित्यसङ्केतेन कारकपदवत्त्वं तद्, आधुनिकसङ्केतविषये द्रव्यादौ नित्यसङ्केताभावान्नातिव्याप्तिरिति वाच्यम्। तथा सति कर्मात्वादीनामपि तथात्वादसम्भवापत्तेः। तेषां शाब्दिकसङ्केतेन कारकपदवत्त्वाद् इति चेन्न। कर्मत्वादौ कारकपदस्य नित्यसंकेतात्। व्याकरणे कुत्रापि 'कारके' इत्यधिकारसूत्रमुक्त्वा व्याकरणे 'ध्रुवमपायेऽपादानम्' इत्यादिना कारकगणाभिधानं सङ्गच्छते। कारकपदस्यानित्यसङ्केतसत्त्वे कारकसंज्ञाग्राहकसूत्रं विना अधिकारसूत्राभिधानस्य असङ्गत्यापत्तेरिति कारकपदवाच्यत्वमपि कारकलक्षणं निष्प्रत्यूहमित्यास्तां विस्तरः।

### ३.१. न्यायवार्तिकरीत्या कारकशब्दार्थः

न्यायदर्शने प्रथमसूत्रे करणार्थकल्युडन्तस्य प्रमाणशब्दस्यार्थविचारावसरे वार्तिककारेण एवमुक्तम्- न च कारकशब्दाः क्रियासम्बन्धमन्तरेणात्मानं लभन्ते। न च द्रव्यमात्रं कारकं न च क्रियामात्रमिति। कारकशब्दो हि प्रवर्तमानः क्रियासाधने क्रियाविशेषयुक्ते प्रवर्तते इति।

## ३.२. तात्पर्यटीकायां कारकशब्दार्थः

प्रधानक्रियासाधने हेतौ अवान्तरक्रियाविशेषयुक्ते कारकशब्दः प्रवर्तते। द्वैधीभावे हि फले प्रधानव्यापारे कर्तुः करणगोचर उद्यमननिपतनादिः अवान्तरव्यापारः। कर्मणश्च दारुणः स्पर्शवद्वेगवत्तीक्ष्णतरकुठारसंयोग एवावान्तरव्यापारः। तेन हि दारु स्वावयवपरिस्पन्दजन्याद् अवयविभागाद् द्वैधीभावमनुभवति। तस्माद् अवान्तरप्रधानव्यापारसम्पन्नं कारकमिति प्रत्यपादि।

## ३.३. भाट्टचिन्तामणौ कारकत्वविचारः

ननु किमिदं कारकत्वम्? न तावत् क्रियाप्रयोजकत्वम्। देवदत्तस्य तण्डुलं पचतीत्यत्र अनुमतिदानेन पाकप्रयोजके देवदत्ते कारकत्वप्रसङ्गात्। नापि क्रियाजनकत्वम्। 'यथाज्ञानं पचति' इत्यत्र ज्ञानेऽतिप्रसक्तेः। ज्ञानस्यापि पापक्रियाजनकत्वात्। नापि धात्वर्थान्वितविभक्त्यर्थान्वयित्वम्। 'धनाय गच्छति, स्वर्गाय यतते' इत्यादावकारककारकयोर्धनस्वर्गयोरतिव्याप्तेः। 'न पचति' इत्यादौ नञर्थेऽभावेऽतिव्याप्तेश्च। तस्य पाकान्विताख्यातविभक्त्यर्थान्वयित्वात्। निपातार्थातिरिक्ते सतीति विशेषणे 'नक्तं पचति' इत्यादावधिकरणे नक्तादावतिव्याप्तेः। तस्मात् कर्तृकर्माद्यन्यतमत्वं कारकत्वमिति नैयायिकाः। 'तत्र क्रियानिष्पादकत्वं कारकत्वम्' इति परमलघुमञ्जूषायां नागेशेन उच्यते। प्रक्रियाकौमुद्याः प्रकाशटीकायां कारकविषये उच्यते 'क्रियां कुर्वद्धि कारकम्' इति। 'अपादानाद्यन्यतमत्वं कारकत्वम्' इति कारकतत्त्वानुशीलने उक्तम्। 'क्रियाजनकत्वं हि कारकत्वम्' इति उद्योतकारस्य नागेशस्य मतम्। 'साधकं निर्वर्तकं कारकसंज्ञं भवतीति वक्तव्यम्' इति भाष्यकृन्मतम्। साधकमित्यस्य च क्रियासाधकम् इत्यर्थः। 'एवं तर्हि सामान्यभूता क्रिया वर्तते। तस्याः निर्वर्तकं कारकम्' इति भाष्यकारस्य कारकार्थविषये अभिमतम्।

## ४. उपसंहारः

एवमुपर्युक्तदिशा कारकार्थविषये सत्यपि मतवैभिन्न्ये क्रियान्वयित्वं कारकत्वं, क्रियाजनकत्वञ्चेत्यर्थद्वये विद्वन्मान्याः। उभयविधकारकत्वस्वीकारे न क्षतिः। नापि लक्ष्ये काचन विप्रतिपत्तिः भाष्ये उभयविधव्याख्यानात्। तथापि उद्देश्यतावच्छेदकविधेययोः ऐक्ये नैयायिकाः शाब्दबोधं न स्वीकुर्वन्ति। अतः सर्वविधनिर्दुष्टत्वेन क्रियाजनकत्वमेव कारकत्वमित्यर्थ उचितः।

☆ ☆ ☆

# सहायकग्रन्थसूची

१. कौण्डभट्टः. (२००६) वैयाकरणभूषणसारः. सम्पा. श्रीबालकृष्णपञ्चोली श्रीहरिवल्लभशास्त्री. वाराणसी : चौखम्भा संस्कृत संस्थान।

२. जयकृष्णः. (१९९७) सारमञ्जरी. सम्पा. रवीन्द्रनाथभट्टाचार्यशास्त्री . कलिकाता : रामकृष्णमिशन् इनस्टीट्युट् आफ कालचार्।

३. जगदीशतर्कालङ्कारः. (२००२) शब्दशक्तिप्रकाशिका. सम्पा. पण्डितढुण्ढिराजशास्त्री. वाराणसी : चौखम्भा संस्कृत संस्थान।

४. नागेशः. (२००२) लघुशब्देन्दुशेखरः(कारकप्रकरणम्). सम्पा. डॉ तेजपालशर्मा. वाराणसी : सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः।

६. नागेशः. (१९८९) वैयाकरणसिद्धान्तलघुमञ्जूषा(द्वितीयभागः). सम्पा. पण्डितमाधवशास्त्रिभाण्डारी-पण्डितनरहरिशास्त्रिपेण्डसे-प्रभृतयः. वाराणसी : चौखम्बा संस्कृत सीरीज आफिस।

७. नागेशः. (१९९८) बृहच्छब्देन्दुशेखरः(द्वितीयभागः). सम्पा. डॉ सीतारामशास्त्री. वाराणसी : सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः।

९. भट्टाचार्यः, अयनः. (२०१२) कारकविवेकः. कलिकाता : संस्कृत बुक डिपो।

१०. भट्टोजिदीक्षितः. (१९९१) शब्दकौस्तुभः(द्वितीयभागः). सम्पा. गोपालशास्त्री नेने. वाराणसी : चौखम्बा संस्कृत सीरीज आफिस।

११. N.S. Ramanuja Tatacharya. (2006) *Śābdabodhamīmāṃsā.* New Delhi: Rashtriya Sanskrit Sansthan।

# मनोः वर्णव्यवस्थास्वारस्यम्

शम्पापालः*

## ०. भूमिका

भारतवर्षस्य यथार्थस्वरूपिनिरूपणचिकीर्षायां महामतिना व्यासदेवेन महाभारते भणितम् "धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ" इति। अर्थाद् अस्माकम् अयं देशः खलु धर्मार्थकाममोक्षाणां समन्वयः। परं कोऽयं धर्मः। आदावेव वक्तव्यं यद्, बह्वर्थको धर्मशब्दः। धृधातोरुत्तरं मनिन्-प्रत्ययेन निष्पन्नः धर्मशब्दः। अस्यार्थो हि, यो लोकस्थितिं धारयति, स एव धर्मः। तथाहि महाभारते उक्तम्–

धनात् स्रवति धर्मो हि धारणाद्वेति निश्चयः।
धारणाद्धर्ममित्याहुर्धर्मो धारयते प्रजाः।
यत्स्याद्धारणसंयुक्तं स धर्म इति निश्चयः॥ इति।

अपि च, धनपूर्वकात् स्माधातोः परं यक्प्रत्ययेन निष्पन्नो धर्मशब्दः। निर्वचनस्यास्य तात्पर्यं– यस्मात् पार्थिवानां तथाऽपार्थिवानां धनानां प्राप्तिर्जायते, स एव धर्मः। सदाचारो हि धर्मस्य उत्सः। परं पुरुषार्थानुसारं व्यवहारो धर्मशब्दार्थः। मनुस्मृतौ धर्मस्वरूपं निरूपितम्–

विद्वद्भिः सेवितः सद्भिर्नित्यमद्वेषरागिभिः।
हृदयेनाभ्युनुज्ञातो यो धर्मस्तं निबोधत॥ (मनु. २/१) इति।

अर्थाद् द्वेषपक्षपातरहितैः सद्भिः स्वविवेकानुशासनेन सहृदयजनैः नीतिपुरस्सरं यद् यदाचर्यते, तत्तदेव धर्मः। मनुना एतदप्युक्तम्— वेदोखिलधर्ममूलम् (तत्रैव २/५) इति। अर्थाद् वेदः सर्वधर्माणां मूलमिति। वेदेषु वर्णाश्रमादीनां कर्तव्याकर्तव्यादिकं वर्णितम्। मेधातिथिना मनुभाष्ये धर्मस्य वैशिष्ट्यपञ्चकमुक्तम्– वर्णधर्मः, आश्रमधर्मः, वर्णाश्रमधर्मः, नैमित्तिकधर्मः, गुणधर्मश्चेति। मन्वादिशास्त्रज्ञैः स्वधर्मपालनस्य निर्देशः प्रदत्तः सर्वदा। श्रीकृष्णेन गीतायां भणितम्– स्वधर्मे निधनं श्रेयः इति। ननु कोऽयं स्वधर्म इति चेदुच्यते– स्वभावनियतः स्वप्रकृत्यनुसारी वेति स्वधर्मः। सम्यक्तया अनुष्ठितात् परधर्मात्

*अंशकालिकाध्यापिका, संस्कृतविभागे, विद्यासागरमहाविद्यालये, नवद्वीपे पश्चिमवङ्गेषु – ७११२०२

विगुणस्वधर्मः श्रेष्ठः, यतः स्वभावनियतकर्माणि कृत्वा कोऽपि कदापि न भवति किल्विषभाक्।[२] प्रभूतस्वस्वभावनियतकर्मणा एव मानवः श्रेयो लभते।[३] तथाहि गीतायां गीतम्–

स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः। (गीतायाम् १८/४५)

मनुनापि उदितम्–

वरं स्वधर्मो विगुणो न पारक्यः स्वनुष्ठितः।(मनु. १०/९७) इति।

## २. वर्णधर्मः

वर्णश्चतुर्विधः। ब्राह्मणक्षत्रियवैश्यशूद्रभेदात्। वर्णचतुष्टयस्यास्य स्वस्वधर्माः स्वभावनियतकर्मणां स्वस्वभावप्रभवगुणैः सदा नियन्त्रिताः। शमतपःशौर्यक्षमाविज्ञानास्तिक्यादिकं ब्राह्मणस्य स्वभावजं कर्म। शौर्यतेजोधैर्यदक्षताविक्रमदातृत्वादीनि सर्वाणि क्षत्रियप्रकृत्याः स्वभावजानि कर्माणि। परिचर्यात्मकं कर्म शूद्रस्य। वायुपुराणेऽपि गीतायाः सममेव भावः द्योतितः।[४] प्रपञ्चस्यास्य सृष्टिरक्षरैः प्रजापतिना मुखबाहूरुपदेभ्यः समुत्पद्यमानस्य ब्राह्मणादेश्चतुर्वर्णस्य स्वतन्त्रा वृत्तिर्निर्दिष्टा–

सर्वस्यास्य तु सर्गस्य गुप्त्यर्थं स महाद्युतिः।
मुखबाहूरुपत्जानां पृथक् कर्माण्यकल्पयत्॥ (मनु. १/८७) इति।

कस्य वर्णस्य किं तावत् वृत्तमिति चेदुच्यते मनुना–

अध्यापनमध्ययनं यजनं याजनं तथा।
दानं प्रतिग्रहश्चैव ब्राह्मणानामकल्पयत्॥

---

[२]गीतायाम् १८/४७

[३]स्वकर्मणा सर्वसिद्धिममरत्वं लभेद् ध्रुवम्।
सुरत्वं च मनुष्यत्वं च सुरेन्द्रत्वं लभेन्नरः॥
विष्णुत्वं च शिवत्वं च गणेशत्वं तथैव च॥ (देवीभागवते, १७/१८,२०)

[४]ब्रह्मा तमर्थं बुद्ध्वा तु याथातथ्येन वै प्रभुः।
क्षत्रियाणां बलं दण्डं युद्धमाजीवमादिशत्॥
याजनमध्यापने चैव तृतीयञ्च प्रतिग्रहम्।
विप्राणां कृषिगोरक्षावाणिज्यं च विशां ददौ॥
शिल्पाजीवभृतिं चैव शूद्राणां व्यदधात् प्रभुः।
सामान्यानि तु कर्माणि ब्रह्म-क्षत्र-विशां पुनः।
यजनाध्ययनं दानं समानानि तु तेषु च॥ (वायुपुराणस्य पूर्वभागः, अष्टमाध्यायः)

प्रजानां रक्षणं दानमिज्याध्ययनमेव च।
विषयेष्वप्रसक्तिश्च क्षत्रियस्य समासतः॥
पशूनां रक्षणं दानमिज्याध्ययनमेव च।
वणिक्पथं कुसीदञ्च वैश्यस्य कृषिमेव च॥
एकमेव तु शूद्रस्य प्रभुः कर्म समादिशत्।
एतेषामेव वर्णानां शुश्रूषामनसूयया॥ (तत्रैव १/८८-९१) इति।

अर्थाद् अध्यापनादीनि षट्कर्माणि ब्राह्मणानां कल्पितवान् मनुः। प्रजारक्षणादीनि क्षत्रियस्य कर्माणि। विषयेषु गीतनृत्यवनितोपभोगादिषु अप्रसक्तिः तेषां पुनः पुनरन्यसेवनं संक्षेपण इति कुल्लूकः। संहिताकारः पशूनां पालनादीनि वैश्यस्य कल्पितवान्। वणिक्पथं नाम स्थलजलादिना वाणिज्यं, कुसीदञ्च वृद्ध्या धनप्रयोगः। प्रभुर्ब्रह्मा शूद्रस्य ब्राह्मणादिवर्णत्रयपरिचर्यात्मकं कर्म निर्मितवान्।

ब्राह्मणस्य अध्यापनादीनां षण्णां कर्मणां मध्यात् याजनमध्यापनं विशुद्धप्रतिग्रहस्तेः "द्विजातिभ्यो धनं लिप्सेत्, प्रशस्तेभ्यो द्विज" इति वचननिर्देशात् द्विजातेः प्रतिग्रह इत्येतानि त्रीणि कर्माणि जीवनार्थानि ज्ञेयानि। यथा क्षत्रियस्याध्यापनयाजनप्रतिग्रहा निवर्तन्ते तथा वैश्यस्यापीति शास्त्रव्यवस्था। यस्मात् मनुः प्रजापतिस्तौ क्षत्रियवैश्यौ प्रति तान् वृत्त्यर्थानि कर्माणि कर्तव्यत्वेनोक्तवान्, एवं वैश्यस्यापि अध्ययनयागदानानि भवन्ति। धर्मार्थाः पुनः क्षत्रियवैश्ययोः दानाध्ययनयागा भवन्ति। तथाहि दशमाध्याये वर्णचतुष्टस्य कर्मणां साररूपेण मनुना उक्तं–

वेदाभ्यासो ब्राह्मणस्य क्षत्रियस्य च रक्षणम्।
वार्ता कर्मैव वैश्यस्य विशिष्टानि स्वकर्मसु॥ (१०/८०) इति।

मनुसंहिताया अन्यत्र क्षत्रियवैश्यशूद्राणां वृत्तविषयिणी विशेषोक्तिः दृश्यते। कस्मात् पुनः विपद्यपि राज्ञः रक्षणमुच्यते यस्मात् स्वधर्म इति। राज्ञः शत्रुविजयः स्वधर्मो विजयफलं युद्धमित्यर्थः। प्रजारक्षणयुक्तस्य यदि कुतश्चिद्भयं स्यात् तदा स युद्धपराङ्मुखो न भवेत्। एवं च शस्त्रेण वैश्यान् दस्युभ्यो रक्षित्वा तेभ्यो यत्करग्रहणं, तद्धर्मानुमतम्।[५] वैश्यः विवाहादिकं कृत्वा कृष्यादिकार्यार्थं पशुपालने च सर्वदा समायुक्तः स्यात्। पशुरक्षणस्य वार्तात्वेपि प्राधान्यख्यापनार्थं पृथग्विधानम्।

---

[५]मनुस्मृतौ १०/११८-११९

धर्मानुसारं धनवृद्धौ प्रकृष्टं यत्नं कुर्यात्। हिरण्यादिदानमपेक्ष्य अन्नमेव प्राणिभ्यो विशेषेण दद्यात्। शूद्रस्य पुनर्वेदविदां गृहस्थानां स्वधर्मानुष्ठानेन यशोयुक्तानां ब्राह्मणानां परिचर्या या सैव प्रकृष्टः स्वर्गादिश्रेयोहेतुर्धर्मः।[६] उच्चवर्णसंयोगात् स खलु शूद्रः क्रमेण विशुद्धो भूत्वा जन्मान्तरेण "उत्कृष्टां जातिमश्नुते" (९/३३५)।

धनगर्वेण स्फीतः सन् यथा कोऽपि शूद्रः इतरवर्णान् नावमानयेत्, तदर्थं संहिताकृता भणितं- "शक्तेनापि हि शूद्रेण न कार्यो धनसञ्चयः।" इति। एतत् लक्षणीयं यत् अहिंसा-सत्य-अस्तेय-शौच-संयमादिधर्मा वर्णचतुष्टयस्य कृते प्रयोज्याः। तथापि ब्राह्मणस्य ज्ञानार्जनं क्षत्रियस्य आर्तरक्षणं, वैश्यस्य वार्ता (कृषिपाशुपाल्ये वाणिज्ये च वार्ता) तथा च शूद्रस्य परिचर्यात्मकं कर्म सुनिर्दिष्टं मनुना–

ब्राह्मणस्य तपो ज्ञानं तपः क्षत्रस्य रक्षणम्।
वैश्यस्य तु तपो वार्ता तपः शूद्रस्य सेवनम्॥ (११/२३६)।

अन्यत्र मनोर्मतं तावत्– क्षत्रियो बाहुबलेन, वैश्यशूद्रौ धनबलेन, तथा च ब्राह्मणः जपहोमेन आपदं तरेयुः।[७]

## ३. वर्णविभागस्य स्वारस्यम्

वर्णविभागोऽयं स्वारसिकः। समाजः नाम सङ्घातसंहतजनसङ्घमात्रम्। चातुर्वर्ण्यं सङ्घातस्यास्य अङ्गाङ्गिसुसम्बद्धाङ्गप्रत्यङ्गात्मकम्। स्वभावजगुणकर्मणो विभागः वर्णचतुष्टयस्यास्य भित्तिरूपः। तथाहि महाभारतस्य शान्तिपर्वणि भणितम्–

ब्रह्म वक्त्रं भुजौ क्षत्रं कृत्स्नमूरुदरं विशः।
पादौ सस्याश्रिताः शूद्राः तस्मै वर्णात्मने नमः॥ इति। ऋग्वेदस्य पुरुषसूक्तेपि सममेव भावः समाम्नातः।[८]

परं पाश्चात्त्यविज्ञा नानुमन्यन्ते मतमिदम्। तेषां नये– सर्वे मानवाः समानाः (All men are born equal) भोः पाठकाः। भवन्तः विचारयन्तु– किमेतत् सत्यम्? प्रतिमानवं जन्म भिद्यते। तेषु कोऽपि विवर्तनेन पुरस्सरः, कोऽपि

---

[६] तत्रैव ९/३२६-३३४

[७] तत्रैव ११/३४

[८] ब्राह्मणोस्य मुखमासीद् बाहू राजन्यः कृतः।
ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत॥ (१०/९०)

पश्चाद्वर्ती, कश्चन अग्रजः, कश्चित् वा अनुगः। भेदोयं सुदूरकालादासीत् आस्ते भविष्यति च। भगवतो मनोश्चातुर्वर्ण्यविभागः सुप्रतिष्ठितः सत्यस्यास्योपरि। तथाहि प्रख्यातः समाजतत्त्वविद् भगवान्दासः सुष्ठुतया कथितवान्, "In the course of time, The Brahmana class corresponding to the head, come to be entrusted, principally with all educational, literary, scientific, legislative, religious and other such matters requiring intelligence of high and refined quality, pre-eminently; The Kshatriya, corresponding to the arms, with those of war, polities, governmental and executive work; the Vaisya, corresponding to The trunk and its organs, with all affairs concerned with wealth, food-production, trade, industry; and the shudra, corresponding to the feet, became veritably the supporting pedestal of all." इति।[९] शूद्रः पादज इत्युच्यते। परं ते नावज्ञेयाः। वस्तुतः, कोऽपि वर्णः नहि हेयः– "ब्रह्मदाशा ब्रह्मकितवाः"। आभाणकं विद्यते आङ्गलभाषायां– "The Brahman is in the slave, the Brahman is the sinner, So Man is the eternal Monad, a spark of the divine fire." इति। तथाहि भागवतपुराणे शुकदेवेनोक्तम्-

मनसैतानि भूतानि प्रणमेत् बहु मानयन्।
ईश्वरो जीवकलया प्रविष्टो भगवान् इति॥ (भागवतम् ३/२९/३४) इति।

अर्थात् सर्वेषां देहेषु भगवान् कलयानुस्यूतो विद्यते। नहि केवलान् मानवान्, कुक्कुर-चण्डाल-गर्दभान् अपि दण्डवत् प्रणमेन्मानवः।[१०] वस्तुतः- "देहो देवालयः प्रोक्तः स जीवः केवलः शिवः।" गीतायामपि गीतम्- "देहेस्मिन् पुरुषः परः" (१३/२२) इति। युक्त्यानया अस्पृश्यतायाः समाधानं (Untouchability) भविष्यति। तर्हि समाजे हीनो, दीनो, हेयः, अवज्ञेयः नाम मानवः कोऽपि स्थातुं नार्हति।

मनोर्नये, शूद्रस्य धर्मो हि सेवा। परं शूद्रो न कथमपि अवज्ञेयः परिचर्यायाः हीनकर्माभावात्। ये खलु जीवन्मुक्ताः, सर्वोच्चाः, ते हि सर्वोत्तमसेवकाः- सर्वभूतहिते रताः। दिङ्मात्रमुदाहरहणं यथा-युधिष्ठिरस्य राजसूययज्ञे श्रीकृष्णः

[९]The science of social Organisation, vol-I, p 162

[१०]भागवते ११/२९/३६)

सेवको बभूव। यिशुख्रीष्टो जन्मना सेवकः (The greatest among you he is that serveth)।

## ४. गुणानुसारिणी वर्णव्यवस्था

वर्णव्यवस्था परीक्ष्यते चेत् गीताया वचनमेतत् समर्थ्यते यच्चातुर्वर्ण्यं गुणकर्मानुसारमेव प्रवृत्तम्। ननु विभाजनस्य किं कारणम्, कश्चाधार इति चेदुच्यते- मानवेषु केचन नैसर्गिकाः सहजाः गुणदोषाः समुपलभ्यन्ते। तन्मूलकमेव प्रवृत्तिवैविध्यम्। प्रवृत्तिभेदाच्च वृत्तिभेदाः। वृत्तिभेदाच्च वर्णभेदाः। वर्णभेदाच्च क्रियाभिन्नत्वम्। तथाहि गीतायां भणितम्–

ब्राह्मणक्षत्रियविशां शूद्राणाञ्च परन्तप।
कर्माणि प्रविभक्तानि स्वभावप्रभवैर्गुणैः॥(१८/४१) इति।

प्रकृतेः गुणत्रयात्मकत्वात् प्रकृतिविकृतावपि गुणत्रयसमन्वयो निर्विवादः। ये सत्त्वगुणयुक्ता ज्ञानविज्ञानप्रवणाः ते ब्राह्मणाः। रजोगुणे प्रेरकत्वं क्रियाशीलत्वञ्च इति कृत्वा ये सत्त्वरजोमिश्रितास्ते क्षत्रियाः। ये च रजस्तमोमिश्रिताः ते वैश्याः। ये सर्वथा तमःप्रधानास्ते शूद्राः। एवं वैज्ञानिकदृष्ट्या वर्णव्यवस्थाया औचित्यं सुव्यवस्थितत्वं च चावगम्यते। नहि लोके किञ्चिद्वस्तु गुणत्रयव्यपेतम्। सर्वं त्रिगुणात्मकम्। तथाहि गीतायां गीतम्-

न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः।
सत्त्वं प्रकृतिजैर्मुक्तं यदेभिः स्यात्त्रिभिर्गुणैः॥(१८/४०) इति।

## ५. उपसंहारः

गुणकर्मानुसारं वर्णव्यवस्था प्रावर्तत। यः कश्चन तत्कर्म कुर्यात्, स तं वर्णमाश्रयेत्। स्वकर्मणा एव ब्राह्मणो वैश्यत्वं शूद्रत्वं चापद्यत। एवमेव सत्कर्माणि अनुरुध्य शूद्रः ब्राह्मणपदं प्राप्तुमर्हेत्। नहि कदापि भवितुमर्हति वर्णव्यवस्था जन्मानुसारिणी।[११] स्वभावजकर्माणि न कदापि कुर्याच्चेत् मनोरादेशास्तस्य कृते अतिकठोरः-

योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम्।
स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः॥(२/१६८)
न तिष्ठति तु यः पूर्वां नोपास्ते यश्च पश्चिमाम्।

---

[११]मनुस्मृतौ १०/६५

स शूद्रवत् बहिष्कार्यः सर्वस्माद् द्विजकर्मणः॥ (२/१०३) इति। आपस्तम्बधर्मसूत्रे विशदीक्रियते यद् धर्मचर्यया वर्णोत्कर्णं लभते, अधर्मचर्यया–च वर्णापकर्षम्।[१२] यद्वा भवतु, इयञ्च वर्णव्यवस्था समाजोन्नतिसाधिका लोकहितकारिणि वैज्ञानिकी चास्ति। जातिप्रथा नूनं दोषावहा कलङ्कास्पदं चेति शिवम्।

☆ ☆ ☆

## उपयुक्तग्रन्थसूची

१. वन्द्योपाध्यायः, मानवेन्दुः. (२०१२) मनुसंहिता. कलिकाता : संस्कृतपुस्तक भाण्डार।
२. दत्त, धीरेन्द्रनाथ. (१९७०) मनुर वर्णाश्रम. कलिकाता : यादवपुर विश्वविद्यालय।

[१२]आपस्तम्बधर्मसूत्रम् १.२

# शङ्करस्याद्वैतसिद्धान्ते निर्विकल्पसमाधिस्वीकृतिपर्यालोचनम्

पलाश-घोड़इः*

## ०. भूमिका

वेदान्तसाराद्यर्वाचीनाद्वैतप्रकरणग्रन्थेषु अद्वैतात्मतत्त्वज्ञानाय समाधेरुल्लेख आवश्यकता च सविस्तरं निगद्यते, परन्तु उपनिषत्सु शङ्कराचार्यकृतभाष्येषु च समाधिविषये तथोल्लेखो न दृश्यते, समाधेरावश्यकता च विस्तरेण नोच्यते। अतः प्रस्तुतेऽस्मिन् प्रबन्धे अद्वैतवेदान्तदृष्ट्या समाधेरावश्यकता विद्यते न वेति पर्यालोचयिष्यते। ज्ञानादेव तु कैवल्यमिति अद्वैतिनामविप्रतिपन्नो राद्धान्तः। तच्च ज्ञानं किं श्रवणमनननिदिध्यासनजन्यमाहोस्वित् समाधिजन्यमिति विषये शङ्का सुतरां सञ्जायते। निदिध्यासनजन्यं चेज्ज्ञानं[1] कैवल्याय समाधेरावश्यकता न स्यात्, समाधिजन्यं चेज्ज्ञानं निदिध्यासनस्यावश्यकता न स्यात्। अतः कैवल्यार्थं समाधिनिदिध्यासनयोः कतरः पक्षः अद्वैतिभिः समाद्रियत इति विचारपदवीमधिरोहति।

निरपेक्षतया विचार्यमाणे योगसम्प्रदायस्य प्रक्रियाविशेषो हि समाधिः सबीज-निर्बीजभेदेन द्विधा। सम्प्रज्ञातः असम्प्रज्ञातश्चेति तयोर्नामान्तरम्। अद्वैतवेदान्ते सविकल्पकत्वेन निर्विकल्पकत्वेन च तावभिधीयेते। योगसम्प्रदायोक्तः स समाधिः मुख्यतश्चित्तवृत्तिनिरोधपरः[2]। समापत्तिरित्यपि तस्याभिधानम्। उच्यते च पातञ्जलयोगसूत्रे– "ता एव सबीजः समाधिः" (योगसूत्रम् १.४६), "तस्यापि निरोधे सर्वनिरोधान्निर्बीजः समाधिः" (योगसूत्रम् १.५१) इति। किञ्च, "तत्र प्रत्ययैकतानता ध्यानम्" (योगसूत्रम् ३.२) इति चित्तैकाग्रतापरकं ध्यानमपि समाध्यङ्गत्वेन तत्र निगदितमिति स्मरणीयम्।

## १. उपनिषत्सु समाधिः

---

*शोधछात्रः, संस्कृतविभागे, रामकृष्णमिशन्-विवेकानन्दविश्वविद्यालयस्य, बेलुरमठस्थस्य पश्चिमवङ्गेषु – ७११२०२

[1]अद्वैतसिद्धान्ते आत्मस्वरूपं ज्ञानं जन्यं नास्ति, वस्तुतः अज्ञाननिवृत्तौ सत्यां स्वयम्प्रकाशस्य आत्मनः स्वरूपबोधो भवति। तेन अज्ञाननिवृत्तिरेवात्र ज्ञानपेदन विवक्ष्यते।

[2]योगश्चित्तवृत्तिनिरोधः(पातञ्जलयोगसूत्रम् १.२)

प्रसिद्धासु दशसु उपनिषत्सु[3] समाधिशब्दो नैव विद्यते। छान्दोग्योपनिषदि बृहदारण्यकोपनिषदि च समाहितशब्दे विद्यमानेऽपि तस्यार्थः समाधिशब्दार्थतो भिन्न एव। यथा छान्दोग्ये "तं चेद्ब्रूयुरस्मिंश्चेदिदं ब्रह्मपुरे सर्वं समाहितं सर्वाणि च भूतानि सर्वे च कामाः" (छा.८.१.४) इति, बृहदारण्यके च "तस्मादेवंविच्छान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वात्मन्येवात्मानं पश्यति" (बृह.उ ४.४.२३) इति च। बृहदारण्यकोपनिषदि आम्नातस्य समाहितशब्दस्य चित्तैकाग्रतायां तात्पर्यं, शान्तदान्तादिशब्दैः सह पठितत्वेन वेदान्ताधिकारिणः कृते विहितेषु साधनचतुष्केषु शमादिषट्सम्पत्तौ समाधानशब्देन तस्यान्तर्भावात्। समाहितशब्दस्य चित्तैकाग्रतारूपमर्थं निरूपयद्भिः शङ्करभगवत्पादैस्तत्र भाष्ये उच्यते– "समाहितः इन्द्रियान्तःकरणचलनरूपाद्यावृत्त्या ऐकाग्र्यरूपेण समाहितो भूत्वा" इति। कठोपनिषदि समाहितशब्दः साक्षान्नास्ति, किन्तु "नासमाहितः" (कठ १.२.२४) इति नञा सह समाहितशब्दो निगद्यते, तद्भाष्येऽपि शङ्करभगवत्पादैरुच्यते– "नापि असमाहितः अनेकाग्रमनाः विक्षिप्तचित्तः" इति। एतेनापि ज्ञायते यत् समाहितशब्दस्य एकाग्रतारूपोऽर्थो भाष्यकारसम्मतः।

## २. ब्रह्मसूत्रभाष्ये समाधिः

शङ्करभगवत्पादैः समाधिविषये विस्तरेण कुत्रापि नोक्तम्, समाधिशब्दोऽपि तदीयभाष्येषु क्वचिदेव दृश्यते। ब्रह्मसूत्रभाष्ये समाधिशब्दो त्रिः प्रयुक्तो दृश्यते। प्रथमतः २.१.९-सूत्रभाष्ये तेनोच्यते- "सुषुप्तिसमाध्यादावपि सत्यां स्वाभाविक्यामविभागप्राप्तौ मिथ्याज्ञानस्यानपोदितत्वात् पूर्ववत् पुनः प्रबोधे विभागो भवति" इति। अस्यार्थः– सुषुप्तौ समाधौ च भेदप्रतीतेः स्वल्पकालिकबाधे सति अभेदप्राप्तिर्भवति चेदपि मिथ्याज्ञानस्य अनिराकृतत्वात् सुषुप्तितः समाधितश्च व्युत्थिते सति मिथ्याज्ञानस्य अनुवर्तनाद् द्वैतप्रतीतिर्भवत्येव। एतेन स्पष्टं यत् शङ्करमते मिथ्याज्ञानं केवलं ज्ञाननाश्यं, तत् समाधिना न नाशयितुं शक्यते। अतो ज्ञानं समाधिजन्यं नास्तीति फलतो लभ्यते। किञ्च, प्रायः समानमेव वाक्यं भाष्यकारैरुच्यते गीताभाष्येषु– "न च देहाद्यात्मप्रत्ययभ्रान्तिसन्तानविच्छेदेषु सुषुप्तिसमाध्यादिषु कर्तृत्वभोक्तृत्वाद्यनर्थ उपलभ्यते"[4] इति। एतेनापि ज्ञायते

---

[3]यासामुपनिषदां भाष्यं शङ्करभगवत्पादैः कृतमिति प्रसिद्धिः। ता हि- ईश-केन-कठ-प्रश्न-मुण्डक-माण्डूक्य-तैत्तिरीय-ऐतरेय-छान्दोग्य-वृदहारण्यकनामकाः।

[4]श्रीमद्भगवद्गीतायां १८.६६-श्लोकस्य शाङ्करभाष्यम्

यत् समाधिकाले देहाद्यात्मप्रत्ययभ्रान्तिसन्तानविच्छेदो भवति, न तु भ्रान्तिसन्तानध्वंसः। एतेन कर्तृत्वभोक्तृत्वादिकं तत्र तिष्ठदपि नोपलभ्यते। कर्तृत्वभोक्तृत्वादिकं तु तत्र न नाशमेति। केचिद् ब्रूयुः यदत्र समाधिशब्देन सविकल्पसमाधिरेव भाष्यकारेणाभिप्रेतो, न तु निर्विकल्पसमाधिरिति। अत्र ब्रूमः, शङ्करभगवत्पादैस्तथा नामनिर्देशेन नोक्तमिति कारणात् सविकल्पसमाधिरेव भाष्यकाराभिप्रेत इति वक्तुं नैव शक्यते। किञ्च, "सुषुप्तिसमाध्यादावपि सत्यां स्वाभाविक्यामविभागप्राप्तौ" इति भाष्ये अविभागप्राप्तिकथनादपि ज्ञायते यदत्र निर्विकल्पसमाधिरेव भाष्यकाराभिप्रेत इति। तथाहि सविकल्पसमाधौ तु ज्ञातृज्ञानज्ञेयरूपत्रिपुटिसद्भावो विद्यते इति कारणाद् अविभागप्राप्तिर्नैव भवति। निर्विकल्पसमाधावेव ज्ञातृज्ञानज्ञेयभेदो न विद्यते इति कारणाद् अविभागप्राप्तिर्भवतीत्यतो निर्विकल्पसमाधिरेव भाष्यकाराभिप्रेत इति वक्तुं युक्तम्। ब्रह्मसूत्रे पुनरेकत्र प्रसङ्गान्तरेण समाधिविषयः समुल्लिखितः। तथाहि बादरायणकृतं सूत्रं "समाध्यभावाच्च" (२.३.३९) इति। असत्यात्मनः कर्तृत्वे समाधिशास्त्रमनर्थकं भवति, ततश्च तत्सार्थक्यायात्मनः कर्तृत्वं वाच्यमेवेति "समाध्यभावाच्च" सूत्रे निगद्यते। तदेव मतं समर्थयद्भिः २.३.४० सूत्रभाष्ये शङ्करभगवत्पादैः पुनरुच्यते– "समाध्यभावस्तु शास्त्रार्थवत्त्वेनैव परिहृतः, यथाप्राप्तमेव कर्तृत्वमुपादाय समाधिविधानात्" इति।

यद्यपि समाधिविषये अधिकसमादरः शङ्करभगवत्पादैर्नैव प्रदर्शितस्तथापि क्वचित् समाधिरपि आत्मज्ञानसाधनत्वेन स्वीकृतः। तथाहि– "समाध्यभावाच्च" (२.३.३९) इति सूत्रस्य भाष्ये भगवत्पादैरुच्यते– "योऽप्ययमौपनिषदात्मप्रतिपत्तिप्रयोजनः समाधिरुपदिष्टो वेदान्तेषु– 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' (बृह.उ. २-४-५), 'सोऽन्वेष्टव्यः स विजिज्ञासितव्यः' 'ओमित्येवं ध्यायथ आत्मानम्' (मुण्डक २.२.६) इत्येवंलक्षणः"[5] एतद्भाष्यवाक्यपर्यालोचनेन विषयद्वयं स्फुटमुपलभ्यते। प्रथमतः शङ्करभगवत्पाद आत्मज्ञानसाधनत्वेन समाधिं

[5]यद्यपि शङ्कराचार्यैः साक्षात्कुत्रापि श्रवणादिपदानां योगशास्त्रोक्तधारणादिभिः सम्बन्धविषये नोक्तं तथापि अस्मिन् सूत्रभाष्ये (२.३.३९) भामतीकारैस्तद्विषये उच्यते- "समाधिरिति संयममुपलक्षयति। धारणाध्यानसमाधयो हि संयमपदवेदनीयाः। यथाहुः "त्रयमेकत्र संयमः" इति। अत्र श्रोतव्यो मन्तव्य इति धारणोपदेशः। निदिध्यासितव्य इति ध्यानोपदेशः। द्रष्टव्य इति समाधेरुपदेशः। यथाहुः "तदेव ध्यानमर्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः" इति" इति। इति।

समुल्लिलेख "औपनिषदात्मप्रतिपत्तिप्रयोजनः समाधिः" इति कथनाद्। अत्र समाधिरात्मज्ञानाय आवश्यक इत्यर्थोऽपि लभ्यते। द्वितीयतो निदिध्यासनपदेन ध्यानपदेन च भाष्यकारः समाधिमेव स्वीचकार[६]। तेन निदिध्यासनसमाध्योः समानार्थकत्वाद् आत्मज्ञानं निदिध्यासनजन्यमर्थात् समाधिजन्यमित्येव स्वीकर्तव्यम्। किञ्च, "सुप्रशान्तः सकृज्ज्योतिः समाधिरचलोऽभयः" (३.३७) इति माण्डूक्यकारिकोक्तसमाधिपदस्य व्याख्यानवेलायां भाष्यकारेण द्विविधा व्युत्पत्तिः प्रदर्शिता– "समाधिः समाधिनिमित्तप्रज्ञावगम्यत्वात्; समाधीयते अस्मिन्निति वा समाधिः" इति। प्रथमव्युत्पत्तौ समाधितः प्रज्ञा उत्पद्यते इति शङ्करभगवत्पादैः स्वीकाराद् अद्वैतवेदान्तदृष्ट्यापि ज्ञाननिमित्तं समाधिरिति स्वीकरणीयमेव। एतद्भाष्यवाक्यादपि निश्चेतुं शक्यते यद् आत्मज्ञानं समाधिजन्यमेवेति, अथवा चित्तैकाग्रतारूपः समाधिः आत्मज्ञाने न साक्षात् किन्तु परम्परया चित्तशुद्धिद्वारेण साधनभूत इत्यपि भाष्यवाक्यार्थः कर्तुं शक्यते।

## ३. भगवद्गीताभाष्ये समाधिः

श्रीमद्भगवद्गीतासु समाधिशब्दो भूयो दृश्यते। अतो गीताभाष्ये अद्वैताचार्यप्रमुखैः श्रीशङ्करभगवत्पादैः समाधिविषये किमुच्यत इतीदानीं पश्यामः। "व्यवसायात्मिका बुद्धिः समाधौ न विधीयते" (भ.गी.२.४४) इत्यत्र समाधिशब्दार्थविषये उच्यते भाष्यकारैः- "समाधौ समाधीयते अस्मिन् पुरुषोपभोगाय सर्वमिति समाधिः अन्तःकरणं बुद्धिः तस्मिन् समाधौ" इति।

श्रुतिविप्रतिपन्ना ते यदा स्थास्यति निश्चला।
समाधावचला बुद्धिस्तदा योगमवाप्स्यसि॥ (भ.गी.२.५३)

इत्यत्र शङ्करभगवत्पादः समाधौ इति पदस्यार्थं निगदति आत्मनीति। तथाहि भाष्यं– "समाधौ समाधीयते चित्तमस्मिन्निति समाधिः आत्मा, तस्मिन् आत्मनि इत्येतत्" इति। किञ्च, भाष्यकारैः श्लोकस्थस्य योगपदस्यार्थः समाधिरिति उच्यते– "योगम् अवाप्स्यसि विवेकप्रज्ञां समाधिं प्राप्स्यसि" इति। अतः समाध्यर्थे योगपदं भाष्यकारैः क्वचित् प्रयुक्तमिति ज्ञेयम्। "तत्स्वयं योगसंसिद्धः" (भ.गी. ४.३८) इत्यत्र भाष्यकारः योगसंसिद्ध इति पदस्यार्थविषये कथयति– "तज् ज्ञानं स्वयमेव

---

[६]बृहदारण्यकभाष्यवार्तिके तु निदिध्यासनशब्देन सम्यग्ज्ञानम् अपरायत्तवोधश्च निगद्येते। तथाहि वार्तिकं- निदिध्यासनशब्देन सम्यग्ज्ञानं विवक्षितम् (१.४.८९९) इति, अपरायत्तबोधोऽत्र निदिध्यासनमुच्यते (२.४.२१७) इति च।

योगसंसिद्धः योगेन कर्मयोगेन समाधियोगेन च संसिद्धः संस्कृतः योग्यताम् आपन्नः सन् मुमुक्षुः कालेन महता आत्मनि विन्दति लभते इत्यर्थः" इति। एतस्माद् भाष्यकारस्याभिप्रायः स्पष्टो यत् समाधिः साक्षान्न ज्ञानकारणं किन्तु चित्तशुद्धिद्वारा आत्मज्ञानकारणम्। तस्मादेव भाष्यकारेणोच्यते यत् समाधियोगेन संस्कृतान्तःकरणः मुमुक्षुः कालेन आत्मज्ञानं लभते इति। "ब्रह्मयोगयुक्तात्मा" (भ.गी.५.२१) इत्यत्र योगपदस्यार्थः समाधिरिति, युक्तपदस्यार्थः समाहित इति निगद्यते भाष्यकारैः। तथाहि– "ब्रह्मयोगयुक्तात्मा ब्रह्मणि योगः समाधिः ब्रह्मयोगः तेन ब्रह्मयोगेन युक्तः समाहितः तस्मिन् व्यापृत आत्मा अन्तःकरणं यस्य स ब्रह्मयोगयुक्तात्मा" इति। अतो योगशब्दस्य समाध्यर्थः, चित्तैकाग्रतारूपश्च अर्थः भाष्यकारसम्मत इति ज्ञायते। "यत्र चैवात्मनात्मानं पश्यन्नात्मनि तुष्यति" (भ.गी.६.२०) इत्यस्य भाष्ये उच्यते- "यत्र चैव यस्मिंश्च काले आत्मना समाधिपरिशुद्धेन अन्तःकरणेन आत्मानं परं चैतन्यं ज्योतिःस्वरूपं पश्यन् उपलभमानः स्वे एव आत्मनि तुष्यति तुष्टिं भजते" इति। एतस्माज्ज्ञायते यत् समाधिना अन्तःकरणपरिशुद्धिर्भवतीति। "अनन्येनैव योगेन मां ध्यायन्त उपासते" (भ.गी.१२.६) इत्यत्रापि योगशब्दार्थः समाधिरिति निगद्यते। "तानि सर्वाणि संयम्य युक्त आसीत मत्परः" (भ.गी.२.६१) इत्यस्य भाष्ये उच्यते भाष्यकारैः - "तानि सर्वाणि संयम्य संयमनं वशीकरणं कृत्वा युक्तः समाहितः सन् आसीत मत्परः अहं वासुदेवः सर्वप्रत्यगात्मा परो यस्य स मत्परः" इति। अत्र भाष्यकारेण युक्तपदस्यार्थो विहितः समाहितः सन् इति। वस्तुतः समाहितपदेन आत्मनि एकाग्रचित्तता एव निर्दिश्यते तेन। अन्यत्रापि समाधिपदेन चित्तैकाग्रतैव निगदिता भाष्यकारैः।

योगः अन्तःकरणशुद्धिं जनयतीत्यत्र गीतावचनं प्रमाणम्। तथाहि- "उपविश्यासने युञ्ज्याद्योगमात्मविशुद्धये" (भ.गी.६.१२) इत्यस्यार्थ उच्यते भाष्यकारेण- "स किमर्थं योगं युञ्ज्याद् इत्याह– आत्मविशुद्धये अन्तःकरणस्य विशुद्ध्यर्थमित्येतत्" इति। "मनः संयम्य मच्चित्तो युक्त आसीत मत्परः" (भ.गी. ६.१४) इत्यस्य भाष्ये उच्यते– "मनः संयम्य मनसः वृत्तीः उपसंहृत्य इत्येतत्, मच्चित्तः मयि परमेश्वरे चित्तं यस्य सोऽयं मच्चित्तः, युक्तः समाहितः सन् आसीत उपविशेत्" इति। अतो गीताभाष्ये भगवत्पादैः योगस्य समाधेर्वा अन्तःकरणशुद्धिद्वारा आत्मज्ञानप्रापकत्वमुच्यते इति स्पष्टम्।

यद्यपि शङ्करभगवत्पादैः गीताभाष्ये कुत्रापि समाधिः साक्षादात्मज्ञानसाधनत्वेन नोक्तस्तथापि षष्ठाध्याये मोक्षसाधनत्वेन योगस्यापि स्वीकरणात् समाधिरपि आत्मज्ञानप्रापक इति स्वीकृतमेव। तथाहि षष्ठाध्यायारम्भे "ध्यानयोगस्य सम्यग्दर्शनं प्रति अन्तरङ्गस्य" इति वचनेन ध्यानयोगः सम्यग्दर्शनं प्रति अन्तरङ्ग इति तेनाङ्गीकारि। किञ्च,

युञ्जन्नेवं सदात्मानं योगी नियतमानसः।
शान्तिं निर्वाणपरमां मत्संस्थामधिगच्छति॥ (भ.गी.६.१५)
यत्रोपरमते चित्तं निरुद्धं योगसेवया।
यत्र चैवात्मनात्मानं पश्यन्नात्मनि तुष्यति॥(भ.गी.६.२०)
प्रशान्तमनसं ह्येनं योगिनं सुखमुत्तमम्।
उपैति शान्तरजसं ब्रह्मभूतमकल्मषम्॥ (भ.गी.६.२७)
सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि।
ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः॥ (भ.गी.६.२९)

इत्यादिगीताश्लोकतो ज्ञायते यद् योगयुक्तः सन् योगी अपि निरतिशयानन्दस्वरूपमात्मानमनुभवति। अतः पातञ्जलयोगोक्ते निर्विकल्पसमाधौ योगी परमात्मना एकीभावमापद्य अकल्मषं ब्रह्म उपैतीति साक्षाद् भगवद्गीतातो लभ्यते। तेन योगोक्तो निर्विकल्पसमाधिरपि सम्यग्दर्शनकारणमिति स्वीकर्तव्यमेव। यद्यपि शङ्करभगवत्पादैरेतद्विषये स्पष्टतया किमपि नोक्तं तथापि मन्मते एतस्मादेव कारणात् निदिध्यासनम् अतिरिच्यापि ज्ञानसाधनत्वेन समाधिः स्वीक्रियत अद्वैतिभिः। अन्यथा केवलम् उपनिषदाधारेण समाधिरपि ज्ञानसाधनत्वेन स्वीकर्तुं न युज्यते।

प्रसङ्गेऽस्मिन् योगस्य परमार्थप्रापकत्वेन प्रामाण्यमस्ति न वेति विषये अद्वैतिनां मतं ज्ञेयम्। "एतेन योगः प्रत्युक्तः" (२.१.३) इति बादरायणकृतब्रह्मसूत्रभाष्ये शङ्करभगवत्पादैरुच्यते यत् श्रुतिषु सहस्रशो योगविषयकलिङ्गेषु सत्स्वपि सम्प्रदायगतयोगे श्रुतिविरुद्धानां पुरुषबहुत्वादिद्वैततत्त्वानां विराजमानत्वाद् सांख्यवद् योगोऽपि न सम्यग्दर्शनाभ्युपायः; न हि वेदनिरपेक्षेण योगमार्गेण निःश्रेयमधिगम्यते; तत्त्वज्ञानं तु वेदान्तवाक्येभ्य एव भवतीति[७]। एतेन ज्ञायते

[७]२.१.३-ब्रह्मसूत्रस्य शाङ्करभाष्यम्- "एतेन सांख्यस्मृतिप्रत्याख्यानेन, योगस्मृतिरपि प्रत्याख्याता द्रष्टव्येत्यतिदिशति।... सतीष्वप्यध्यात्मविषयासु बह्वीषु स्मृतिषु सांख्ययोगस्मृत्योरेव निराकरणे यत्नः कृतः; सांख्ययोगौ हि परमपुरुषार्थसाधनत्वेन लोके प्रख्यातौ, शिष्टैश्च परिगृहीतौ,

यच्छङ्करमते योगो न स्वतन्त्रतया सम्यग्दर्शनकारणं, किन्तु चित्तशुद्धिद्वारा ज्ञानोपकारकः; तत्त्वज्ञानं तु समाधिपरिशुद्धेऽन्तःकरणे वेदान्तवाक्येभ्य एव भवति।

## ४. अद्वैतवेदान्तस्य प्रकरणग्रन्थेषु समाधिविचारः

शङ्करभगवत्पादैरेव तदीयभाष्येषु क्वचिज्ज्ञानोपकारकत्वेन समाधिर्योगो वा स्वीकृत इति कारणात् परवर्तिकालिकैरद्वैताचार्यैरपि समाधिर्ज्ञानसाधनत्वेन स्वीकृत इति भाति। यद्यपि शङ्करभगवत्पादोऽन्तःकरणशुद्ध्यर्थं चित्तैकाग्रतारूपं समाधिं स्वीचकार, परवर्तिकालिकास्त्वाचार्या न केवलमन्तःकरणशुद्ध्यर्थं समाधिं स्वीचक्रुः, निर्विकल्पसमाधिलाभ एवाद्वैतवेदान्तसाधनस्य लक्ष्यभूत इति निर्धारितवन्तः, योगिज्ञानिनोश्चाभेदं स्वीकृतवन्तः। इदानीमद्वैतवेदान्तस्य प्रकरणग्रन्थेषु समाधिस्वीकारविषये किमुच्यते तत् संक्षेपेण पर्यालोचयिष्यते।

अद्वैतवेदान्तस्य प्रकरणग्रन्थरूपेण प्रसिद्धायां शङ्करभगवत्पादकृतायाम् उपदेशसाहस्र्यां समाधिशब्दो वारत्रयं[८] प्रयुक्तः, स शब्दस्तु चित्तैकाग्रतापर एव। किञ्च, अत्र समाधिविषये तथा विचारो नास्ति। धर्मराजाध्वरीन्द्रविरचिते वेदान्तपरिभाषाभिधेये अद्वैतवेदान्तप्रकरणग्रन्थे

---

लिङ्गेन च श्रौतेनोपबृंहितौ– ‘तत्कारणं सांख्ययोगाभिपन्नं ज्ञात्वा देवं मुच्यते सर्वपाशैः’ (श्वे. उ. ६-१३) इति; निराकरणं तु– न सांख्यज्ञानेन वेदनिरपेक्षेण योगमार्गेण वा निःश्रेयसमधिगम्यत इति; श्रुतिर्हि वैदिकादात्मैकत्वविज्ञानादन्यन्निःश्रेयससाधनं वारयति– ‘तमेव विदित्वाति मृत्युमेति नान्यः पन्था विद्यतेऽयनाय’ (श्वे.उ. ३.८) इति; द्वैतिनो हि ते सांख्या योगाश्च नात्मैकत्वदर्शिनः। यत्तु दर्शनमुक्तम् ‘तत्कारणं सांख्ययोगाभिपन्नम्’ इति, वैदिकमेव तत्र ज्ञानं ध्यानं च सांख्ययोगशब्दाभ्यामभिलप्येते प्रत्यासत्तेरित्यवगन्तव्यम्। येन त्वंशेन न विरुध्येते, तेनेष्टमेव सांख्ययोगस्मृत्योः सावकाशत्वम्; तद्यथा– ‘असङ्गो ह्ययं पुरुषः’ (बृ.उ. ४.३.१६) इत्येवमादिश्रुतिप्रसिद्धमेव पुरुषस्य विशुद्धत्वं निर्गुणपुरुषनिरूपणेन सांख्यैरभ्युपगम्यते; तथा यौगैरपि ‘अथ परिव्राड्विवर्णवासा मुण्डोऽपरिग्रहः’ (जाबाल.उ.५) इत्येवमादि श्रुतिप्रसिद्धमेव निवृत्तिनिष्ठत्वं प्रव्रज्याद्युपदेशेनानुगम्यते। एतेन सर्वाणि तर्कस्मरणानि प्रतिवक्तव्यानि ; तान्यपि तर्कोपपत्तिभ्यां तत्त्वज्ञानायोपकुर्वन्तीति चेत्, उपकुर्वन्तु नाम; तत्त्वज्ञानं तु वेदान्तवाक्येभ्य एव भवति–‘नावेदविन्मनुते तं बृहन्तम्’ (तै.ब्रा. ३.१२.९.७) ‘तं त्वौपनिषदं पुरुषं पृच्छामि’ (बृ.उ. ३.९.२६) इत्येवमादिश्रुतिभ्यः।”

[८]‘विक्षेपो नास्ति तस्मान्मे न समाधिस्ततो मम। विक्षेपो वा समाधिर्वा मनसः स्याद्विकारिणः॥(१३.१४) समाधिर्वाऽसमाधिर्वा कार्यं चान्यत्कुतो भवेत्। मां हि ध्यात्वा च बुद्ध्वा च मन्यन्ते कृतकृत्यताम्॥ (१३.१७) असमाधिं न पश्यामि निर्विकारस्य सर्वदा। ब्रह्मणो मे विशुद्धस्य शोध्यं नान्यद्विपाप्मनः॥ (१४.३५)

ब्रह्मज्ञानसाधनत्वेन समाधिर्नैवोपदिष्टः। तत्र समाधेरुल्लेख एव नास्ति। श्रवणमनननिदिध्यासनान्येव केवलानि ब्रह्मसाक्षात्कारहेतुत्वेन तत्र निगदितानि। तत्र "निदिध्यासनं नाम अनादिदुर्वासनया विषयेष्वाकृष्यमाणचित्तस्य विषयेभ्योऽपकृष्यात्मविषयकस्थैर्यानुकूलो मानसो व्यापारः" इति निदिध्यासलक्षणं निगद्यते। निदिध्यासनस्य समर्थनपरा बृहदारण्यकश्रुतिस्तत्रोदाह्रियते– "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" (बृह.उ.२.२.४) इति। किञ्च, "निदिध्यासनं ब्रह्मसाक्षात्कारे साक्षात्कारणम्" इति निगदता वेदान्तपरिभाषाकृता तत्समर्थकत्वेन "ते ध्यानयोगानुगता अपश्यन् देवात्मशक्तिं स्वगुणैर्निगुढाम्" (श्वेता.उ.१.३) इति श्वेताश्वतरश्रुतिरुदाजह्रे। अतो ब्रह्मसाक्षात्कारसाधनत्वेन समाधिमनुल्लिखता वेदान्तपरिभाषाकृता धर्मराजाध्वरीन्द्रेण समाधिः ब्रह्मसाक्षात्कारसाधनत्वेन न स्वीक्रियत इति ज्ञेयमथवा एकाग्रतालक्षणसामान्यात् निदिध्यासनसमाध्योरभेदस्तेन स्वीकृत इति ऊरीकार्यम्।

सदानन्दयोगीन्द्रेण तु तत्कृतवेदान्तसारग्रन्थे निदिध्यासनात् समाधिं पृथक् मन्यमानेन निदिध्यासनात् परमपि समाधिः ब्रह्मसाक्षात्कारसाधनत्वेन स्वीचक्रे। उच्यते तेन– "एवं स्वरूपचैतन्यसाक्षात्कारपर्यन्तं श्रवण-मनननिदिध्यासनसमाध्यनुष्ठानस्यापेक्षितत्वात् तेऽपि प्रदर्श्यन्ते" इति।

मननलक्षणादनन्तरं "विजातीयदेहादिप्रत्ययरहिताद्वितीयवस्तुसजातीयप्रत्यय-प्रवाहो निदिध्यासनम्" इति निदिध्यासनलक्षणं निगद्य स समाधिलक्षणमनुक्त्वैव तद्भेदं समुद्धरति– "समाधिर्द्विविधः सविकल्पको निर्विकल्पकश्चेति" इति। द्विविधसमाधिविषये तेनोच्यते– "तत्र सविकल्पको नाम ज्ञातृज्ञानादि-विकल्पलयानपेक्षया अद्वितीयवस्तुनि तदाकाराकारितायाश्चित्तवृत्तेः अवस्थानम्। तदा मृन्मयगजादिभानेऽपि मृद्भानवद् द्वैतभानेऽपि अद्वैतं वस्तु भासते।...निर्विकल्पकस्तु ज्ञातृज्ञानादिविकल्पलयापेक्षया अद्वितीयवस्तुनि तदाकाराकारितायाश्चित्तवृत्तेरतितरामेकीभावेनावस्थानम्। तदा तु जलाकारा-कारितलवणाभासेन जलमात्रावभासवद् अद्वितीयत्वाकाराकारितचित्तवृत्त्य-नवभासेन अद्वितीयवस्तुमात्रमवभासते" इति। अत्र निदिध्यासनात् सविकल्पकनिर्विकल्पकसमाध्योः पार्थक्यं तथा न स्फुटम्। निदिध्यासनलक्षणे अद्वितीयवस्तुसजातीयप्रत्ययपदेन ज्ञातृज्ञानादिविकल्पवृत्तिसद्भावे स्वीक्रियमाणे तत्रैव सविकल्पकसमाधिरन्तर्भवति, ज्ञातृज्ञानादिविकल्पवृत्त्यसद्भावे स्वीक्रियमाणे निर्विकल्पसमाधिस्तत्रान्तर्भवति। अतो ब्रह्मसाक्षात्कारसाधनत्वेन पृथक्तया

समाधिस्वीकारस्य तथा प्रयोजनं हेतुर्वा नास्तीति प्रतीयते।[१]

विद्यारण्यस्वामिकृतायां पञ्चदश्यां समाधिविषये यदुच्यते तस्मादिदं भाति यन्निदिध्यासनपदेन तत्र ध्यानं सविकल्पसमाधिश्च, समाधिपदेन च निर्विकल्पकसमाधिरित्यभिधीयेते। तथाहि प्रथमं निदिध्यासनलक्षणमुच्यते–

ताभ्यां निर्विचिकित्सेऽर्थे चेतसः स्थापितस्य यत्।
एकतानत्वमेतद्धि निदिध्यासनमुच्यते॥ (१.५४) इति।

अस्यार्थः– श्रवणमननाभ्यां दूरीभूते संशये संशयरहिते आत्मनि मनसो यदेकाकारवृत्तिप्रवाहवत्त्वं तन्निदिध्यासनमुच्यते इति। अस्य श्लोकस्य रामकृष्णटीकायामुच्यते– "ताभ्यां श्रवणमननाभ्यां निर्विचिकित्से... विषये स्थापितस्य धारणावतश्चेतसो देशसम्बन्धश्चित्तस्य धारणेति पतञ्जलिनोक्तत्वाद् यदेकतानत्वम् एकाकारवृत्तिप्रवाहवत्त्वम् एतन्निदिध्यासनमुच्यते, हि प्रसिद्धं योगशास्त्रे तत्प्रत्ययैकतानता ध्यानमिति" इति। एतेन स्पष्टं यद् रामकृष्णटीकामते योगसम्प्रदायोक्तं ध्यानमेव अद्वैतवेदान्तोक्तं निदिध्यासनम्। पञ्चदश्यां निदिध्यासनलक्षणादनन्तरं समाधिलक्षणं निगद्यते–

ध्यातृध्याने परित्यज्य क्रमाद् ध्येयैकगोचरम्।
निवातदीपवच्चित्तं समाधिरभिधीयते॥ (१.५५) इति।

रामकृष्णटीकायामुच्यते- "तस्यैव निदिध्यासनस्य परिपाकदशारूपं समाधिमाह धातृध्याने इति। निदिध्यासने तावद्ध्याता ध्यानं ध्येयञ्च इति त्रितयं भासते, तत्र यदा चित्तमभ्यासवशेन ध्यातृध्याने ध्यातारं ध्यानं च क्रमात् परित्यज्य

---

[१]सदानन्दयोगीन्द्रः, वेदान्तसारः, अनुवादको व्याख्याता च विपद्भञ्जनपालः, कलकाता, संस्कृत-पुस्तक-भाण्डार, २०१३। पृष्ठम्-२४३। "विवरणकारस्तु निदिध्यासनात् परमपि महावाक्यविज्ञानाद् विनष्टायाम् अविद्यायां ब्रह्मसाक्षात्कारः सम्भवतीति निजगाद। विवरणकारमते- "प्रमाणगतासम्भावना श्रवणनिवर्त्या प्रमेयगतासम्भावना तु मनननिवर्त्या। तदनन्तरमपि विपरीतभावना तिष्ठत्येव। सा निदिध्यासनेन निराक्रियते। तदनन्तरं पुनरपि महावाक्यमनुसन्धीयमानमविद्योन्मूलनसमर्थमन्तःकरणवृत्तिभेदरूपं मुक्तिफलकं साक्षात्कारमुत्पादयति" इति"- इति विपद्भञ्जलपालेन पुस्तकेऽस्मिन् निदिध्यासनविचारवेलायां पादटीकायाम् समुद्धृतम्। मया तु पञ्चपादिकाविवरणमन्विष्यापि नैतादृशं किमपि प्राप्तम् अतस्तद्विषये आलोचनं नैवात्र विहितम्। मन्मते विवरणकारमते शाब्दापरोक्षस्वीकारात्तत्त्वमस्यादिमहावाक्यादेव तत्त्वज्ञाने सम्पन्ने सति तन्मतेऽपि श्रवणमनननिदिध्यासनानन्तरं समाधिस्वीकारस्य प्रयोजनं नास्त्येव। किञ्च, विवरणकारमते श्रवणं प्रधानं ज्ञानं प्रति साक्षात्कारणत्वात्, मनननिदिध्यासने त्वङ्गभूते ब्रह्मसाक्षात्कारं प्रत्यारादुपकारके। अतो विवरणदृष्ट्यापि श्रवणस्य साक्षात्कारणत्वेन समाधेरारादुपकारकत्वमेव।

ध्येयैकगोचरं ध्येयमेकमेव गोचरो विषयो यस्य तत्तथाविधं भवति तदा समाधिरित्युच्यते" इति। पञ्चदशीकारमते अनेनैव (निर्विकल्प-)समाधिना वासनाजाले निःशेषं प्रविलापिते पुण्यपापाख्ये कर्मसञ्चये च समूलोन्मूलिते तत्त्वमस्यादिमहावाक्यम् अपरोक्षं ज्ञानं प्रसूते[१०]। एतेन श्रवणमननिदिध्यासनात् समाधेश्च परं तत्त्वमस्यादिवाक्यतोऽपरोक्षज्ञानं भवतीति पञ्चदशीकारमतं लभ्यते।

विद्यारण्यस्वामिना ध्यानदीपप्रकरणे पुनः योगविषये भिन्नमतं समुपन्यासि। तन्मते अशुद्धचित्तेनैव योगाभ्यासः करणीयो, योगेन चित्तशुद्धौ सत्यां विचारेण मुक्तिराशु लभ्यते। तथाहि–

बहुव्याकुलितचित्तानां विचारात् तत्त्वधीर्न हि।
योगो मुख्यस्ततस्तेषां धीदर्पस्तेन नश्यति॥
अव्याकुलधियां मोहमात्रेणाच्छादितात्मनाम्।
सांख्यनामा विचारः स्यान्मुख्यो झटिति सिद्धिदः॥ (पञ्चदशी ९.१३२-१३३) इति।

अस्यार्थः (वामनशास्त्रिकृतायाम् अद्वैतब्रह्मसिद्धिटीकायां)– "अयमत्र निष्कृष्टोऽर्थः– विषयव्यग्रबुद्धीनां योगाभ्यासेन बुद्धिस्थैर्यं भवति, स्थिरायां तस्यां विचारेण ज्ञानमुत्पद्यते। अतो बुद्धिस्थैर्याय एव योगो, न ज्ञानाय। तत्तु वेदान्तविचारादिनैव भवति"[११] इति। एतेन लभ्यते यच्चित्तैकाग्रतायै योगाभ्यासो नाम समाध्यभ्यासो, न तु ज्ञानाय। एकाग्रे चेतसि वेदान्तवाक्यविचारेण तत्त्वज्ञानं भवति।

अतः समाधिविषये पञ्चदशीकारस्य मतद्वयं लभ्यते। एतस्मादनुमातुं शक्यते यद् यद्यपि तेन कदाचिद् योगरूपसमाधिना अखिलकर्मनाशस्ततश्च तत्त्वमस्यादिवाक्यादात्मज्ञानं भवतीति स्वीक्रियते, तथापि क्वचिद् योगस्य चित्तैकाग्रता एव फलं, ज्ञानं तु विचारेणैव भवतीत्यपि स्वीक्रियते।

विवेकचूडामणौ[१२] समाधिविषये विस्तरेणालोचनं परिदृश्यते। तदत्र

---

[१०]वाक्यमप्रतिबद्धं सत् प्राक्परोक्षावभासिते।
करामलकवद्बोधमपरोक्षं प्रसूयते॥ (पञ्चदशी १.६१)

[११]सदानन्दयोगीन्द्रः, वेदान्तसारः, अनुवादकः सम्पादकश्च विपदभञ्जनपालः, कलकाता, संस्कृतपुस्कतभाण्डार, २०१३, पृष्ठा २५०।

[१२]शङ्कराचार्यः, विवेकचूडामणिः, अनुवादकः व्याख्याता च स्वामी लोकेश्वरानन्दः, द्वितीयसंस्करणम्, प्रणति पावलिशिं हाउस, कलकाता, २००८। अस्मात्पुस्तकात् मया पाठः

समासेन पर्यालोच्योपस्थाप्यते। विवेकचूडामणावुच्यते– मोक्षाय प्रथमतः शमदमतितिक्षाद्यभ्यासः करणीयः, ततः कर्मत्यागः। तत आत्मतत्त्वस्य श्रवण-मनन-निदिध्यासनानि, ततश्च अविकल्पं परं ब्रह्म प्राप्य परं सुखमधिगच्छति विद्वान्। अर्थान्निदिध्यासनानन्तरं निर्विकल्पं परं ब्रह्माधिगम्यते, न तु मोक्षाय समाधिरत्र पृथक्तया विधीयते। तथाहि–

मोक्षस्य हेतुः प्रथमो निगद्यते
वैराग्यमत्यन्तमनित्यवस्तुषु।
ततः शमश्चापि दमस्तितिक्षा
न्यासः प्रसक्ताखिलकर्मणां भृशम्॥
ततः श्रुतिस्तन्मननं सतत्त्व
ध्यानं चिरं नित्यनिरन्तरं मुनेः।
ततोऽविकल्पं परमेत्य विद्वान्
इहैव निर्वाणसुखं समृच्छति॥ (विवेकचूडामणिः ६९-७०) इति।

परन्तु ३४१-श्लोके उच्यते यत् "शान्तो दान्तः" इति श्रुतिः कृतवेदान्तवाक्यश्रवणस्य कृते समाधिं विदधाति। तथाहि–

सर्वात्मसिद्धये भिक्षोः कृतश्रवणकर्मणः।
समाधिं विदधात्येषा शान्तो दान्त इति श्रुतिः॥ इति।

किञ्च, अहङ्कारस्य विनाशस्तु निर्विकल्पसमाधिस्थितानामेव भवति[13]। यदा निर्विकल्पसमाधिना अज्ञानहृदयग्रन्थेर्विनाशो भवति तदैवाद्वैतात्मदर्शनं भवति। तथाहि–

अज्ञानहृदयग्रन्थेर्निःशेषविलयस्तदा।
समाधिनाऽविकल्पेन यदाद्वैतात्मदर्शनम्॥ (वि.चूडा.३५३) इति।

देहाद्युपाधिभेदादेव आत्मस्वरूपं भिद्यते, तस्मान्निर्विकल्पसमाधिना उपाधिविलयाय प्रयतेत विद्वान्। तथाह्युच्यते–

उपाधिभेदात् स्वयमेव भिद्यते
चोपाध्यपोहे स्वयमेव केवलः।
तस्मादुपाधेर्विलयाय विद्वान्

---

स्वीकृतः।

[13]आरूढशक्तेरहमो विनाशः कर्तुं न शक्यः सहसापि पण्डितैः।
ये निर्विकल्पाख्यसमाधिनिश्चला तानन्तराऽनन्तभवा हि वासनाः॥ (वि.चूडामणिः ३४२)

वसेत् सदाऽकल्पसमाधिनिष्ठया॥ (वि.चूडा.३५७) इति।

विवेकचूडामणौ समाधिविषये ३५३-३७१ श्लोकेषु विस्तृतं वर्णनं लभ्यते। तत्र योगी एव ज्ञानी संवृत्त इति दृश्यते– "तथैव योगी परमात्मतत्त्वं ध्यात्वा समायाति तदेकनिष्ठया" (वि.चूडा.३५९) इत्यादिषु। निर्विकल्पसमाधावेव अद्वयानन्दरसानुभवो भवतीत्युच्यते-

निरन्तराभ्यासवशात्तदित्थं
पक्वं मनो ब्रह्मणि लीयते यदा।
तदा समाधिः सविकल्पवर्जितः
स्वतोऽद्वयानन्दरसानुभावकः॥ (वि.चूडा.३६२) इति।

किञ्च, श्रवणमनननिदिध्यासनादनन्तरं निर्विकल्पसमाधिर्भवतीति विवेकाचूडामणितोऽपि ज्ञातुं शक्यते। तथाहि-

श्रुतेः शतगुणं विद्यान्मननं मननादपि।
निदिध्यासं लक्षगुणमनन्तं निर्विकल्पकम्॥ (वि.चूडा.३६४) इति।

निर्विकल्पसमाधिना ध्रुवं ब्रह्मतत्त्वमवगम्यते, अन्यथा प्रकारेण चित्तवृत्तीनां निरोधो नैव भवति। तथाहि–

निर्विकल्पकसमाधिना स्फुटं
ब्रह्मतत्त्वमवगम्यते ध्रुवम्।
नान्यथा चलतया मनोगतेः
प्रत्ययान्तरविमिश्रितं भवेत्॥ (वि.चूडा.३६५) इति।

एवं निर्विकल्पसमाधौ निष्कलं ब्रह्माधिगम्यते इति विवेकचूडामणिकारस्य मतं सुस्पष्टम्। तथाहि–

किमपि सततबोधं केवलानन्दरूपं
निरुपममतिवेलं नित्यमुक्तं निरीहम्।
निरवधिगगनाभं निष्कलं निर्विकल्पं
हृदि कलयति विद्वान् ब्रह्म पूर्णं समाधौ॥ (वि.चूडा.४०८) इति।

"शान्तो दान्त उपरतस्तितिक्षुः श्रद्धावित्तः समाहितो भूत्वात्मन्येवात्मानं पश्येत्" (बृह.उ. ४.४.२३) इति श्रुतेर्भाष्ये शङ्करभगवत्पादैः समाहितशब्दस्य एकाग्रतारूपोऽर्थः कृत इत्यस्माभिर्दृष्टम्। किञ्च, वेदान्ताधिकारिणः कृते विहितेषु साधनचतुष्केषु शमादिषड्सम्पत्तौ चित्तैकाग्रतारूपस्य समाधानशब्दस्यान्तर्भावात् "शान्तो दान्तः" श्रुतिः योगसम्प्रदायप्रसिद्धं समाधिं विदधातीति

विवेकचूडामणिवचनं (वि.चूडा.३४१) निरर्थकम्। किञ्च, प्रस्थानत्रयभाष्ये निर्विकल्पसमाधिशब्दः सकृदपि नास्ति, विवेकचूडामणौ तु निर्विकल्पसमाधिरेव अद्वैतानन्दरसानुभूतेश्चरमसाधनमिति निगद्यत इति ग्रन्थयोः सिद्धान्तविषये संशयं जनयति। विस्तरेणालम्, विवेकचूडामणिकारमतं भाष्यकारमताद् भिन्नमिति सुस्पष्टम् अवगम्यते।

## ५. उपसंहारः

मन्मते साधनचतुष्टयसम्पादनेन विशुद्धान्तःकरणस्य वेदान्तवाक्यानां श्रवणमनननिदिध्यानादेवात्मज्ञानं भवतीति शङ्करस्य मतम्। तथाहि तेन ४.१.१-सूत्रस्य भाष्ये उच्यते– "दर्शनपर्यवसानानि हि श्रवणादीन्यावर्त्यमानानि दृष्टार्थानि भवन्ति– यथा अवघातादीनि तण्डुलादिनिष्पत्तिपर्यवसानानि, तद्वत्" इति। अत्र श्रवणादीनि पदेन श्रवणमनननिदिध्यासनानामेव ब्रह्मसाक्षात्कारसाधनत्वेन ग्रहणात् श्रवणमनननिदिध्यासनान्येव साक्षादात्मज्ञानोपकारकाणीति लभ्यते। किञ्च, "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" (बृह.उ. २-४-५) इति बृहदारण्यकभाष्ये "तस्माद् आत्मा वा अरे द्रष्टव्यो दर्शनार्हः, दर्शनविषयतामापादयितव्यः; श्रोतव्यः पूर्वमाचार्यत आगमतश्च; पश्चान्मन्तव्यस्तर्कतः; ततो निदिध्यासितव्यो निश्चयेन ध्यातव्यः; एवं ह्यसौ दृष्टो भवति श्रवणमनननिदिध्यासनसाधनैर्निर्वर्तितैः" इत्युक्तेरपि लभ्यते यच्छ्रवणमनननिदिध्यासनान्येव आत्मसाक्षात्कारं प्रति कारणानीति भाष्यकारमतम्। अन्तःकरणशुद्ध्यर्थं यत्साधनचतुष्टयमुपदिष्टं तत्रैव सविकल्पस्य निर्विकल्पस्य वा समाधेरन्तर्भावः। अन्तःकरणशुद्ध्यर्थं तु कर्म-भक्ति-ध्यानसमाधय उपयुज्यन्ते। ईश्वरार्पणबुद्ध्या क्रियमाणेन कर्मणा, भगवत्प्रेमरूपभक्तिसाधनेन, ध्यानसमाधिभिरितरवृत्तिनिरोधपूर्वकैकाग्रीकृतान्तःकरणेन वा यदा मनो दर्पणवत् स्वच्छं विशुद्धं भवति तदैव कर्मादित्यागपुरःसरं तत्त्वमस्यादिवेदान्तवाक्यानां श्रवणमनननिदिध्यासनादहं नित्यशुद्धबुद्धमुक्तस्वभावोऽद्वितीयः परमात्मा अस्मीति जीवब्रह्मणोरैक्यप्रतिपत्तिरूपमात्मज्ञानं सम्भवति। निदिध्यासनपदेनात्र न निर्विकल्पः सविकल्पो वा समाधिः ज्ञेयः, किन्तु निरन्तरचिन्तनरूपं ध्यानमेवात्र सामान्यतः स्वीकार्यम्।

वेदान्तरसार-पञ्चदशी-विवेकचूडामण्यादिषु[१४] ग्रन्थेषु

[१४]विवेकचूडामणिग्रन्थो भाष्यकारस्य शङ्करभगवत्पादस्य न वेति विदुषां वैमत्यमस्ति।

श्रवणमनननिदिध्यानव्यतिरेकेण अद्वैततत्त्वज्ञानाय योगसम्प्रदायस्वीकृतसविकल्पनिर्विकल्पसमाध्यादीनामावश्यकता या स्वीकृता सा न श्रीमच्छङ्करभगवत्पादभाष्यमतानुसारिणी। योगिज्ञानिनोस्तत्र योऽभेदः प्रतिपाद्यते स न शङ्करस्याद्वैतवेदान्तसिद्धान्ततः समीचीनः। अद्वैतवेदान्तसिद्धान्ते तु योगी अपि योगेन विशुद्धान्तःकरणः सन् कालान्तरेण जन्मान्तरेण वाद्वैताद्वैतात्मज्ञानाय प्रवर्तेत, अन्यथा "तत्त्वज्ञानं तु वेदान्तवाक्येभ्य एव भवति" इति शङ्करवचनम् अनर्थकं स्यात्।

श्रवणमनननिदिध्यासनविषये ध्यानधारणासविकल्पनिर्विकल्पसमाधिविषये च अद्वैतिनामेव मतान्तराणि अवलोक्यन्त इत्यस्माभिः पर्यालोकितम्। योगमार्गो ज्ञानमार्गश्च भिन्नाविति गीतासु स्पष्टम्। यद्यपि गीतासु सर्वेषामपि मार्गाणाम् अन्तिमं लक्ष्यं तु ब्रह्मभगवदीश्वरपरमात्मादिनानाभिधेयभिन्नस्य भगवतः पुरुषोत्तमस्य प्राप्तिरिति स्वीक्रियते, अद्वैतवेदान्तमते तु कर्मभक्तियोगादिमार्गाणां साधनचतुष्केष्वन्तर्भावेन चित्तशुद्धावेव पर्यवसानानेन ज्ञानादेव कैवल्यमिति स्वीक्रियते। तथापि योगतत्त्वानाम् अद्वैतवेदान्ततत्त्वानां च सङ्करे किं कारणमिति चेन्मन्मते– अद्वैतात्मज्ञानाय अधिकारिणो यल्लक्षणं निगद्यते तत् क्वचिदेव विलक्षणानां भवति, प्रायशः सर्वेषां न भवति। अतश्चित्तशुद्धये शमदमादिसाधनाय योगमार्ग एव श्रेयान् इति मन्वानः अद्वैतज्ञानेप्सव एव योगमार्गेण चित्तवृत्तिनिरोधपुरःसरं चित्तैकाग्रतायै चित्तशुद्धये च यतन्ते। कालेन च निर्विकल्पसमाधिमाप्य परं ब्रह्माधिगच्छन्तीति चिन्तयन्ति। "ततस्तु तं पश्यते निष्कलं ध्यायमानः" (मुण्डक ३.१.८) इत्याद्यनेकश्रुतिवाक्येषु ध्यायमानो निष्कलं ब्रह्म साक्षात्करोतीत्याम्नातत्वान्निर्विकल्पसमाधौ तत्त्वसाक्षात्कारो भवतीति तैरङ्गीक्रियते। यद्यपि शङ्करमते योगः चित्तशुद्धये चित्तैकाग्रतायै च कारणं, परवर्तिनि काले तु योगोक्तनिर्विकल्पसमाधिरेव अद्वैतवेदान्तस्य परमलक्षभूतोऽभूत्। वेदान्तसार-विवेकचूडामण्यादौ तत् सुस्पष्टम्। श्रीरामकृष्णपरमहंसस्याद्वैतवेदान्ताचार्यास्तोतापुरीनामकाश्चत्वारिंशद्वर्षाणि

---

मन्मते केवलं समाधिविषयः पर्यालोच्यते चेद् विवेकचूडामणिः शङ्करभगवत्पादकृतो नास्तीति स्पष्टमवलोक्यते। प्रस्थानत्रयभाष्ये भाष्यकारेण निर्विकल्पसमाधिशब्दः सकृदपि न प्रयुक्तः, न च आत्मज्ञानं निर्विकल्पसमाधौ भवतीति निगदितः। विवेकचूडामणौ तु समाधेर्विशेषणत्वे निर्विकल्पः अविकल्पो वा शब्दो भूयः प्रयुक्तः, निर्विकल्पसमाधौ एवात्मज्ञानं भवतीति निगद्यते। अतो ग्रन्थयो रचयितृभेदः स्यादेव।

अभ्यस्य निर्विकल्पसमाधिमाप्तवन्तः; श्रीरामकृष्णपरमहंसस्तु अचिरादेवाद्वैतवेदान्तस्य सर्वोच्चैस्तमं निर्विकल्पसमाधिमाप्तवान् इति निगद्यते स्वामिसारदानन्दकृतलीलाप्रसङ्गादिग्रन्थेषु। अतः शङ्करस्य अद्वैतसिद्धान्ते योगोक्तप्रक्रियाणां विशेषतः सविकल्प-निर्विकल्पसमाधेरनुप्रवेशः कालेन संवृत्त इति सुस्पष्टम्। अस्मिन् विषये पण्डितदीननाथत्रिपाठीमहोदयस्य वचनम् उल्लेखार्हम्– "यद्यपि अद्वैतवेदान्ततत्त्वज्ञाने वेदान्तविचारस्यैव प्राधान्यं विवरणानुयायिभिः प्रतिपादितं तथापि अनेकेषां मते तत्त्वज्ञाने योगस्य समाधेर्वा उपयोगिता स्वीक्रियते। कठ-श्वेताश्वतर-मुण्डकाद्युपनिषत्सु ध्यानादिनामुपयोगिता स्पष्टतया कीर्त्यते। वेदान्तसारग्रन्थे ध्यानसमाधिप्रभृतीनामुपयोगिता प्रदर्शितेति कारणादनेकेषां कटाक्षे सत्यपि वेदान्ते योगोऽनभिप्रेत इति निश्चिततया साधयितुं न शक्यते"[१५] इति शम्।

[१५]सदानन्दयोगीन्द्रः, वेदान्तसारः, अनुवादकः सम्पादकश्च विपदभञ्जनपालः, कलकाता, संस्कृतपुस्कतभाण्डार, २०१३, पृष्ठा २५०। पुस्तके वङ्गभाषया लिखितमस्ति, संस्कृतानुवादस्तु मत्कृतः।

# दृग्-दृश्यसम्बन्धद्वारेण प्रतिकर्मव्यवस्थोपपादनम्

अर्णवघोषालः*

## ०. उपोद्घातः

निश्चप्रचमिदम् अपश्चिमविपश्चितां यद् धर्मार्थकाममोक्षाख्येषु चतुर्विध-पुरुषार्थेषु मोक्ष एव परमपुरुषार्थ इति। स च मोक्षः ज्ञानादेव इति प्रायः सर्वेषां दर्शनप्रस्थानानां सामान्यःनिश्चयः। षडास्तिकदर्शनेषु उपनिषत्सिद्धान्तभूते अद्वैतवेदान्तदर्शने ज्ञानमेव मोक्ष इति उपनिषन्निगमनिर्णयः। तच्च ज्ञानमेव आकाशवत् सर्वगतं नित्यं सर्वाधिष्ठानभूतम् आनन्दस्वरुपम् अखण्डैकरसं निर्गुणं ब्रह्म दृक् स्वरुपम्। मिथ्याज्ञानरुपेण उपाधिना परिच्छिन्नचैतन्यं जीवः इति व्यवहारः। एवम् अद्वयमखण्डं ज्ञानं शरीरभेदेन बहु जातम्। एवमज्ञानेन परिच्छिन्नः सन् ज्ञानस्वरुपोऽपि अयमात्मा अल्पज्ञः जातः। किञ्च रज्जुवत् सत्यभूते अधिष्ठाने आरोपितसर्पवत् मिथ्यारूपेण जगदाकारेण परिणम्य तिष्ठति इदम् अज्ञानम्, तच्च दृश्यम्। तस्माद् अज्ञानपरिमाणोऽयं प्रपञ्च एव जीवस्य ज्ञानविषयो भवति। एतेन ज्ञानविषययोः सम्बन्ध उत्पद्यते। किञ्च ज्ञानं स्वसम्बद्धं विषयमेव प्रकाशयति। परन्तु अयमात्मा निर्विषयः। न केनापि आत्मा कथमपि शक्यते विषयीकर्तुम्। न च आत्मनः वर्तते कोऽपि विषयः। पुनश्च प्रपञ्चः नास्ति चेत् कल्पितश्चेत् कथं सत्यज्ञानस्वरूपेनात्मना अस्य सम्बन्धः? अयथार्थः आध्यासिको वायं सम्बन्धः। सम्बन्धस्य मिथ्यात्वे कथं मानमेयादिव्यवस्था उपपद्यते इति चेदुच्यते भगवत्पादैः अध्यासभाष्ये–

"तथापि अन्योन्यस्मिन् अन्योन्यात्मकताम् अन्योन्यधर्मांश्च अध्यस्य इतरेतराविवेकेन अत्यन्तविविक्तयोः धर्मधर्मिणोः मिथ्याज्ञाननिमित्तः सत्यानृते मिथुनीकृत्य, अहमिदम् मम इदम् इति नैसर्गिकोऽयं लोकव्यवहारः।" इति। एवमाध्यसिकसम्बन्धद्वारेण अद्वैतवेदान्ते प्रतिकर्मव्यवस्था कल्पिता।

## १. दृग् (ज्ञानम्)

वेदान्ते पदार्थौ द्विविधः, दृग् दृश्यश्चेति, अन्यवादिपरिकल्पितानां पदार्थानामत्रैवान्तर्भावात्। तत्र दृक्-पदार्थ आत्मा पारमार्थिक एकः। दृशेः ज्ञानार्थकत्वात्। भावे क्विपि दृग् इति रूपम्, ज्ञानमित्यर्थः। स च दृक्-पदार्थो

*शोधछात्रः, अद्वैतवेदान्तविभागे, राष्ट्रियसंस्कृतविद्यापीठे, तिरुपतिस्थे।

त्रिविधः। जीव ईश्वरः साक्षी चेति। तत्र कारणीभूतज्ञानोपाधिरीश्वरः। अन्तःकरण-तत्संस्कारावच्छिन्नज्ञानोपहितो जीवः।

अविद्याप्रतिबिम्ब ईश्वर इति पक्षे बिम्बचैतन्यं साक्षी इति सिद्धान्तबिन्दुकारस्य मतम्।वार्तिककारमते तु ईश्वर एव साक्षी।

## २. दृश्यम् (ज्ञेयम्)

अविद्या तद्व्याप्यतत्कार्यात्मकं जगत् दृश्यपदार्थः। तस्य चापारमार्थिकत्वेऽपि व्यावहारिकसत्त्वाभ्युपगमाद् न स्वाप्निकपदार्थवन्निरूपणं व्यार्थम् उपासनादौ उपयोगात्। प्रपञ्च्यते विस्तारीक्रियते मायया इति प्रपञ्चः, दृश्यपदार्थः दृश्य इत्यस्य पदस्यर्थोऽभिधेयः। दृश्यते हि सर्वः प्रपञ्चः, ततोऽस्य दृश्यत्वम्। द्रष्टुं योग्यश्शक्यो वा दृश्य इति व्युत्पत्तिः। सोऽपि त्रिविधः। अव्याकृतमूर्तामूर्तभेदात्।

ननु ज्ञातृ-ज्ञान-ज्ञानकरण-ज्ञेयाख्यानां चतुर्णां पदार्थानां विद्यमानत्वे कथं दृग्-दृश्यपदार्थद्वयोक्तिरिति चेदुच्यते, यानि ज्ञानकरणानि ज्ञानेन्द्रियानि मनश्च तानि अपि दृश्यानि एव। मम चक्षु काणः, मम मनः खिन्नमिति मनश्चक्षुरादेः ज्ञेयत्वात्। अथ यदयं घट इत्यादि वृत्तिज्ञानं तदपि दृश्यमेव। विषयस्येव ज्ञानस्यापि प्रत्यक्षस्याङ्गीकृतत्वात् परिभाषादौ। यश्च ज्ञाता, प्रमाता अहङ्कारः सोऽपि दृश्य एव। अहङ्कारोत्पत्तितन्नाशयोः जाग्रत्-समाध्यादौ गृह्यमाणत्वात् चैतन्यात्मकं ज्ञानं दृक्पदार्थः। तद्भिन्नः सर्वोऽपि दृश्यपदार्थः इति पदार्थद्वयमेव सिद्धम्।

## ३. दृग्-दृश्यसम्बन्धः

सकललोकव्यवहारकारणं संसर्गः। संसर्गमन्तरा न व्यवहारः प्रवर्तते। ज्ञानं व्यवहारस्य मूलम्। ज्ञानं च संसर्गात् उत्पद्यदते।(आत्मा मनसा संयुज्यते मन इन्द्रियेण इन्द्रियमर्थेन ततः प्रत्यक्षज्ञानमुत्पद्यते)[1]। अद्वैतमते वस्तुतः दृग्दृश्ययोः सम्बन्धः अनुपपन्नः। कथमिति तत्त्वप्रदीपिकानुसारं प्रतिपाद्यते। विषयेन्द्रियसन्निकर्षाद् दृग्दृश्यसम्बन्धः उत्पद्यते इति उच्यते चेत् तस्य ईश्वरज्ञाने व्यभिचारः। यतो हि तथा चेद् ईश्वरज्ञानेऽपि विषयेण सह सम्बन्धः प्रतीयेत। परन्तु तथा न भवति। ईश्वरज्ञानस्य इन्द्रियाजन्यत्वाद् विषयेन्द्रियसन्निकर्षोऽपि असम्भवः। किञ्च इन्द्रियजन्येषु अपि युक्तावस्थायां योगिज्ञानेषु अन्तःकरणासम्बद्धानाम् अतीतानागतानां वाह्यविषयाणां स्फुरणं

[1]तर्कसंग्रहदीपिका

भवति। अतीतविषया अनागतवियाः च अविद्यमानाः, इदानीमिन्द्रियसन्निकर्षः अपेक्षितः चेद् अतीतानागतविषयाणां ज्ञानं नोत्पद्येत। वाह्यविषयेषु मनसः साक्षात् सम्बन्धः नोपपन्नः। “परतन्त्रं बहिर्मन” इति न्यायात्। अपि च भ्रमप्रत्यक्षे विषयेन्द्रियसन्निकर्षं विना एव वस्तुस्फुरणम्। इदानीं प्रमाणजन्यज्ञाने सोऽयं देवदत्त इत्यादौ तत्तांशस्य इन्द्रियसम्बद्धत्वमुच्यते चेद् अशक्यमङ्गीकर्तुम्। यतो हि चक्षुषा देवदत्तः संयुक्तः, तत्ता च तस्य विशेषणम्। अतोऽत्र संयुक्तविशेषणतासम्बन्धः स्वीकरणीयो भवति। तथा चेत् समवायेतरभावपदार्थस्य इन्द्रियसम्प्रयोगमन्तरेणापि प्रत्यक्षतायाम् अयं पर्वतोऽग्निमान् इत्यग्निमत्त्वस्यापि संयुक्तविशेषणतयाप्रत्यक्षत्वापत्तेः प्रत्यक्षधर्मिकानुमानमात्रोच्छेदप्रसङ्गः। ज्ञानज्ञेययोः विषयविषयिभावसम्बन्धः स्वीक्रियते चेत् तन्निरूपयितुमशक्यम्। विषयत्वं नाम ज्ञानजन्यफलाधारत्वं, विषयनिष्ठज्ञानजनकत्वं च विषयित्वमिति न युक्तम्। यतो हि प्रश्नो भवति यज् ज्ञानजन्यं फलं किं ज्ञातता उत व्यवहार इति। ज्ञानजन्यं फलं ज्ञातता भवति चेद् अविद्यमाने वस्तुनि अतीतादिविषये तद् नोपपद्यते। किञ्च ज्ञानं स्वज्ञाततारूपं फलं तस्मिन् एव विषये जनयति इत्यत्र नियामकं नास्ति। अन्यथा विषयतायाः अपि नियामकमुच्येत। व्यवहार-पक्षोऽपि अयुक्तः, यतो हि व्यवहारः यदि आकर्षणादि तर्हि आत्मादि विभुपदार्थे तद् नार्हति भवितुम्। रजतज्ञानजन्याकर्षणादिव्यवहारस्य आश्रयः यथा रजतं तथा रजतगतमलमपि, तस्मात् तत्रापि रजतज्ञानस्य विषयता भवेत्, तच्च नेष्टम्। इदानीं व्यवहारविषयत्वेन इच्छादयः विवक्षिताश्चेत् तदपि नार्हति भवितुम्, इच्छारूपव्यवहारस्य आश्रयो भवति आत्मा, तदितरस्य अविषयत्वप्रसङ्गात्।

विषयज्ञानजन्य-त्यागादिज्ञानस्य विषयता अथवा त्यागादिज्ञानस्य योग्यत्वम् एव विषयत्वम् इति चेद् न ज्ञानगोचरत्वस्यैव निरूप्यमाणत्वात्। एवं ज्ञानविषयतानिरूपणाय ज्ञानविषयताया अपेक्षितत्वादात्माश्रयदोषः। किञ्च हानादिज्ञानस्य विषयतां निरूपयितुं हानादिज्ञानं न स्वीक्रियते चेत् तस्य निर्विषयत्वमापद्येत। हानादिज्ञानानां हानादिज्ञानान्तरजनकत्वमस्ति चेत् तज्ज्ञानानामपि सविषयत्वसिध्यर्थं ज्ञानान्तरजनकत्वे घटादिज्ञानानुत्पादः सुषुप्त्यभावश्च प्रसज्येयाताम्। अपि च “व्यवहारयोग्यत्वं विषयत्वमङ्गीकारे च योग्यतायां योग्यतान्तराभ्युपगमेऽनवस्था, तदनभ्युपगमे योग्यतायाः विषयत्वाभावः” इति तत्त्वप्रदीपिका। तस्मात् दृग्-दृश्ययोः सम्बन्धः नास्ति।

## ४. दृग्-दृश्यसम्बन्धस्य फलम्

वस्तुतः दृग्दृश्ययोः सम्बन्धानुपपत्तिः न प्रपञ्चमिथ्यात्वसंसिद्धये प्रयोजकम् अथवा पारमार्थिकाद्वैतप्रिष्ठार्थम्, व्यावहारिकप्रतिकर्मव्यवस्थोपपादनमेव तस्य फलम्। तस्मादेव कारणाद् अद्वैतसिद्धौ भगवता मधुसूदनसरस्वतीपादेन प्रपञ्चस्य वैतथ्यप्रतिष्ठायै दृगदृश्यसम्बन्धानुपपत्तिं निरूप्य प्रकरणान्ते प्रतिकर्मव्यवस्थासिद्धये प्रकरणान्तरमारब्धम्। किञ्च दृग्दृश्यसम्बन्धानुपपत्ति-प्रकरणेऽपि दृग्दृश्ययोः न कोऽपि सम्बन्धो वक्तव्यः इति नोच्यते, अपि तु आध्यासिकसम्बन्धातिरिक्तसम्बन्धो नैव वक्तुं शक्यते इत्येव उच्यते। तत्र च अनुकूलतर्के समर्थिते सति प्रतिकूलतर्कः अवतरति– यदि विश्वस्य आध्यासिकत्वमुच्यते तर्हि प्रतिकर्मव्यवस्था नोपपद्यते, दृशि सर्वेषां दृश्यानामाध्यसिकत्वाविशेषे दृग्-रूपं चैतन्यं सर्वदा दृश्यं सवर्दा अवभासयेदिति। एतत् प्रतिकूलतर्कनिरासाय विश्वस्य आध्यासिकत्वेऽपि जीवस्य प्रतिज्ञानं विषयव्यवस्था भविष्यति इति प्रतिपादनीयम्। तदर्थं विषयाकारेण अन्तःकरणपरिणामप्रयुक्त आगमापायी कश्चन सम्बन्धो जायते इति वा पूर्वमेव स्थिते सम्बन्धे दृक्प्रतियोगिकत्वं जायते इति वा उपपादनीयम्। किञ्च ज्ञानशब्देन मुख्यज्ञानस्य चैतन्यस्य ग्रहणे विषयेण सह आध्यासिकतादात्म्यसम्बन्धः। ज्ञानशब्देन वृत्तिविशिष्टस्य ग्रहणेऽपि आकाराख्यः स्वरूपसम्बन्धविशेष आपतति। यद्यपि तत्र वृत्तिः विषयावारकमज्ञानं नाशयति तथापि विषयं प्रकाशयति चैतन्यमेव "तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति"[२] इति श्रुतेः। तच्च चैतन्यं स्वस्मिन्नध्यस्तमेव विषयं प्रकाशयति इत्यत आध्यासिकसम्बन्ध एव चैतन्यनिष्ठप्रकाशकतानियामक इत्ययं निरपवादसिद्धान्तो वर्तते।

## ५. विषयप्रत्यक्षस्य प्रक्रिया

अवाङ्मनोगोचरम् अखण्डं ब्रह्मचैतन्यं सर्वं व्याप्य तिष्ठति। अविद्यान्तःकरणाद्युपाधिकारणात् तस्य विबिधरूपेण प्रतीतिर्भवति। एवमन्तःकरणावच्छिन्नचैतन्यम् तप्तायःपिण्डवदन्तःकरणेन एकीभूतं चैतन्यं भवति प्रमातृचैतन्यं जीवचैतन्यं ज्ञाता वा। घटादिविषयज्ञानकाले अन्तःकरणपरिणामभूता या वृत्तिः चक्षुर्द्वारेण निर्गत्य विषयदेशं गत्वा घटाद्याकारं भजते तदन्तःकरणवृत्यवच्छिन्नचैतन्यं प्रमाणचैतन्यमित्युच्यते। वस्तुतः अन्तःकरणवृत्त्यवलम्बनेन प्रमाता एव विषयदेशं गच्छति तस्मात्

[२] कठोपनिषत्

प्रमाणचैतन्यं प्रमातृचैतन्यस्य एव अवस्थाविशेषः। घटादेः अधिष्ठानभूतं घटादिविषयावच्छिन्नमुपहितं वा ब्रह्मचैतन्यं भवति विषयचैतन्यम् प्रमेयचैतन्यं वा। अन्तःकरणोपाध्युपहितं तत्प्रकाशकं तदधिष्ठानभूतं चैतन्यं साक्षीचैतन्यमित्युच्यते। नदीजलं यथा प्रणाड्या निर्गत्य क्षेत्रादिकं प्राप्य तत्तत्क्षेत्राद्याकारेण परिणमते तथा तैजसमिदमन्तःकरणं विषयदेशं प्राप्य तादृशाकारतां भजते। तदा मठान्तर्वर्ति-घटाकाशः यथा मठाकाशेन अभिन्नतामापाद्य तिष्ठति तद्वदन्तःकरणवृत्तिमवलम्ब्य विषयदेशोपनीतं प्रमातृचैतन्यं तथा च तत्रस्थं विषयचैतन्यमित्यनयोः उपाधिद्वितयस्य च समकाले ब्रह्मरूपे अधिष्ठाने एकत्र समवेशात् सर्वाधिष्ठानभूतब्रह्मचैतन्येन ते अभिन्नतां भजेते। एषा प्रक्रिया अभेदाभिव्यक्तिः इत्युच्यते। तेन च घटादेरधिष्ठानभूतेन विषयप्रकाशकेन ब्रह्मचैतन्येन अभिन्नस्य प्रमातृचैतन्यस्य स्वस्मिन् अध्यस्तानां घटादिविषयाणां ज्ञानमुत्पद्यते।

## ६. दृग्-दृश्यसम्बन्धद्वारेण प्रतिकर्मव्यवस्थोपपादनम्

वस्तुतः अद्वैतिनामभिप्रायोऽस्ति– प्रपञ्चोऽयं मिथ्या दृश्यत्वात्। इतः प्रागस्माभिरालोचितं यद् दृग् नाम आत्मस्वरूपं ज्ञानं, तज्ज्ञानं येन सम्बद्धं तत् भवति दृश्यम्। श्रुतौ आम्नायते च – “सर्वं खल्विदं ब्रह्म”, “नेह नानास्ति किञ्चन” इति। अपि च “आत्मा वा अरे इदं सर्वमिति” बृहदारण्यकश्रुतिः। किञ्च अस्माभिः ज्ञायते यत् प्रज्ञानम् आत्मानं विहाय कस्यापि पारमार्थिकत्वं नास्ति। एतेन ज्ञायते यद् आत्मेतरस्य ज्ञानेतरस्य वा पदार्थस्याभावाद् तेन साकं कस्यापि सम्बन्धः कल्पयितुमपि न शक्यते। आत्मनः निर्गुणत्वनिर्लेपत्वादयः अपि तत्र हेतवः। तस्माद् वास्तविकः कश्चन सम्बन्धः न भवितुमर्हति। तदुक्तं वार्तिकवचनम्–

निःसङ्गस्य सङ्गेन कूटस्थस्य विकारिणा।
आत्मनोऽप्यन्यथा योगो वास्तवोनोपपद्यते॥

इति। परन्तु दृग्-दृश्ययोः सम्बन्धः भग्नश्चेत् प्रतिकर्मव्यवस्था कथमुत्पद्यते इति आक्षेपः। तदा उच्यते आत्मातिरिक्तस्य अनुपस्थितत्वेऽपि ये खलु विषयाः दृश्यन्ते ते ज्ञानस्वरूपे आत्मनि आरोपिताः। यथोच्यते अद्वैतसिद्धौ जडत्वहेतुविचारसन्दर्भे– ज्ञानस्य हि सविषयत्वं विषयसम्बन्धः, स च न तात्त्विकः, किन्त्वाध्यासिकः, वक्ष्यमाणरीत्या तात्त्विकसम्बन्धस्य निरूपयितुमशक्यत्वात्, अतः न तस्य स्वाभाविकत्वम्, न हि शुक्तौ रूप्यं स्वाभाविकम्। इति। यथोच्यते

गौरपादाचार्येण माण्डूक्यकारिकायाम्–

अनिश्चिता यथा रज्जुरन्धकारे विकल्पिता।
सर्पधारादिभिर्भावैस्तद्वदात्मा विकल्पितः॥ इति।

रज्जौ सर्पारोपवत् ब्रह्मनि प्रपञ्च आरोपितः। यावति प्रपञ्चस्य स्थिति तावति आरोपितत्वेनैव न तु याथार्थेन। आरोप्याधिष्ठानयोः सम्बन्धाभावो भाष्यकारैः प्रतिपादितः– तत्रैवं सति यत्र यदध्यासः तत्कृतेन दोषेण गुणेन वा स न सम्बध्यते इति। एतस्य विवरणमुपलभ्यते संक्षेपशारीरके–

“न हि भूमिरूषवती मृगतृङ्ज्लवाहिनीं सरितमुद्वहति।
मृगवारिपुरपरिवारवति न नदी तथोषरभुवं स्पृषति॥ इति।

तस्मादाध्यसिकतादात्म्यसम्बन्धः दृग्-दृश्ययोः इति अद्वैतवेदान्तनिश्चयः।

तथा चोक्तं भगवता मधुसूदनसरस्वतीपादेन– अन्यस्य चानाध्यासिकस्य सम्बन्धस्याभावात्।[३] इति। परन्तु आरोपितप्रपञ्चः सर्वदा कुतो न दृश्यते इति आक्षेपः। उच्यते अज्ञानं प्रतिबन्धकं तत्र। यदा तु अन्तःकरणं तैजसं चक्षुरादिद्वारा बहिर्गत्वा विषयदेशं प्राप्य विषयाकारकं भवति तदा सा अन्तःकरणवृत्तिः विषयावच्छिन्नचैतन्यगताज्ञानं नाशयति। तदा स पदार्थः दृश्यः प्रत्यक्षश्च भवति। तदा भाति प्रकाशते इति व्यवहारः। एवञ्च अविद्यानाशे सति विषयाः प्रकाशन्ते। अज्ञाननाशार्थं वृत्तेरपेक्षा अस्ति। वृत्त्यर्थमिन्द्रियसन्निकर्षोऽपि अपेक्षितः। इन्द्रियसम्बन्धश्च सर्वदा न घटते, तात्कालिकश्च। यदा येन पदार्थेन सह वृत्तिद्वारा सम्बन्धः भवति तदा तस्य प्रत्यक्षता। एवं चित् सम्बन्धः सर्वदा अस्ति चेदपि यदा विषयेन्द्रियसन्निकर्षेण सम्बन्धः तदा एव, विषयावारकाज्ञाननाशत्वात् प्रत्यक्षमिति दृश्यमिति वा नियमः।

## ७. प्रतिकर्मव्यवस्थायाः परिचयः

“कस्यचित् पुंसः कदाचिदेव कश्चिदेव विषयो ज्ञानकर्म, न तु सर्वस्य सर्वदा सर्वः”[४]। अद्वैतमते व्यक्तिभेदेन ज्ञानविषयकनियमरूप एषा व्यवस्था एव प्रतिकर्मव्यवस्था। यदुक्तं न्यायामृततरङ्गणीति ग्रन्थे– कर्म कर्म प्रतिकर्म। व्यवस्था नियमः ब्रह्मरूपे ज्ञाने घटादीनामध्यासात् युगपत् सर्वेषां प्रकाशप्रसक्तौ यदिन्द्रियसन्निकर्षजन्यान्तःकरणवृत्त्या

---

[३]अद्वैतसिद्धिः

[४]अद्वैतसिद्धिः लघुचन्द्रिका

यदवच्छिन्नचैतन्यावरणाज्ञानशक्त्याद्यपगमस्तच्चैतन्येन प्रकाश्यत इत्येवं व्यवस्था।[५]

तथा च न्यायरत्नावलीति ग्रन्थे– कदाचिदेव केनचिदेव किञ्चिदेव प्रमीयते इति कालविशेषादिप्रतिनियतस्य ज्ञानकर्मणो व्यवस्था नियामकोक्तिरित्यर्थः।[६] अस्यापराभिधानं मानमेयव्यवस्था।

## ८. मानमेयव्यवस्था ईश्वरविषये न सङ्गच्छते

अविद्या दृश्यमाना जडा विनाशिनी च। स्वयं परिच्छिन्नत्वेऽपि आवरणशक्त्या चैतन्यमावृणोति। इदानीं परिच्छिन्नेनाज्ञानं कथमपरिच्छिन्नचैतन्यमावृणोति इति चेदुच्यते प्रकाशस्य प्रतिबन्धकत्वमेवावरणम्। यथा लोके नेत्रनिकटे स्थापितेनाङ्गुलिद्वयेनैव सूर्यमण्डलमावृतं भवति तद्वदत्रापि। एवं चैतन्यमावृत्य पूर्वसंस्कारबलेन जीवकृतकर्मवशात् च अविद्या आकाशादिनिखिलप्रपञ्चाकारेण परिणमते। अस्यामविद्यायामात्मनः प्रतिबिम्बितत्वात् स स्वगतचिदाभासेन तादात्म्यं प्राप्नोति। चित् चिदाभासश्च नात्यन्ततो भिन्नः। तस्मादविद्या चैतन्येन सह तादात्म्यं गच्छति। एवमविद्यापरिणामभूतः प्रपञ्चोऽपि चैतन्येन सह तादात्म्यं विधाय तिष्ठति। निखिलस्य प्रपञ्चस्याधिष्ठानभूत-चैतन्यं भवति ईश्वरः। स च प्रदीपवत् सर्वदा सर्वावभासकः तस्मात् स सर्वज्ञः। एवं सर्वज्ञत्वात् सर्वदा सर्वावभासकत्वात् प्रतिकर्मव्यवस्था तस्मिन् न युज्यते। परन्तु परिच्छिन्नत्वात् जीवे सर्वदा सर्वावभासकत्वं नास्ति इत्यतः प्रतिकर्मव्यवस्था सुतरां सङ्गच्छते। परिच्छिन्नत्वात् जीवः न सर्वदा सर्वविषयेण, परन्तु कदाचित् केनचिद् विषयेण सह प्रमाणसापेक्षेण सम्बद्धो भवति। ईश्वरः अनादेः अविद्याया अधिष्ठानम् इत्यतः अविद्या ईश्वराधीना। तस्माद् अविद्या ईश्वरस्य विषयं न आवृणोति। अन्धकारः यथा मनुष्यान् प्रति विषयावारको भवति परन्तु न मार्जारं प्रति तद्वदत्रापीति बोद्धव्यम्।

## ९. प्रतिकर्मव्यवस्थायामद्वैतमते शङ्का तत्समाधानञ्च

ब्रह्म सत्यं जगन्मिथ्या इत्यद्वैतनिश्चयः। प्रपञ्चस्य मिथ्यात्वे कथं मानमेयव्यवस्था उपपद्यते इति संशयः। विषयेन्द्रियसन्निकर्षात् ज्ञानमुत्पद्यते। इदानीं विषयः मिथ्या चेत् तेन इन्द्रियसन्निकर्षः कथं भवेदिति चेदुच्यते अद्वैते सत्तात्रैविध्यमङ्गीक्रियते। अपारमार्थिकत्वेऽपि यथा जगतः स्वाप्निकपदार्थवत्,

---

[५]न्यायामृततरङ्गणी

[६]न्यायरत्नावली

रज्जुसर्पवद् वा तत्समजातीयत्वं नास्ति तथा तस्य ब्रह्मवत् स्थितिरपि नास्ति। एवं ब्रह्म जगत् तथा स्वाप्निकपदार्थानां मध्ये सत्तावैचित्र्यमालोक्य आचार्यैः पारमार्थिक-व्यावहारिक-प्रातिभासिकरूपं सत्तात्रैविध्यम् अङ्गीकृतम्। तत्र त्रैकालिकाबाध्यत्वं पारमार्थिकत्वम्, तच्च ब्रह्मण एव। ब्रह्मज्ञानेतराबाध्यत्वं व्यावहारिकत्वं, तच्च जगतः। व्यावहारिकज्ञानबाध्यत्वं भवति प्रतिभासिकत्वं, तच्च रज्जुसर्पादेः। प्रातिभासिकः विषयः ज्ञानकाले एव सत्, तस्मात् प्राक् अथवा अनन्तरं सत्ता नास्ति तस्य। यथा शुक्तिरजतादिकं ज्ञानकाले एव सत्। वस्तुतः शुक्तिरजतादिकं न मुलाविद्यायाः कार्यं किन्तु शुक्त्याद्यवच्छिन्न-चैतन्यविषयकाविद्यायाः कार्यम्। परन्तु व्यावहारिकस्य तथा नास्ति। व्यावहारिकविषया मुलाविद्ययाः कार्यम् इत्यतः ज्ञानात् पूर्वमेव चैतन्ये अध्यस्ताः। तस्माद् व्यावहारिकविषयः ज्ञानात् पूर्वमेव सत्तावान्। तस्मात् तत्र इन्द्रियसन्निकर्षे दोषो नास्ति।

सत्तात्रैविध्यस्य स्वीकारेऽपि दोषो नास्ति, यतो हि ब्रह्मैव सत्यम् इत्यस्यार्थो भवति ब्रह्मैव पारमार्थिकं सत्यम्। तस्माद् ब्रह्मनि त्रैकालिकाबाध्यत्वम्, आकाशादिव्यावहारिकप्रपञ्चे व्यवहारकालबाध्यत्वं शुक्तिरजतादिप्रातिभासिकवस्तुषु स्वकालबाध्यत्वं च विद्यते।

## १०. प्रतिकर्मव्यवस्थायां न्यायामृतकारस्य आक्षेपः तत्समाधानञ्च

न्यायामृते व्यासतीर्थपादैः प्रतिकर्मव्यवस्थाया अनुपपत्तिप्रसङ्गः दर्शितः। अद्वैते ब्रह्मातिरिक्तं सर्वं काल्पनिकम्। काल्पनिकत्वं च प्रतीतिमात्रशरीरत्वस्य व्याप्यम्। प्रतीतिमात्रशरीरत्वाभावे काल्पनिकत्वस्याभावः। शुक्तिरजतादिकं काल्पनिकमित्यततः प्रतीतिमात्रशरीरम्। एवमेव घटादीनामपि काल्पनिकत्वं ब्रह्मातिरिक्तविषयत्वात्। परन्तु अद्वैतिभिः यथा प्रतिकर्मव्यवस्था प्रपञ्चिता तेन घटादिविषयकप्रत्यक्षज्ञानात् पूर्वं घटादीनां सत्ता अङ्गीकरणीया भवति। अन्यथा इन्द्रियसन्निकर्षः तदनु अन्तःकरणवृत्तिद्वारेण घटादिविषयकं प्रत्यक्षात्मकं ज्ञानं च नोत्पद्येत। तथात्वे च तस्य प्रतीतिमात्रशरीरत्वस्य अनुपपत्तिः स्यात्। एवं प्रतीतिमात्रशरीरत्वाभावे काल्पनिकत्वाभाव इति पूर्वोक्तनियमेन काल्पनिकत्वाभावः घटादौ। इदानीं यद्यपि व्यावहारिकमपि कल्पितं तथापि प्रतिभासिकत्वमेव प्रतीतिमात्रशरीरत्वस्य व्यापकम्। परन्तु एवं प्रतीतिमात्रशरीरत्वस्य व्यापकत्वेन प्रतिभासिकरूपकल्पिततत्वविशेषस्वीकारे गौरवात् लाघवेन कल्पिततत्वसामान्यं

स्वीक्रियते। प्रतीतिमात्रशरीरत्वाभावेऽपि घटादीनां व्यावहारिकानां ज्ञाननिवर्त्य[७]-त्वनिबन्धनेन सिद्ध्यति कल्पितत्वमिति चेत् न, यन्न प्रतीतिमात्रशरीरं तज् ज्ञाननिवर्त्यमित्यत्र प्रमाणं नास्ति।

इन्द्रियसन्निकर्षमन्तरेण प्रत्यक्षात्मकस्यान्तःकरणवृत्तेः असम्भवात् प्रपञ्चस्य प्रतीत्यभाव इत्यपि अशक्यमाक्षेप्तुम्। अत एव तदनुरोधेन कल्पितवस्तुनः अपि अज्ञातसत्ता अङ्गीकरणीया। यतो हि व्यावहारिकप्रपञ्चस्य सत्यता यदि स्वीक्रियेत तर्हि तस्य अज्ञातसत्ता इन्द्रियसन्निकर्षः तदाकारवृत्तिः च आपद्येत तेन तस्य मिथ्यात्वं नोच्येत। किञ्च प्रपञ्चस्य मिथ्यात्वस्वीकारेऽपि स्वाप्नप्रपञ्चवद् व्यावहारिकस्यापि इन्द्रियसन्निकर्षनिरपेक्षतया प्रतीतिसम्भवः। एवं जाग्रत्स्वप्नप्रपञ्चयोः भ्रान्तिरूपतुल्यप्रतीतौ यद्विषयकभ्रान्तिः दीर्घस्थायिनी स व्यावहारिक इत्यनयोर्भेदः दर्शयितुं शक्यते।

कल्पितत्वं न प्रतीतिमात्रशरीरत्वस्य व्यापकम् , दृग्दृश्यसम्बन्धानुपपत्तेः[८]। विमतं मिथ्या दृश्यत्वात् जडत्वात् परिच्छिन्नत्वात् शुक्तिरूप्यवत् इत्यनुमानेन व्यावहारिकप्रपञ्चस्यापि कल्पितत्वं सिद्ध्यति। तथा च सोऽयं घट इत्यादिप्रत्यभिज्ञया व्यावहारिकप्रपञ्चस्य स्थायित्वमपि सिद्ध्यति। अतः यत्र यत्र कल्पितत्वम् तत्र तत्र प्रतीतिमात्रशरीरत्वमिति व्याप्तौ व्यभिचारः।

इदानीमेषा प्रत्यभिज्ञा शुक्तिरूप्यादिस्थलेऽपि दृश्यते इति चेत् न, प्रमाणान्तरेण बाधितत्वात् शुक्तिरूप्यस्य।

अत्र शङ्का यत् परोक्षस्थले यथा शरीराभ्यन्तरस्थवृत्त्या विषयप्रकाशः तथा अपरोक्षस्थलेऽपि भवतु इति चेत् न, परोक्षापरोक्षेति उभयत्रापि चैतन्यमेव विषयं प्रकाशयति न तु वृत्तिः। विषयावच्छिन्नचैतन्यस्याभिव्यक्तिः एव विषयापरोक्षत्वे हेतुः। परोक्षस्थले तु विषयेण सह इन्द्रियसन्निकर्षाभावाद् विषयावच्छेदेन चैतन्याभिव्यक्तिः न भवति। परन्तु देहाभ्यन्तरस्थ-विषयाकारान्तःकरणवृत्तौ चैतन्यस्योपरागः भवति।

जडत्वादन्तःकरणवृत्तिः विषयं प्रकाशयितुं नार्हति। चैतन्येन विषयस्य प्रकाशः। तथा चेत् घटादीनां प्रकाशः किं घटादिविषयाकारावृत्तिस्थचैतन्यन

---

[७]ज्ञानप्रयुक्तावस्थितिसामान्यविरहप्रतियोगित्वं ज्ञाननिवर्त्यत्वम् (अद्वैतसिद्धिः)

[८]न हि ज्ञानं ज्ञेयासम्बद्धमेव प्रकाशकम् अतिप्रसङ्गात्। नापि सम्बद्धम्, अत्मस्वरूपस्य तद्गुणस्य वा ज्ञानस्य ज्ञेयेन संयोगसमवायोरभावात् अन्यस्य चानाध्यासिकस्य सम्बन्धस्याभावात्.....।(अद्वैतसिद्धिः)

उत वृत्तिप्रतिबिम्बितचैतन्येन अभेदाभिव्यक्तं यद् विषयाधिष्ठानचैतन्यं तेन इति संशयः। अत्र अधिष्ठानचैतन्यमेव विषयप्रकाशकम्। यद् वस्तु यत्र अध्यस्तं तत् तेनैव प्रकाशते। अधिष्ठानचैतन्यम् अध्यासद्वारा प्रत्यक्षरूपेण विषयसम्बद्धं भवति। वस्तुतः आत्मा स्वयम्प्रकाशस्वरूपः, स च स्वसम्बद्धवस्तुमात्रस्य अवभासक इति नियमः। तस्य स्वीकाराभावे गौरवात्। किञ्च अधिष्ठानचैतन्यम् अभिव्यक्तं चेद् विषयस्य प्रकाशकम् भवति। अनभिव्यक्तं चैतन्यम् आच्छादितप्रदीपवत्[१]। तस्मादभिव्यक्तं चैतन्यमेव विषयप्रकाशकम्।

## ११. अद्वैतवेदान्तमते प्रतिकर्मव्यवस्था

अद्वैतमते जलाशयस्थं जलं यथा प्रणाड्या निर्गत्य क्षेत्रं प्रति गत्वा क्षेत्रवत् चतुष्कोणाद्याकारं प्राप्नोति तथा शरीरस्थमन्तःकरणं चक्षुरादिद्वारा निर्गत्य घटादिविषयदेशं गत्वा घटाद्याकारेणाकारितं भवति। अन्तःकरणस्य एवं विषयाकारेण परिणामः वृत्ति इत्युच्यते। अस्यां वृत्तौ अभिव्यक्तेन चैतन्येन विषयस्य प्रकाशः। एवं प्रतिकर्मव्यवस्था उत्पद्यते।

## १२. सत्तात्रैविध्यस्वीकारादेव प्रतिकर्मव्यवस्था उपपद्यते

प्रतिकर्मव्यवस्था यथा उपपादिता तद्विचार्य्य वक्तुं शक्यते यत् व्यावहारिकस्य वस्तुनः अज्ञातसत्तास्वीकारमन्तरेण तदसम्भवः। ज्ञानात् प्राक् सत्तावतः वस्तुनः एव प्रतिकर्मव्यवस्थाद्वारा ज्ञानोत्पत्तिः। इयं च अध्यस्तसत्ता। अध्यस्तसत्ता व्यावहारिकी प्रतिभासिकेति द्विविधा। पारमार्थिकत्वञ्च ब्रह्मण एव। सत्यञ्चानृतञ्च सत्यमभवत् इत्यादिश्रुत्या अपि ज्ञायते। अस्यार्थो हि पारमार्थिकसत्यं ब्रह्म व्यावहारिकसत्यजगदाकारेण मिथ्याप्रातिभासिकरूपेण च परिणम्य तिष्ठति। वस्तुतः ब्रह्मातिरिक्तं सर्वं मिथ्या इत्यतः सत्तात्रैविध्यस्य अतात्विकत्वमेव आगच्छति। अवाध्यत्वमेव तात्विकत्वस्य प्रयोजकम्। तच्च ब्रह्मातिरिक्तेषु नास्ति। नेह नानास्ति किञ्चन इति श्रुत्या सर्वोऽपि प्रपञ्चः बाधितः।

इदानीं प्रश्नः भवति ब्रह्म एव अद्वितीयं सत्यं चेद् इतरद्वयं किं सद्विलक्षणत्वेऽपि सत्त्वेन प्रतिभाति उत सत्ताया एव अवान्तरभेद इति। उच्यते अद्वैते भ्रमस्थले प्रतिभासिकरजतस्य उत्पत्तिः स्वीक्रियते इत्यतः ज्ञायते यद् रजताभावे रजतबुद्धिः यथा न भवति तथा सत्ताभावे न सत्ताबुद्धिः। द्वितीयकल्पे च आरोपितानारोपितोभयसाधारणसामान्यधर्माभावात् सत्तायाः

---

[१] तच्चानभिव्यक्तं निर्विकल्परूपमाच्छादितदीपवन्न प्रकाशकम् (अद्वैतसिद्धिः)

अवान्तरभेदः अनुपपन्न इति चेत् न अबाध्यत्वरूपसामान्यधर्मयुक्तत्वात्। आरोपितवस्तुनः कालान्तरे बाधितत्वेऽपि स्वकालाबाध्यत्वादबाध्यत्वं तस्य। अन्यथा भ्रमाधीनप्रवृत्तिः अनुपपन्नं स्यात्। यदुक्तं संक्षेपशारीरके–

आकाशादौ सत्यता तावदेका
प्रत्यङ्मात्रे सत्यता काचिदन्या।
तत्सम्पर्कात् सत्यता तत्र चान्या
व्युत्पन्नोऽयं सत्यशब्दस्तु तत्र॥

इति। अर्थात् आकाशादिषु व्यावहारिकी सत्ता। प्रत्यगात्मनि शुद्धचैतन्ये त्रैकालिकाबाध्यत्वरूपसत्यता विद्यते। एवं व्यावहारिकपारमार्थिकयोः तयोः तादात्म्यवशाद् उपहितचैतन्ये काचिद् भिन्ना सत्यता सिध्यति। यथा प्रतिभासिके रजते रजतत्वं ज्ञातैकसत्, लौकिकपारमार्थिके रजते तदज्ञातसत्। उभयत्रापि रजतत्वं समानम्। तद्वत् सत्यताया अपि "सत्यस्य सत्यं प्राणा वै सत्यं तेषामेष सत्यम्" इति श्रुत्या। लौकिकपारमार्थिकं वस्तु सत् चेदपि न अनारोपितम्। एवं सत्तायाः स्वीकरणात् ज्ञानात् प्राक् तस्य उत्पत्तिः अपि न अनुपपन्ना।

व्यावहारिकप्रतिभासिकयोः तुल्यत्वे तयोः पार्थक्यं किमिति चेदुच्यते व्यावहारिकस्य पदार्थस्य यथा अर्थक्रियाकारित्वमस्ति प्रतिभासिकस्य तथा नास्ति।

अर्थात् सत्तात्रैविध्यस्वीकाराज् ज्ञानात् प्राग् वस्तुनः अज्ञातसत्ताया व्यावहारिकरूपेण अङ्गीकृतत्वात् प्रतिकर्मव्यवस्था उपपद्यते। अस्मिन् मते एकमेव वस्तु साधारणतया सर्वेषां ज्ञानविषयो भवति। तज्ज्ञानं भिन्नेषु कालेषु एव भवेदिति न नियमः। अपि तु एकस्मिन्नेव काले बहूनां ज्ञानविषयो भवति। इन्द्रियसन्निकर्षानुसारेण यदा यस्यान्तःकरणं यदाकारेण परिणमते तदा तस्य तद्विषयकं ज्ञानमुत्पद्यते। ये च तत्र दृष्टिसृष्टिवादिनः तेषां मते तु वस्तुन अज्ञातसत्ताभावात् प्रतिकर्मव्यवस्था अनुपपन्ना। प्रतिकर्मव्यवस्थाया उपयोगः नास्तीति तेषामाशयः। ईश्वरनिर्मितमिदं जगत् पूर्वत एव सत्। प्रमाणेन कस्मिंश्चित् काले तज् जीवस्य ज्ञानविषयो भवति। ईश्वरः तत्र स्रष्टा जीवश्च द्रष्टा। इति सृष्टिदृष्टिवादिनामाशयः। एतदेव प्रतिकर्मव्यवस्थाया मूलतत्त्वम्।

## १३. उपसंहारः

दृग्दृश्यसम्बन्धविचारविषये बहवः विचाराः वर्तन्ते। प्रतिकर्मव्यवस्थाविषयेऽपि सन्ति नैके विचाराः। परन्तु तयोः प्रथमः

उत्तमाधिकारिणां कृते अन्यः च अधमाधिकारीणां कृते अद्वैतशास्त्रे चर्चितः। अद्वैतदर्शनस्य सर्वोच्चसिद्धान्तानुसरं प्रतिकर्मव्यवस्था नोपपद्यते। तथापि तद् न दोषाय, यतो हि इयं व्यवस्था निम्नाधिकारिणां कृते विहिता। द्वैतसंस्कारस्य प्राबल्यात् अद्वैतं तैः न साक्षात् अङ्गीक्रियते। तस्मादुच्यते वार्तिककृता–

यया यया भवेत् पुंसां व्युत्पत्तिः प्रत्यगात्मनि।
सा सैव प्रक्रिया ज्ञेया साध्वी सा चानवस्थिता॥

☆ ☆ ☆

## परिशीलनीयग्रन्थसूची

१. सुब्रह्मण्यशास्त्री, एम्.वि. (सम्पा.). (२०१०). सिद्धान्तसिन्धुः. तिरूपतिः : राष्ट्रियसंस्कृतविद्यापीठम्।

२. मुदिवेडु-चन्द्रशेखरः (सम्पा.). (२०१२). तत्त्वचन्द्रिका. नवदेहली: राष्ट्रिय-संस्कृतसंस्थानम्।

३. Panigrahi, Nirmal Kumar. (1994). *Advaitavedānte Pratikar-mvyavasthā (Manameyavyavasthā)*. Calcutta : Sanskrit College.

४. Kar, Minati. (1996). *Advaitavedānte Pratyakṣasvarūpavicāra*. Calcutta : Sanskrit College.

५. *Vicara Sagarm* In Sanskrit. (1964). Madras : Vasudeva Brahmendra Saraswati Swamigal Library Committee.

# कवेः सीतानाथस्य काव्येषु प्रतिबिम्बिता सामाजिकी समस्या

तन्मयकुमारभट्टाचार्यः*

पश्चिमवङ्गप्रान्ते अर्वाचीनसंस्कृतसाहित्यरचनापरिसरे सीतानाथ-आचार्य-शास्त्रिणः नाम सुतरामेव देदीप्यते। कारयितृभावयितृप्रतिभयोः निरवद्यसमन्वयभूमिरयं कविः। कलिकाता-विश्वविद्यालयस्य महामहोपाध्याय-गोपीनाथकविराजप्रवराध्यापकपदम् अनेन सुचिरम् अलङ्कृतम्। कविरयं कृष्णात्रेयगोत्रसम्भव इति कृत्वा क्वचित् क्वचित् कृष्णात्रेयकविनाम्ना परिचीयते। अस्यैव कविवरस्य काव्यकृतीः समधिकृत्य एकां सामासिकीं समीक्षां विधातुं कृतमतिरस्मि। आदावेव तेन रचितानां काव्यकृतीनां विवरणं प्रदीयते-

**भावविलसितम्**[१]-कवितासङ्कलनग्रन्थः, अत्र विद्यन्ते पञ्चविंशतिसङ्ख्यकाः स्वरचिताः संस्कृतभाषोपनिबद्धाः कविताः, वङ्गभाषानिबद्धाः षट् कविताः, अनुवादकविताद्वितयी – एका आङ्ग्लभाषातः अपरा वङ्गभाषातः संस्कृतभाषायामनूदितकविता। प्रायेण सर्वासां संस्कृतकवितानां वङ्गभाषायां गद्यैः पद्यैर्वा अनुवादोऽपि वर्तते।

**शिशुयुवदुर्दैवविलसितम्**[२]-पश्चिमवङ्गे नदीयामण्डलान्तःपातिनि देवग्राम-स्वास्थ्यकेन्द्रे ४.४.१९९५ दिनाङ्के पोलिओवाक्सिन् इति औषधस्य प्रयोगसमयतः चतुर्विंशतिघटिकाभ्यन्तरे बहवः शिशवो मृता इति दौर्भाग्यजनकेन वृत्तेन शोकाभिभूतस्य कविचेतसोऽभिव्यक्तिरियं कृतिः। यद्यपि दुर्घटनाविशेषमवलम्ब्य काव्यस्यास्य समारम्भस्तथापि साम्प्रतिके समये परिलक्ष्यमाणायां शिशुयुवजनानां

---

*सहायकाचार्यः, प्राच्यविद्याविभागे, सर्वकारीयसंस्कृतमहाविद्यालये, कोलकातायाम्, पश्चिमवङ्गेषु।

[१] काव्यम्-भावविलसितम्, कविः सीतानाथ आचार्यः, प्रकाशिका- श्रीमती दीप्तिमिश्र, रॉयेल इण्डियान पब्लिकेशन्, प्राप्तिस्थानम्- संस्कृतपुस्तकभाण्डारम्, ३८- विधानसरणी, कलिकाता-६।

[२] काव्यम्- शिशुयुवदुर्दैवविलसितम्, कविः सीतानाथ आचार्यः, प्रकाशिका- श्रीमती दीप्तिमिश्र, रोयेल-इण्डियान-पब्लिकेशन्, प्राप्तिस्थानम्- संस्कृतपुस्तकभाण्डारम्। ३८,विधानसरणि, कलिकाता-६।

दौर्भाग्यवर्णनपरम्परायां काव्यस्यास्य पर्यवसानम्। कविना समग्रमेव काव्यम् आङ्ग्लभाषायामनूदितम्।

**का त्वं शुभे**[३]–प्रोद्दामप्रेमोपजीव्यमिदमेकं गीतिकाव्यम्, यस्मिन् उच्चकोटिकस्य प्रेम्णो विविधं चित्रमस्ति चित्रितम्। कृतेरस्याः अत्र कविकृत आङ्ग्लभाषानुवादोऽपि संयोजितोऽस्ति।

**काव्यनिर्झरी**[४]-अयमपि कश्चन कवितासङ्कलनात्मको ग्रन्थोऽस्ति। अत्र सङ्कलिता विद्यन्ते द्विचत्वारिंशत् कविरचिताः कविताः, वङ्गभाषातः अनूदिताः तिस्रः कविताश्च। साकल्येन पञ्चचत्वारिंशत् कविताः सन्त्यत्र कृतौ सङ्कलिताः।

**गौरीनाथचरितम्**-आन्तर्जातिकख्यातिभाजः प्राच्यतत्त्वविदुषः गौरीनाथशास्त्रिणः जीवनचरितम् अस्ति काव्यस्यास्योपजीव्यम्। संस्कृतसाहित्यपरिषत्पत्रिकायां काव्यमिदं प्रकाशितमभूत्।

एतद्व्यतिरेकेणापि प्रकाशिता अप्रकाशिताश्च अनेकाः कविताः कविनानेन रचिताः वर्तन्ते। तासु कासाञ्चन कवितानां प्रकाशनं भवत्येव। कवेरस्य काव्यकृतिषु विषयवैचित्र्यं सुतरामेव लक्षणीयम्। कविनानेन वन्दनात्मिकाः सङ्ख्याधिकाः कविताः रचिताः। तत्र देववन्दनात्मिकासु कवितासु विद्यन्ते – वाणीवन्दना, दशमहाविद्यारूपाया दुर्गाया वन्दना, महादेवमहिमपञ्चकम्, सन्तोषीमातृकास्तोत्रम्, वेदवाणीवन्दना चेति। क्षित्यप्तेजोमरुद्व्योमरूपाणां पञ्चानां भूतानां वन्दनात्मिकाः कविताश्चापि अनेन रचिताः। सिद्धसाधकानां महापुरुषाणां वन्दनापि कृतानेन संस्कृतभाषया। एतादृशीषु कृतिषु ओङ्कारनाथवन्दना, अनुकूलचन्द्रवन्दना, निगमानन्दवन्दनम्, रामकृष्णस्तवनम्, सारदास्तवनम्, विवेकानन्दवन्दनम्, लोकनाथस्तोत्रम्, अरविन्दवन्दनम्, चैतन्यस्तोत्रम् एवमादयः विशेषतः समुल्लेखमर्हन्ति। विश्वकवेः रवीन्द्रनाथस्य तथा वङ्गीयौपन्यासिकस्य शरच्चन्द्रस्य प्रशस्तिरपि कविना कृता। शिक्षागुरूणां शिक्षागुरुसदृशाञ्च केषाञ्चिद्वन्दनाऽपि विरचितानेन। तादृशीषु कवितासु गुरोः सुखमयस्य सपर्या,

---

[३] काव्यम्- का त्वं शुभे, कविः सीतानाथ आचार्यः, प्रकाशिका- श्रीमती प्रार्थनादेवी, ए.एफ्.१७७, रवीन्द्रपल्ली, कोलकाता-२००३।

[४] काव्यम्- काव्यनिर्झरी, कविः सीतानाथ आचार्यः, प्रकाशकः-निखिलेशचक्रवर्त्ती, प्रकाशनम्-विजयायनम्, ८वि, कालेज रो, कलिकाता-७।

आचार्यं विवन्दे रमारञ्जनम्, सीतानाथगुरुं वन्दामहे, नमामि नलिनीकान्तम् इत्यादयः प्राधान्यं लभन्ते। देशमातृकायाः वन्दनात्मिकाः काश्चन कविता अपि पर्यायेऽस्मिन् अन्तर्भवन्ति। अभिनन्दनात्मिकासु कवितासु जयति मानवेन्दुः, कुलपतेः राधावल्लभस्याभिनन्दनम्, करुणासिन्धुवर्धापना इति त्रयं समुल्लेखनीयम्। देवतावन्दनात्मिकाः स्तुतयो यद्यपि ऐतिह्यानुसारिण्या रीत्या विनिर्मितास्तथापि कविप्रतिभायाः काचिन्नवीनोद्भावनशीलता क्वचित् क्वचिन् नयनयोर्नापतीति न। वाणीवन्दनातः एकः श्लोकः समुद्ध्रियते–

हर्षादागमजात् स्रुताक्षिसलिलं पाद्याय ते कल्प्यतां
चित्तं दत्तमिदं तवासनतया तस्मिन् सुखं स्वास्यताम्।
भक्त्या त्वत्परया मरालगमने! पुष्पाञ्जलिर्दीयते
साष्टाङ्गं प्रणिपत्य भूमिवलये पादञ्च ते वन्द्यते॥

(भावविलसितम्, पृ.-४, श्लो.-९ )

अत्र वाग्देव्याः प्रपूजनं कविना स्वोद्भावितया नवीनया दिशा समाचरितम्। कवेरस्य वन्दनात्मिकां कवितां समीक्षमाणेन राधावल्लभत्रिपाठिमहाभागेनोक्तम् -"अस्य स्तोत्रकाव्यानि क्वचिच्छङ्कराचार्यस्य सौन्दर्यलहरीं क्वचिच्च रावणकृतं शिवताण्डवस्तोत्रं स्मारयन्ति। ताण्डवनृत्यस्य वैश्विकं रूपमनेनालौकिकदृशैवोद्घाटितम्–

शिवस्य चण्डताण्डवध्वनत्पदक्रमाङ्किता
ससागरा प्रकम्पते वसुन्धरा सपर्वता।
भुजाभिघातविक्षता भवन्ति तारका ग्रहा
जटाघटाविघट्टिता स्थली दिवोऽस्थिरा तथा॥

(पुरोवाक् राधावल्लभत्रिपाठिवर्यस्य, काव्यनिर्झरी, पृ.१० )

वन्दनात्मिकासु कवितासु कविचेतसः सारसिकी भक्तिधारा समभिव्यज्यमाना सहृदयहृदयान्यपि प्लावयन्ति प्रीणयन्ति च। एतासु कवितासु बहुत्र सङ्गीतधर्मिता हृदयमावर्जयति। दिङ्मात्रमुदाहरणं यथा सारदास्तवनतः-

यत्पदं चेतसा भावितं सेवितं संसृतेर्वारिधेरुत्तमं तारकम्।
शक्तिदं भुक्तिदं मुक्तिदं सन्ततं तामहं सारदां मातरं संभजे॥

(सारदास्तवनम्, पृ.१३, श्लो.४)

कवेरस्य देशवन्दनात्मिकासु कवितासु भारतमाता, देशमातृकावन्दनम्, भारतं भ्राजते, इति त्रयं विशेषतः समाकर्षकम्। एतासां कवितानां प्रतिस्तबकं

प्रतिश्लोकं वा कविना स्वजन्मभूमेर्महिममयं चरित्रं निरवद्यया रीत्या लिखितम्। भारतं भ्राजते इत्येतस्याः कवितायाः प्रत्येकं श्लोकः सङ्गीयमानः भारतगौरवं स्मारयन् समुद्वेलयति हृदयं शिहरयति च शरीरावयवानि। दिग्दर्शनन्यायेन श्लोकद्वयमुद्धियते–

उत्तरे प्रान्तरे पर्वतो दुर्गमो विद्यते सन्ततं रक्षणे तत्परः।
दक्षिणे प्रान्तरे सागरो दुस्तरो वारिभिर्वन्द्यते पादकं यस्य च॥
पूर्वके प्रान्तरे मालया पर्वताः संस्थिताः पश्चिमे मारवी मृत्तिका।
सर्वतो रक्षितं गङ्गया प्लावितं भारतं भ्राजते मातृभूर्नश्चिरम्॥
(भारतं भ्राजते, पृ.५२, श्लो.१,२ )

विद्वद्वरेण्यः काव्यमीमांसकः करुणासिन्धुदासमहाभागः कवेरस्य देशमातृकावन्दनमिति कवितायां जयदेवीयगीतगोविन्दस्य वङ्किमचन्द्ररचितस्य वन्देमातरमिति गीतस्य च प्रतिध्वनिं शृणोति। तेन समुद्धृतः काव्यांशः एवम् - "त्वमसि मम ध्यानम्, त्वमसि मम ज्ञानम्, त्वमसि मम जीवनम्, त्वमसि मम शरणम्, त्वमसि मम क्रीडास्थानम्, त्वमसि मम भोगभवनम्॥"[5] अत्र त्वमसि पदेन देशमातृका परामृश्यते। गुरूणां गुरुकल्पानाञ्च वन्दनाविधौ याः कविता विरचिताः श्रीमता शास्त्रिणा ता अपि काव्यसम्पदा निरवद्या एव। गुरोः सीतानाथगोस्वामिनः बाह्योपचारनिरपेक्षम् आन्तरैश्वर्य्यसमृद्धं चरित्रं चित्रयता कविनोक्तम्–

अन्तरैश्वर्यप्राचुर्यात् परितृप्तोऽसि हे गुरो।
उपचारविधिर्बाह्यस्तृप्तये स्यात् कथं तव॥
कस्तूरिकासौरभमुग्धचित्तः
स्वच्छन्दवृत्तिर्हरिणो वनान्ते।
प्राप्नोति तृप्तिं किमु हन्त गन्धे
वस्त्वन्तरोत्थे सुरभौ कदाचित्॥
(सीतानाथगुरुं वन्दामहे, पृ.२३, श्लो.६,७)

कवेरस्य काव्यकृतौ शोकात्मिकाः काश्चन कविताः परिप्राप्यन्ते, यासु कवितासु लोकान्तरं प्रस्थितानां जनानां महतो गुणान् स्मारं स्मारं विलपति कविचित्तम्। एतासु कवितासु करुणरसधारा स्वत एव समुच्छलिता

[5] तत्रैव, पृ.१२, उपोद्घातः (करुणासिन्धुदासमहाभागस्य) देशमातृकावन्दनम्-पृ.१८।

परिलक्ष्यते।दिङ्मात्रमुदाहरणं यथा–

तमग्रजन्मानमतीव स्निग्धं तं प्रेमसिन्धुं सुहृदां वरिष्ठम्।
न्यायस्य पाठग्रहणे गुरुं तं श्यामापदं शोकहताः स्मरामः॥
( श्यामापदं शोकहताः स्मराम, पृ.६८, श्लो.५)

परमप्रियं सारस्वताग्रजं श्यामापदमिश्रमहाभागं संस्मरता कविनैवमुक्तम्।

कवेरस्य बहुषु काव्येषु साम्प्रतिकसमाजजीवनस्य प्रतिबिम्बनमालोक्यते। शिशुयुवदुर्दैवविलसितमिति सम्पूर्णमेव काव्यं साम्प्रतिकं समाजचित्रं विषयीकृत्य विरचितमस्ति। पोलिओ वाक्सिन् इति प्रतिषेधकस्यौषधस्य अपप्रयोगात् शिशूनां बहूनामकालमृत्योः करुणं चित्रं कविनाऽतीववास्तवोचितया भङ्ग्या काव्यस्यास्य प्रारम्भिके पर्याये वर्णितम्। तत्र दिङ्मात्रमुदाहरणं प्रदीयते। सोमानामिकायाः कस्याश्चिद् बालिकायाः करुणकरुणं मृत्युदृश्यं चित्रयता कविनोक्तम्-(१३श्लोकेन)

सोढुं ज्वरं क्षमबला न हि कोमलाङ्गी
मामेति रोदनपरा सुचिराय सोमा।
मातुः प्रियाङ्कशयने सुखसुप्तिमाप्ता
पाषाणमूर्तिरभवज्जननी च शोकात्॥
(शिशुयुवदुर्दैवविलसितम्, पृ.२, श्लो.१३)

सोमानामिका काचिद् बालिका तीव्रं ज्वरं सोढुमक्षमा "मा मा" इति वदन्ती रुदन्ती च शनैः शनैः मातुः क्रोडे एव चिराय निश्चलाभवत्। अत्र कविना सोमायाः मरणचित्रं यथोचितशब्दार्थसाहित्येन सम्यक् समुपस्थापितम्। प्रसङ्गेऽस्मिन् केषुचित् श्लोकेषु सर्वकारीयव्यवस्थां प्रति कविना व्यङ्ग्यात्मिकाः कटुकटाक्षा निक्षिप्ताः। एवं वृत्तविशेषमवलम्ब्य विगलत्स्वभावा कविचित्तधारा क्रमेण वर्तमानसामाजिकपरिमण्डले वर्धमानाः शिशूनां युवजनानाञ्च ज्वलत्स्वभावा विविधाः समस्या विषयीकरोति। अवाञ्छितस्य भ्रूणस्य विनाशः, अवैधस्य सन्तानस्य परित्यागः, शिशुभिक्षुकाणां तथा बालश्रमिकाणां दुर्दशा, दुर्गतानां तरुणीनां देहोपजीव्यता – एवमादयः काश्चन समस्याः अत्रोपस्थापिताः कविना वास्तवोचितया भङ्ग्या। भिक्षाप्रवृत्तानां शिशूनां कदर्थनाचित्रमुपस्थापयता कविनोक्तम्–

क्षुत्क्षामकण्ठविवरा विवरागताक्षाः
पृष्ठप्रलीनजठरा अतिरुक्षकेशाः।
जीर्णाम्बराश्च विगताम्बराश्च केचिद्

भिक्षार्थिनो मलमयावयवा भ्रमन्तः॥३६॥
द्वित्रानवाप्तुमनसश्च कपर्दखण्डान्
शुभ्रच्छदां विचरतां चरणे पतन्ति।
अन्विष्यतां किमपि कार्यमलं हि भैक्षे
रे गर्दभा व्रजत दूरमिति ब्रुवाणैः॥३७॥
रूक्षं निराकृततमाः शिशुभिक्षवस्ते
निःशब्दरोदनरतानगलदश्रुधाराः।
घूर्णन्ति तेऽथ शिरसा तमसीव मग्नाः
शून्यायते जगदिदं नयने तथैषाम्॥३८॥
(तत्रैव , पृ.५, श्लो. ३६, ३७, ३८।)

काव्यं वैचित्र्यमण्डितं कर्तुकामेन कविना कंसस्य हिरण्यकशिपोः कुन्त्याश्च पौराणिकाख्यानानामवतारणा विहिता। त्रिषु एषु आख्यानेषु शिशून् प्रति अत्याचारोऽविचारश्च दृश्येते।

कवेरस्य आधुनिककाश्यपस्योपदेश इति कवितायां कासाञ्चित् साम्प्रतिकानां नारीणां विकृतं चरित्रचित्रं समुपस्थापितं विभाति। कवितेयं शाकुन्तलस्थितस्य "शुश्रूषस्व गुरून्" इत्याद्युपदेशस्य व्यङ्ग्यानुकरणम्। विषयेऽस्मिन् दिङ्मात्रमुदाहरणं यथा–

शुश्रूषस्व वरं तथाभिनयतः स्वल्पैरहोभिर्यथा
जामाता भविता त्वदेकशरणः स्वातन्त्र्यहीनश्चिरम्।
कन्ये क्रीडनमेव ते तदनु भोः प्रारभ्यतां कौशलात्
पित्रादेः स्वजनाद् यथा स कृपणो विच्छिन्नमूलो भवेत्॥८॥
(आधुनिककाश्यपोपदेशः, काव्यनिर्झरी, पृ.२८-२९, श्लो.८)

अस्यायमभिप्रायः- अयि पुत्रि! जामातरं प्रति सेवाभिनयस्तथा सम्यक् प्रदर्शनीयो यथा स्वल्पेन कालेन स व्यक्तित्ववर्जितस्तव वशमागच्छेत्। ततस्तं पित्रादेः स्वजनाद् विच्छेदनीयः। किञ्च यथा स "मन्येत मां स्वजनकं परमाभिराध्यं त्वन्मातरं स्वजननीमिव गर्भधात्रीम्।"[६] तथा त्वया चेष्टितव्यम्। "भर्तुर्विप्रकृतापि रोषणतया मास्म प्रतीपं गमः" इति काश्यपोपदेशःसाम्प्रतिके काले मूल्यहीन एव। पक्षान्तरे – समाधिकारितां पुत्रि न विस्मर कदाचन। भर्तुर्विप्रकृतिं जातु न सहस्व

[६] श्लो.१, पृ.२९, आधुनिककाश्यपोपदेशः, काव्यनिर्झरी,

कथञ्चन॥[७] कदाचिद् यदि जामाता क्रुद्धः सन् तां भर्त्सयेत्तर्हि अधिकवेगशालिना तव क्रोधेन स तपस्वी भर्त्सनीयः। तथा चोक्तम्- "महिलासमितिं यामि न्यायालयमतः परम्।"[८] सति प्रयोजने श्वश्रूदेवीं वृद्धावासं प्रापय। गृहस्थिता सा अन्तरान्तरा वित्रासनीया।

शोषिता जातिर्व्यक्तिर्वा शोषणकारिणीं जातिं व्यक्तिं वा प्रतिक्रमेण विद्वेषपरायणा भवति। तस्य चित्ते प्रतिशोधस्पृहा यदा प्रबलायते तदा भवति महाननर्थः। ऐतिहासिकस्यास्य सत्यस्य प्रतीकधर्मितया काव्यिकमुपस्थापनं परिलक्ष्यते कवेरस्य "सिगारेटस्यात्मकथे"ति कवितायाम्। तथाहि धूमपायिनां निःशेषशोषणेन येषामस्तित्वं विपद्यते तैर्धूमवर्तिकाभिरुच्यते- वयं धूमपायिनां शरीरे कर्कटरोगस्य विषं तथा सञ्चारयामो यथा तेषां मृत्युरनिवार्यो भवेत्। तथा च वर्णितं कविना–

इत्येवं पीड्यमानानां वञ्चितानाञ्च मानसे।
प्रतिशोधस्पृहा तीव्रा जायते मरणात्मिका॥१२॥
कर्कटादिरोगयुक्तान् तान् सर्वान् विदधत्यहो।
अस्मदीयदाहधूमस्तस्माद् देहे गतो द्रुतम्।१३॥
त्वरयत्यथ मृत्युञ्च तेषामाकालिकं बलात्।
भिषजां पश्यतामेव विशेषज्ञत्वशालिनाम्॥१४॥

(सिगारेटस्य आत्मकथा, पृ.३३, श्लो.१२-१४)

प्रतिवेशिनो राष्ट्रविशेषस्य आजन्मविद्वेषो विविधेषु तेनैव प्रारब्धेषु आक्रमणात्मकयुद्धेषु पराजयः, अन्तिमे पर्याये सन्त्रासात्मकेन च्छायायुद्धमाध्यमेन भारतवर्षस्य सुस्थितेर्विनाशाय विविधाः प्रचेष्टाः, विषयेऽस्मिन् समुन्नतशक्तिभाजां राष्ट्राणाम् उपेक्षात्मिकाः नीतिरित्येतत् सर्वमस्ति वर्णितं "सन्त्रासविभीषिका" इत्येतस्याम् आचार्यकवेः कवितायाम्। कविराशां पोषयति यद् भारतं स्वशक्त्यैव प्रवर्तितस्यास्य सन्त्रासस्य निर्मूलनं कर्तुं शक्नुयात्। भारतसैनिकान् समुद्दिश्य कविः ब्रवीति –

अभ्यन्तरे सीमनि चाति दुर्गमे
स्थले स्वदेशस्य जले तथाम्बरे।

---

[७] श्लो.१२, तत्रैव।

[८] श्लो.१४, तत्रैव।

प्राणान् पणीकृत्य कृताभिरक्षणाः
सन्त्रासशीलानभिहन्तुमुत्सुकाः ॥ ४७ ॥
हे सैनिका भारतमातृरक्षका
जानीत वः पौरुषयज्ञसाधने।
सर्वे वयं भारतराष्ट्रवासिनश्चिरं
भवामो भवतां समीपगाः ॥ ४८ ॥
(सन्त्रासविभीषिका, पृ. ४०, श्लो. ४७, ४८)

प्रवर्तितस्य सन्त्रासस्य निर्मूलनविधौ विश्वराजनीतौ सर्वोच्च क्षमताधिकृतस्य राष्ट्रविशेषस्य द्विचारितामभिलक्ष्य कविनोक्तम्-

सन्त्रासवादस्य करिष्यते ध्रुवं, निर्मूलनं भो त्वरितं यथोचितम्।
तेषां किल घोषणमेतदुत्तमं पुनः पुनः श्रूयत एव कर्णयोः ॥ ३० ॥
द्विचारिता कापि तु कर्मपद्धतौ केषाञ्चिदेषामभिलक्ष्यतेतराम्।
सन्त्रासनाशे किल घोर आहवः स्वराष्ट्रनीतिः किल काङ्क्षिता परम् ॥ ३१ ॥
सन्त्राससम्बाधप्रबाध्यमान-राष्ट्रान्तरार्थे तु सहिष्णुतैव।
आस्थीयतामित्युपदेशदानं सयत्नमेषां परराष्ट्रनीतिः ॥ ३२ ॥
(सन्त्रासविभीषिका, पृ.३९,श्लो.३०-३२ )

कवेरस्य "महारुद्रः सज्जीभवति ताण्डवे" इति कवितायाम् अशान्तायाः विश्वस्थितेः काश्चन भयङ्कर्य्यो दिशश्चित्रिताः परिलक्ष्यन्ते। तथाहि नारीत्वस्यावमानना, नारीत्वं प्रति पशुसुलभमाचरणं, धर्मान्धता, चिन्तने वाचने आचरणे च भिन्नता, सामाजिकसमुन्नतेः प्रतिबन्धकरूपेण धनपुञ्जवादस्य एकतो निन्दनम्, व्यक्तिस्वार्थे दलस्वार्थे च पुनस्तस्यैव धनपुञ्जवादस्य समाश्रयणम् इत्येवं विधानां भ्रष्टाचाराणां विविधा दिशश्चित्रिता आलोक्यन्ते निरुक्तायां कवितायाम्। किमधिकं शिक्षाक्षेत्रे भ्रष्टाचारस्य आभासोऽप्यत्र परिलक्ष्यते प्राध्यापकानां विद्यापणिकतया। तथा चोक्तं कविना –

छात्रवात्सल्यनिःशून्या त्यक्तदेशहितैषणा।
चरित्रगौरवैर्हीनाध्यापनेच्छा विवर्जिता ॥ १३ ॥
क्षमतालिप्सया युक्ता स्वार्थसाधनतत्परा।
शिक्षाक्षेत्रे कियत्कालं विद्यापणिकता चलेत् ॥ १४ ॥
(महारुद्रः सज्जीभवति ताण्डवे, पृ.४५, श्लो. १३,१४)

आधुनिकस्थितिवर्णनपरासु कवितासु "नागमो धरणीप्रान्ते" इत्यपि

एकतमा। अनागतान् शिशून् समुद्दिश्य कवितेयं विरचिता वर्तते। कवितायामस्यामाधुनिक्याः पृथिव्याः भयङ्करतायाश्चित्रं समङ्कितं विभाति। प्रस्तरनिर्मितानामायुधानां धातुनिर्मितानामाग्नेयास्त्राणाञ्च समयमतिक्रम्य अद्यतनी पृथिवी पारमाणविकास्त्रकवलिता सुतरामेव विपद्यते। पारमाणविकास्त्रसम्भार-समृद्धानां राष्ट्राणामस्त्रागारसमूहे विद्यमानेषु अस्त्रेषु कतिचन एवास्त्राणि पृथिव्या अस्या अस्तित्वस्य विलोपाय पर्याप्तानि सन्ति। तथा चोक्तं कविना –

राष्ट्राधीशविशेषाणां भाण्डारे योऽति सञ्चयः।
तिष्ठत्याणविकास्त्राणां तस्य कतिपयैरहो॥९॥
चिरं ध्वस्ता भवेन्नूनं धरणीयं निमेषतः।
संहाराधीशरुद्रस्य भविता न प्रयोजनम्॥१०॥

(नागमो धरणीप्रान्ते, पृ.४२, श्लो. ९,१०)

अद्यतन्याः पृथिव्या अङ्गानि यत्र तत्र क्षतानि विक्षतानि शोणितरञ्जितानि च। क्वचिन्मात्रा पित्रा उभाभ्यां वा वियुज्यन्ते सन्ततयः। क्वचिद् वा सन्तानविनाशस्य शोकं हृदये धृत्वा जीवन्ति पितरो मातरश्च। विनष्टपतिकायाः स्त्रियः करुणार्तनाद-क्वचित् क्वचिदायाति श्रवणमार्गम्। मानवाकृतिभिर्दानवैरपहृतः धरण्याः श्यामलिमा। एवमन्वहं पृथिव्याः परिणतिः भयङ्करतातो भयङ्करतां व्रजति। अतश्च कविरनागतान् शिशून् समुद्दिश्य सावधानवाणीमुच्चारयति विपर्यस्तायामस्यां धरण्यां तैः कथमपि नागन्तव्यम्, स्थातव्यञ्च तैः आनन्दलोके। कविना आशास्यते भयङ्करतमपरिणतेः परं नवीना सृष्टिः प्रादुर्भवेत्। तदा ऋतस्य सत्यस्य च प्रदीप्तरश्मिभिः पृथिवीयं द्युतिमती भवेत्। सुषमस्थितिशालिन्यां तस्यां पृथिव्यां यथेच्छं समवतरन्तु नाम शिशव इति कवेराकुतिः। तथा चोक्तं कविना–

तस्माच्छिशो त्वं क्रीड कल्पलोके
प्रभातपुष्पोपमशुद्धदीप्ते।
अनागतोऽद्यापि यथाभिलाषं
सृष्टौ किलास्यां विनिपातितायाम्॥१७॥
नवीनसृष्टौ सुषमस्थितायाम्
ऋतेन सत्येन समन्वितायाम्।
प्रशान्तसौन्दर्यविभूषितायां
समागमिष्यन् भव हे महीयन्॥१८॥

(नागमो धरणीप्रान्ते, पृ.४३, श्लो. १७,१८)

विंशशताब्द्या अष्टनवतितमे खीष्टवर्षे (१९९८) तदानीन्तनस्य प्रधानमन्त्रि-वर्यस्य अटलविहारिवाजपेयिनः शासनकाले पोखराणनामके स्थाने परीक्षामूलके पारमाणविकविस्फोरणे अस्माकं जातीयानुभूतेस्तथा विश्वप्रतिक्रियायाः काव्यिकी प्रतिच्छविः प्रतिबिम्बिता विभाति कवेरस्य "बुद्धः स्मयमानः" इति कवितायाम्। विश्वराजनीतेः घृण्यकपटचारिताहेतोः भारतस्य सार्वभौमत्वे समाशङ्कापदवीं नीते एतादृशं विस्फोरणं जातेरात्मप्रत्ययं वर्धयति। सुदीर्घसांस्कृतिकैतिह्येन बलवत्तमं भारतं विश्वराजनीतौ नायकायमानानां राष्ट्राणां नेतृणाञ्च भयं विलोभनं वा तृणाय मन्यते। तथाचोक्तं कविना-

ये नाम केचिदिह नोऽतिविभीषयन्ते
ये नाम केचिदिह नश्च विलोभयन्ति।
जानन्ति ते किमपि कूटधियोऽस्मदीय-
देशस्य संस्कृतिगतं दृढशक्तिमत्त्वम्॥२३॥

(बुद्धः स्मयमानः, पृ.३६, श्लो. २३)

तथापि यदि किमपि राष्ट्रान्तरं बलाद् भारतं प्रति अन्यायमाचरेत् तर्हि भारतवासिनो मिलितभावेन तस्य प्रतिरोधं कुर्य्युरिति स्वदेशवासिनः प्रति कवेरुदात्तमाह्वानम्-

तथापि जायेत यदीह कश्चित् सम्बाधसङ्घातमयः प्रकाशः।
सार्धञ्च केनापि मदोद्धतेन मात्सर्य्ययुक्तेन प्रभुत्वभाजा॥२४॥
अग्रेसरत्वे किल मातृभूमेस्तदात्मदानाय कृतप्रतिज्ञाः।
हे देशमातुः प्रियवीरपुत्रा भवन्तु सर्वे मिलिता भवन्तः॥२५॥

(बुद्धः स्मयमानः, पृ.३६, श्लो. २४)

शिल्पसमुन्नतिव्याजेन सर्वकारीयाविवेचकतां प्रति व्यङ्ग्यकशाघातात्मिका कविता "वद शिल्पसंस्कृते" इति। कृषिकर्म शिल्पकर्म चेति मिथः परिपूरके इति भारतीयमैतिह्यम्। कृषेः प्रतिकूलतया शिल्पसंस्थापनं भारतस्य समुन्नतेः न परिपोषकम्। अन्याय्येन पथा शिल्पस्थापनप्रचेष्टाया दुष्परिणामतायाः करुणं चित्रं कविनात्र समङ्कितम्। कवितायामस्यां प्रत्यक्षवृत्त्या शिल्पसंस्कृतिः यद्यपि अभियोज्यतां नीता तथापि परोक्षवृत्त्या तदानीन्तनसर्वकारस्य अविमृश्यकारिता धिक्कारपदवीं नीता। अन्तिमे सावधानवाणी एवं समुच्चारिता-

हे शिल्पसंस्कृते मान्ये सावधानं विभावय।
इतिहासगतेः शक्तिं स्मर विश्वनियामिकाम्॥

कृषिसम्पद्भवां दीप्तां पीडयित्वा च संस्कृतिम्।
प्राक्तनीं बान्धवीं ते च समृद्धिः का भविष्यति॥
जनावमाननावह्निः कणशो धुक्षते यदि।
प्रलयाग्निसमः काले विश्वं दन्दह्यते ध्रुवम्॥
(वद् शिल्पसंस्कृते, पृ.४६,श्लो. १४-१६)

राजनैतिकसमर्थनपुष्टानां विविधेषु क्षेत्रेषु नेतृत्वदाने व्यापृतात्मनां वङ्गभाषायां "दादा"इति सम्बोध्यमानानां जनानां दुष्कर्मजातस्य संक्षिप्तमेकमालेख्यं परिप्राप्यते दादाजनेति कवितायाम्। अत्र व्यङ्ग्यवृत्त्या एतेषां दुर्जनानां कुकीर्त्तेः चित्रं किञ्चित् चित्रयितुं प्रयतितं कविना। दिङ्मात्रमुदाहरणं यथा-

आसाद्य मानवं जन्म विस्तारय स्वपौरुषम्।
यथेच्छं क्रियतां बन्धो धर्षणमारणादिकम्॥ १५॥
केवलं शरणं याहि दादा-जनान् समीपगान्।
न ते शास्ति भयं किञ्चित् सम्भवेद् धरणीतले॥ १६॥
(दादा जनाः, पृ.४८, श्लो. १५, १६)

अन्यायेन पथा एतेषां वित्तप्राचुर्य्यजनितां विलासबहुलां जीवनपद्धतिं वर्णयता कविनोक्तम्–

"वासा"दि यानेन न साम्प्रतं ते,
व्रजन्ति कुत्रापि यथेव पूर्वम्।
"कारा"ख्ययानेन निजेन नित्यं
स्वच्छन्दतस्ते गमने रमन्ते॥ २४॥
(दादा जनाः, पृ.४९, श्लो. २४)

"सहसा पतिरप्यस्या उपाक्रमत रोदितुम्" "अरण्यषड्विंशिका" "कङ्काल" एवमादिषु कवितासु अपि साम्प्रतिकी सामाजिकी स्थितिः सुतरामेव प्रतिबिम्बिता वर्तते।

साहित्यं समाजश्चेति मिथः परिपूरकम्। समाजस्य विवर्तनेन सह संस्कृतेरग्रगत्या समं विवर्तते साहित्यस्वरूपम्। कविः प्रबलानुभूतिसम्पन्नः समाजिकविशेषः। समाजस्य सुखदुःखे आशानैराश्ये समुत्थानपतने न्याय्यान्याये प्रभृतीनि कविचित्तमुद्वेलयन्ति निरन्तरम्। तादृशस्य समुद्वेलितस्य कविचित्तस्य वाङ्मयाभिव्यक्तिस्तावत् काव्यम्। कविचित्तस्य तादृशानुभूतिप्रवणतामधिकृत्य कविसार्वभौमेन रवीन्द्रनाथेनोक्तम्- "पृथिवीर येथा तार यत उठे ध्वनि, आमार

वाँशीर सुरे साडा तार जागिवे तखनि।"(यावन्तो यत्र ध्वनय उत्तिष्ठन्ति महीतले। मम वंशीस्वरे तेषां प्रतिध्वनिर्भवेत्तदा॥)[९]

अर्वाचीनसाहित्यसमीक्षककविवरो राधावल्लभः त्रिपाठी तदीयेऽभिनवकाव्यालङ्कारसूत्रग्रन्थे "लोकानुकीर्तनं काव्यम्" इति काव्यलक्षणस्य व्याख्यानावसरे साहित्यसमाजयोरान्तरसम्बन्धमधिकृत्योक्तम्–

साहित्ये जीवनं सर्वं सर्वाङ्गीनं नवं नवम्।
प्रतिबिम्बत्वमायाति समुल्लसति वर्धते॥
अद्भुतः प्रतिबिम्बोऽयं बिम्बमेव विभावयन्।
संस्कुर्वन् जीवनं तस्मिन् समवेतो नवायते॥
जीवने चास्ति साहित्यं साहित्ये जीवनं तथा।
परस्परकृता सिद्धिरनयोः सम्प्रवर्तते॥[१०]

जगतोऽस्य सृष्टौ स्थितौ च प्रेम्णः अपरिहार्यता अवश्यमेवाभ्युपगन्तव्या। मानवानाम् उत्पत्तौ विकाशे प्रकाशे च प्रेम्णः गतिमत्ता सुतरामेव नेत्रपथमायाति। कवेरस्य दृष्टौ प्रेम्णो द्वैविध्यं परिस्फुरति – एवं सोपाधिकम् अपरं निरुपाधिकम्। पितृ-मातृ-सुत-सुता-प्रिय-प्रियतमादिषु परिलक्ष्यमाणं प्रेम सोपाधिकम्। आध्यात्मिकम् ईश्वरविषयकं वा प्रेम निरुपाधिकं प्रेम। "का त्वं शुभे" इति काव्यस्य समर्पणावसरे रच्यमानेषु श्लोकेषु कवेरस्य प्रेमविषयिणी दृष्टिरियं प्रतिभासमाना विलोक्यते। कवेरस्य प्रोद्दामप्रेमोपजीव्यं काव्यं "का त्वं शुभे" इति। काव्येऽस्मिन् कवेः प्रेमाभिसारिणी चित्तधारा शुभामुद्दिश्य तरङ्गिता वर्तते। शुभा कदाचित् कवेः समीपं समागता, क्षणं स्थिता ततः सा प्रस्थिता। शुभां प्राप्य कवेः सम्भोगात्मिका चित्तवृत्तिः समुद्वेलिता जाता। एतादृशस्य प्रेम्णः वर्णनं काव्यस्य प्रथमे भागे वर्तते। ततः शुभायाः प्रस्थानानन्तरं कवेश्चित्तं कियत्कालं यावत् वेदनाविधुरं जातम्। किन्तु गच्छत्सु कालेषु कविः धृतिमासाद्य शुभायाः प्रतिच्छविं समग्रे विश्वे द्रष्टुमनुभवितुञ्चारभते स्म। तथा चोक्तं कविना–

गच्छत्सु कालेषु सुतीव्रतागुणे

---

[९] पृ.४३५ (द्वितीयस्तबकम्), सूर्यावर्त(रवीन्द्रकवितासङ्ग्रहः) शङ्खघोषः, विश्वभारती, शान्तिनिकेतन।

[१०] सू.१.१.३., अभिनवकाव्यलङ्कारसूत्रम्, प्रो. राधावल्लभः त्रिपाठी, प्रका.सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, २००५।

वैधुर्यवह्नेः शमिते कथञ्चन।
शनैः शनैर्भावसमाधिमग्नता
काचिन्मदीये हृदये समागता॥ ३६ ॥
समाधिना तेन विमुक्तदृष्टिर्-
द्रष्टुं क्रमे तां नवप्रत्ययेन।
सान्निध्यमस्याञ्च लभे समन्तान्-
निवर्तितो नैव तु विस्मयो मे॥ ३७॥

(का त्वं शुभे, पृ.४, श्लो. ३६, ३७)

शुभाया इयमशरीरी सत्ता कविं सुचिरमनुप्राणयति प्रेरयति च। अयमेव काव्यस्य मुख्यविषयः। केयं शुभा – मानवी वा मानसी वा? इत्यस्मिन् विषये कविना स्पष्टविधया न किमप्युक्तम्। समीक्षकाणां निर्णयस्तु मानसीपरत्वे एव पर्यवस्यति। कवेः रवीन्द्रनाथस्य काव्ये एतादृशी प्रेमचिन्ता बहुत्र प्रतिबिम्बितैव। शुभा अत्र शाश्वतप्रेम्णः प्रतीकरूपेणापि ग्रहीतुं शक्यते। एतदेव कविना तुरीयप्रेमसंज्ञया काव्योत्सर्गावसरेऽभिहितम्। तच्च प्रेम परमात्माश्रयि।

जीवात्मा परमात्मना सहमेलितुमिच्छति, भागवतीं प्रेमधारामाश्रित्य भवत्तो भगवता सह मेलितुमिच्छति। भाग्यवशात् तादृशमिलनानन्दः क्षणमनुभूयते क्षणान्तरे च तिरोधीयते। एतदेव कविना प्रतीकरूपेणोपस्थापयता उक्तम्– "शुभा कदाचित् निशायां समागता निशात्यये च प्रस्थिता। तदनु तदीयचिन्ताव्याकुलितचेतसा कविना विश्वपरिक्रमा विहिता। अत्रोक्तं शुभापि कवेः कृते वरणमाल्यं ग्रथ्नाति। भाविनि काले कल्पलोके तयोर्मेलनं भवितेति कवेर्विश्वासः। जीवात्मा यथोचितसाधनसम्पत्त्या युतः परमात्मना सह मिलति, भक्तोऽपि लभते भगवतः सान्निध्यम्। काव्यस्यास्यैतादृशमभिव्यञ्जनं सहृदयवरिष्ठानां रमारञ्जनमुखोपाध्यायप्रमुखानां समीक्षादर्पणे प्रतिबिम्बितमाभाति।

"In this present lyric Sitanath Acharya has given expression to the longing of the man for union with his highest ideal, which is a conglomeration of Bliss, Beauty and Consciousness; he also presents the longing of this idea, the other name of which is the 'Sublime' for union with her mortal lover. It is for this reason that the lady stationed in the realm of Imagination is portrayed as preparing garlands for welcoming and honouring her consort.

The thought that this union is not going to materialise, however, brings tears on her eyes and these tears roll down her cheeks making her more beautiful."[११] कवेरस्य समुच्चकोटिकप्रेम्णः काव्यिकं रूपं यदस्माभिः प्रत्यक्षीक्रियते "का त्वं शुभे" इति काव्ये तस्य प्राथमिकः प्रकाशः पूर्ववर्तिनीषु कासुचित् कवितासु परिलक्ष्यते। तथाहि भावविलसितमित्यत्र स्थितायां २३सङ्ख्यकायां कवितायां रजनीगन्धानामिकायामेतदेवाभिव्यञ्जितमस्ति यत् प्रेम्णः अनुसरणे एव आनन्दः सौन्दर्यं वा न तु प्रेमास्पदस्य प्राप्तौ। रजनीगन्धानामकस्य कुसुमस्य सौन्दर्य्येण विमुग्धचित्तेन कविनोच्यते–

अयि रजनीगन्धे! अशिथलबन्धे! केवलं त्वां पश्यामि,
मनसा चानुभवामि, न तु त्वां स्पृशामि।
यदि भवति कामना मनसि मे जायमाना,
मम वासभवनविताने,
सञ्चित-सज्जित-फुल्लादाने,
कृत्रिमभाजने, तव संस्थापने।
तदा सौन्दर्यं भवेद् विखण्डितम्।
तव सौरभं भवेद् विबाधितम्॥४॥

(भावविलसितम्, रजनीगन्धा, पृ. ६९, श्लो. ४ )

भावविलसितकाव्यग्रन्थस्थितायां १८सङ्ख्यकायां कल्पनेति कवितायामपि कवेरस्योत्तुङ्गप्रेमसञ्चारमानसिकता सुष्ठु अभिव्यज्यमाना विभाति। गतानुगतिके प्रात्यहिके जीवनमार्गे सञ्चरन् कविः क्लान्तिमनुभवति। स कल्पनायाः कल्पितप्रेमिकायाः सङ्गसुखं याचते। सा कल्पना कल्पलोके मणिसिंहासने सन्निषण्णास्ति। सा कविं त्वरितमेव तस्याः समीपं नयनु इति प्रार्थ्यते कविना। तस्मिन् अमृतलोके कविः कल्पनायास्तस्याः केवलं सहचरो भूत्वा स्थातुमिच्छति काव्यञ्च नवनवं रचयितुमिच्छति। तथा चोक्तम्–

पिबतस्तव सङ्गमुत्तमममृतं पुण्यफलैकसाधनम्।
उदिता भविता क्षुधा तृषा नहि मे पार्थिवलोकसम्भवा॥ ११ ॥
त्वदीयसान्निध्यमजर्य्यमर्जयन्
    त्वदीयरागेण मनो विनोदयन्।
विश्वस्य वार्तां विविधां विलोकयन्

[११] पृ. ix , का त्वं शुभे, Foreword by Prof. Ramaranjan Mukherjee.

स्थास्यामि काव्यं मधुरं वितन्वन्॥ १२॥
(कल्पना, पृ. ५७, श्लो. ११, १२)

कवेरस्य काव्यं समीक्षमाणेन राधावल्लभत्रिपाठिमहाभागेन कासुचित् कवितासु कवेरस्यान्तर्मुखीनता परमोत्कर्षसीमानमधिरूढा सहृदयहृदयानि ह्लादयतीति वैशिष्ट्यमेकं निदर्शितम्। ईश हे दुःखशतं दीयताम्, चित्त रे बन्धनं छिद्यताम्, महासङ्गीतम्, सङ्कल्पः इत्यादीनि विशेषतः समुल्लेखार्हानि। ईश हे दुःखशतं दीयतामिति कवितायां कविना ईश्वरान्तिके प्रार्थ्यते -

ईश हे दुःखशतं दीयतां वेदनया विध्यताम्
चित्तमिदं मामकं पूततरीक्रियताम्।
वह्निना दाहितं शिल्पिना क्लेशितम्
ज्योतिषा भास्वता दीप्यते हेमकम्॥

(काव्यनिर्झरी, ईश हे दुःखशतं दीयताम्, पृ.५३, स्तबकः-९)

कवेरस्य विद्यन्ते काश्चन कविताः यासु वर्णना लभते प्राधान्यम्। शीतकालः, वसन्तः, वङ्गेषु विजया, विजया, दोलपूर्णिमा इत्यादयः कविताः अस्मिन् पक्षे अन्तर्भावयितुं शक्यन्ते। तत्र शीतकालस्य रुद्रमूर्तिं वर्णयता कविनोक्तम्–

त्रिबलिबलितभालः कम्बलैः संवृताङ्गो,
विपुलविशदकेशो यष्टिदण्डावलम्बी।
वनप्रकृतितरुण्या लास्यमास्यस्य हास्यं
दवयसि सहसा त्वं रौद्रमूर्ते हिमर्तौ॥ ६॥

(भावविलसितम्, शीतकालः, पृ.३५, श्लो.६)

विजयादशम्याः मिलनोच्छलमानन्दमयं रूपं वर्णयता कविना निगदितम्-

अद्येदं भुवनं विभात्यभिनवं दिव्यप्रभोद्भासितं
वस्त्रान्नादिगता गतेव नियता या भावना पार्थिवी।
सर्वे जीवगणाः प्रफुल्लमनसो लीनो विभेदोऽधुना
दूरादेत्य मिथो मिलन्ति मनुजाः स्निग्धैरधीरं जनैः॥ ६॥

(भावविलसितम्, वङ्गेषु विजया, पृ. २९, श्लो. ६)

दोलपूर्णिमाया निर्बाधानन्दप्रसृतिं वर्णयता कविना समीरितम्-

आभ्रं मर्दय रम्य आनने,
कुङ्कुममङ्कय देहविताने,

श्रृङ्कमानय जलमभिवर्षय
रञ्जय देहं रञ्जय चित्तम्,
इह दोलप्रसङ्गे नवजीवनरङ्गे।
(काव्यनिर्झरी, दोलपूर्णिमा, पृ. ५९)

कविरयं विद्वद्वरेण्यः तथा साहित्यसमीक्षकश्च। अनेन सम्पादिता विविधा ग्रन्थाः परःशताः गवेषणामूलकनिबन्धाश्च। कवेरस्य विद्वत्प्रज्ञां भावयित्रीं प्रतिभाञ्च प्रतिपादयति। विविधानां प्रबन्धानां प्रारम्भावसरे क्वचित् क्वचिदुपसंहारावसरे च अनेन याः स्वरचिताः कविताः सन्निवेशितास्तासां साहित्यिकगौरवमपि सुतरामेव समुल्लेखार्हम्। अपि चानेन वङ्गभाषातः आङ्ग्लभाषातश्च काश्चन कविताः संस्कृतेऽनूदिताः। रवीन्द्रनाथ-मधुसूदनदत्त-काजीनजरुलइस्लाम-सुकान्तभट्टाचार्यप्रमुखाणां वङ्गकवीनां काश्चन कविता अनेन संस्कृते सुष्ठु अनूदिताः। विषयेऽस्मिन् दिङ्मात्रमुदाहरणं यथा- मधुसूदनदत्तस्य “आत्मविलापः” इति कवितायाः अनुवादे परं कृतित्वं प्रदर्शितं कविनानेन–

रे मत्तचित्त मम ते भविता प्रभाता,
रात्रिः कदा तव च जागरणं कदा वा।
तज्जीवनोपवनयौवनपुष्पकान्तिस्-
तिष्ठेत् समुज्ज्वलतया समयं कियन्तम्॥ ३॥
नीरस्य बिन्दुर्वद चाकचक्यं
दूर्वादले विन्दति किं चिराय।
को न प्रजानाति यदम्बुविम्बः
सद्योनिपात्यम्बुमुखे च भावी॥ ४॥
(भावविलसितम्, आत्मविलापः, पृ.७९, श्लो.३, ४)

मूलकविताया भावं यथायथतया संस्कृते परिणामितवान् कविरयम्।

अनया संक्षिप्ततया समीक्षया निश्चप्रचमिदं वक्तुं शक्यते यत् कृष्णात्रेयकवेरस्य सृष्टिधर्मिणी साहित्यमन्दाकिनी सहस्रदिग्गामिनी विविधरुचिसम्पन्नान् सहृदयान् अशेषतः प्रीणयन्ति। समग्रे भारते कवेरस्य काव्यमुग्धाः सहृदयाः विविधान् प्रबन्धान् रचयन्ति। कवेरस्य काव्यप्रतिभां समभिवन्दयता कुलपतिना राधावल्लभत्रिपाठिमहाभागेनोक्तम्-

सम्प्रति कवयो नैके सुरगिरि विविधा वितन्वन्ति रचनाः।
सीतानाथसदृक्षा विरलाः संवेदनप्रवणाः॥

( पुरोवाक्, राधावल्लभत्रिपाठिवर्य्यस्य, काव्यनिर्झरी, पृ.१०)

कवेरस्य प्राक्तनच्छात्रेण पश्चिमवङ्गराष्ट्रियविश्वविद्यालये संस्कृतसङ्काया-ध्यक्षपदम् अलङ्कुर्वाणेन श्रीमता अयनभट्टाचार्येण कृष्णात्रेयकवेरभिवन्दना-त्मिकायां कवितायामेवमुक्तम्-

न खलु न खलु खेदः सङ्गतः पण्डितानां
क्व कवय इति भासः कालिदासस्तथान्ये।
मम गुरुवरयोगात् सूतसत्काव्यबन्धा
नवनवप्रसवा सा काव्यकान्ता न बन्ध्या॥[१२]

☆ ☆ ☆

[१२]अयनभट्टाचार्यः, (२००८) आचार्यप्रशस्ति, पद्यवल्लरी। प्रकाशक-संस्कृतबुकडिपो, २८/१, विधानसरणि, कलिकाता-६,। पृ.१२

# समकालिक-संस्कृतोपन्यासेषु भारतीयता
## (रयीशः-सीमा-विसर्गः-कालाय तस्मै नमः-मूको रामगिरिर्भूत्वा-अन्यच्च-स्वर्गपुरे-इत्यादीनां परिप्रेक्ष्ये)

नारायणदाशः*

भट्टबाणात्समारभ्य मथुरानाथमध्यमाम्।
अस्मदाचार्यपर्यन्तां वन्दे कथापरम्पराम्॥

## ०. उपक्रमः

संस्कृतसाहित्ये यथा कवीनां स्थानं कनिष्ठिकाधिष्ठितं न तथा कथाकाराणामिति केषाञ्चित् सम्मतम्। परन्तु पद्यकविर्वा गद्यकविर्वा पद्येन गद्येन वा भवति, यदुभयं काव्यपदेन व्यपदिश्यते काव्यशास्त्रिभिः। अतः अन्ततो गत्वा सहृदयः कविरेव प्रणयति कथाः उभयत्र स्वदक्षतां प्रतिपादयितुमिति कथनं साहसमात्रं न स्यात्। विंशशतकोत्तरायां संस्कृतभाषायां नवसर्जनस्य पदध्वनिः सर्वत्र लक्ष्यते। तत्र मूलकारणं भवति भाषायाः तत्संस्कृतेश्च यथार्थतः अवगमनं विश्वकथासाहित्यस्य अध्ययनञ्च। अतः कथासाहित्यविषये धैर्येण वदति कालूरि हनुमन्तरावः– ‘‘कथायां संघटना मुख्या न भवति। किमपि अद्भुतम् अतर्कितं महत् वा संघटनं कथायाः आवश्यकमिति कथा पाठकस्य विस्मयं जनयन्ती अनूहितेन आकस्मिकेन वा परिणामेन अवसिता तु इति च केषाञ्चिद्भ्रमः। .. उत्तमकथापठनानन्तरं पठितुः मनसि उत्पन्नः अनुभवः ईदृशः न भवति। उत्तमकथापठनं समाप्य पठिता न तां कथां विस्मरति। .. ऐन्द्रजालिकः यथा अकस्मात् वृक्षमुत्पाद्य प्रदर्शयति कथकः तथा कथायां किमपि संघटनं प्रदर्श्य पठितुः विस्मयं न जनयति। ... प्रसिद्धकथकस्य आण्टन् छेहोवस्य कथासु आकस्मिकपरिणामादयः प्रायेण न भवन्ति।’’[१]

विंशशतके शताधिकाः कथाकाराः कथालेखने स्वलेखनीं व्यापारयन्तः द्विशताधिककथाग्रन्थान् प्रणीतवन्तः। कथा जनस्याभिनवा वधूरिव[२] इति

---

*सहायकाचार्यः, संस्कृतविभागे, रामकृष्णमिशनावासीयस्वयंशासितमहाविद्यालयः, नरेन्द्रपुरस्थे, कोलकातायाम्।

[१]नातिचरामि अन्याश्च कथाः पृ.१३८-९

[२]प्रस्तावनाश्लोकः, कादम्बरी, बाणभट्टः।

प्रतिपादयता भट्टबाणेन भ्रान्ताः कथाकाराः टुप्कथात उपन्यासं यावत्सर्वं कथापदेन व्यपदिशन्ति इति संस्कृतकथासु कथा वा उपन्यास इति वा वर्गीकरणं सुमहते क्लेशाय एव।

## १. उपन्यासविषयः

वेदस्य मन्त्रनिर्माणकालेऽपि ऋषीणां समक्षं परिस्फुरितस्य राष्ट्रचिन्तनस्य विकासं प्राप्नुमः वयम् अथर्वसंहितायाम्– पृथिवीसूक्ते। विविधजातिधर्मभाषाः मूलतः एव अस्मिन् देशे सन्ति। " जनं बिभ्रति बहुधा विवाचसं नाना धर्माणं पृथिवी यथौकसाम्"[३] इति विज्ञाय अपि भारतीय ऋषिः उद्घोषयति " माता भूमिः पुत्रोऽहं पृथिव्याः।" मातृभूमि-मातृसंस्कृति-मातृभाषाणां रक्षणाय उपदिष्टाः देशवासिनः। आर्षमानसे मातृभूमेः प्रस्तरमात्रं देवायते, धूलिमात्रं मधुरायते, वृक्षलतापादपाः बान्धवायन्ते। धार्मिक-सांस्कृतिक-पौराणिकभाषा तु एकैवासीत्, या वैविध्येष्वपि ऐक्यं स्थापयति स्म। इदं वेदकालिकं राष्ट्रचिन्तनं श्रुतिस्मृतिषु परिव्याप्य पौराणिकयुगे तु विराजते कामपि अत्युच्चतमां कोटिमाटीकमानम्। तदा दक्षिणभारते रचिते श्रीमद्भागवतमहापुराणेऽपि भारतभावना जोगुञ्ज्यते।

अहो अमीषां किमकारि शोभनं प्रसन्न एषा स्विदुत स्वयं हरिः।
यैर्जन्मलब्धं नृषु भारताजिरे मुकुन्दसेवोपयिकं स्पृहा हि नः॥[४]

एवमेव वङ्किमचन्द्रस्य आनन्दमठे, गोपीनाथमहान्तिवर्यस्य दानापाणि-परजा-माटिमटालेषु, मनोजदासस्य अमृतफले, तसलिमायाः फेरायां, लज्जायाम्, एस्. एल्. भैरप्पस्य सार्थ-धर्मश्री-आवरणेषु, नरेन्द्रकोहलीवर्यस्य रामायणे, वसुदेवे, के. एम्, मुन्शीवर्यस्य कृष्णावतारे, सोमनाथे, मनुशर्मणः कर्णे, रामकरणशर्मणः रयीशे, हर्षदेवमाधवस्य मूको रामगिरिर्भूत्वा इत्यत्र, राधावल्लभत्रिपाठिनः अन्यच्चे, प्रमोदकुमारनायकस्य स्वर्गपुरे, मम वह्निवलये च कश्चन एवंविधो भावः परिस्फुरति, यस्तं तमुपन्यासं सर्वसाधारणपाठकस्य बोधगम्यं कारयित्वा तस्य चिरन्तनत्वं सनातनत्वं सार्वकालिकत्वं च विधाय राष्ट्रस्य संयोगात्मकं पक्षं द्रढयति।

संस्कृतोपन्यासकारेषु रामकरणशर्म-ओगटीपरीक्षितशर्म-केशवचन्द्रदाश-

---

[३]१२.१.४५, पृथ्वीसूक्तम्, अथर्ववेदः।

[४]व्यासदेवः, श्रीमद्भागवतमहापुराणम्, ५.१९.२१।

हर्षदेवमाधव-राधवल्लभत्रिपाठिनश्च अतिप्रसिद्धनामानः। एतेषां कथाकाराणां तन्नाम औपन्यासिकानां प्रत्यग्ररचनासु परिदृष्टां भारतभावनामत्र प्रतिपादयामः।

## २. भारतभावना

विंशशतकस्य अन्तिमपर्यायं यावत् संस्कृतभाषाकवयः स्ववर्चस्वं प्रमाणीकृत्य समृद्धं साहित्यमरचयन्। अद्यतनीयाः कवयः कथाकाराः वा कालिदासं बाणभट्टं सुबन्धुं दण्डिनं वातिक्रमन्ते इति कथनं साहसमात्रम्। किन्तु रयीश-मूको रामगिरिर्भूत्वा–अन्यच्चादिकथाग्रन्थाः तदेव प्रमाणयन्ति। समकालिकं संस्कृतकथासाहित्यं कयापि समृद्धभाषया तुलयितुमलं स्यात्। कथादर्पणे समाजस्य मुखं चित्रं च द्रष्टुं शक्नोति कोऽपि कथापाठकः। भारतीयतायाः प्रकृष्टोदाहरणरूपेण प्रो.त्रिपाठी प्रस्तौति कालिदासीयं मेघदूतम्। "इसमें भारत का भूगोल है, तीर्थ हैं, पावनभाव है। प्रेमकी वह अनन्यता और निष्ठा है, प्रकृति से एकमेक होने से जन्मी जीवन की लय और संगति है। इस संगति में भारत के जीवनबोध की विश्व को देन है।"[५] मेघदूतस्य वस्तुसौन्दर्येण मूकीभूय कविः हर्षदेवः रमते रामगिरौ। मेघदूतस्य विषये प्रोक्तं प्रत्यक्षरमन्वेति मूको रामगिरावपि। मेघदूताद्वस्तु सङ्गृह्य विनूतनलशैल्या अभिशप्तयक्षस्य आत्मकथनशैल्या वासरिकारूपेण च विन्यस्तोऽयमुपन्यासो हर्षदेवेन। केचन पण्डिताः रोचकशैल्या संस्कृतेन स्वदैनन्दिनीं पूरयन्ति इति सत्यम्। तत्पुनः उपन्यासरूपेण यक्षस्य चेद्, गन्धः सुवर्णे! माघशुक्लसप्तम्याः दैनन्दिनी एवमस्ति- अनवरतयज्ञधूमाच्छादिते नभसि वेदमन्त्रघोषैर्गुञ्जत्यन्तरिक्षे धर्मश्रवणमग्नेषु ग्रामेषु इष्टापूर्तकर्मव्यापृतेषु सचिवेषु, धर्मशास्त्रनिर्दिष्टशिष्टाचारयुक्तासु प्रजासु विनापि दण्डेन नियन्त्रिते राज्ये मया शिवभक्तिपरायणं जीवितं यापितम्।[६] अन्यच्च इत्यस्य लेखकः स्वयमाविष्करोति मेघदूतम्, तत् पुनः सांख्याचार्यस्य ईश्वरकृष्णस्य समीपे, ततः ब्रह्मचार्याश्रमे स्थितः कथानायको विशाखो निलीय पठितवान् अभिसारिकालक्षणम्।[७]अहो मेघदूतमहिमा! महाभारतीयभावनाया अपरमुदाहरणं प्रस्तुतमस्ति यदा कथानायकः काश्मीरे स्नानावसरेऽपि गायति महाभारतीयभावनायाः प्रतीकं "गङ्गे च यमुने चैव..." श्लोकम्-

[५]प्रो.त्रिपाठी,समकालिक संस्कृत-साहित्य में भारतीयता, दृक्-१५-१६, पृ १९

[६]पृ.१८, मूको रामगिरिर्भूत्वा।

[७]पृ.५६, अन्यच्च।

गङ्गे च यमुने चैव गोदावरि सरस्वति।
नर्मदे सिन्धु कावेरि जलेऽस्मिन् यान्तु सन्निधिम्॥

काश्मीरेषु स स्नाति। पुराणमिमं श्लोकं पठति।[८] अत्रापि परम्पराप्रचलितश्लोकस्य साधुपाठविमर्शे लेखकः सफलकामो वर्तते। किं बहुना, यथार्थपूर्वपीठिकायां गाथासप्तशत्याः यत्र तत्र उदाहरणान्यस्मान् अवश्यमेव कनिष्ककालिके भारते प्रापयति। एवमेव यज्ञ-पुराण-तर्क-वानप्रस्थ-भिक्षूणां संस्कृतिं सांस्कृतिकसन्दर्भपुरस्सरमुदाहरन् कथाकारः भारतीयसंस्कृतेः अत्युत्तमां प्रतिच्छविं निर्माति। तथैव श्रीकालूरीहनुमन्तरावस्य कथासु सृजनात्मकानि अस्तिवाचकानि च वर्णनानि सन्तीति तैः कथास्वारस्यमपि वर्धते न कथमपि कथासौन्दर्यं हीयते। वर्णनचातुर्येण स क्वचित् पाठकं दाक्षिणात्यस्य कमपि समृद्धमग्रहारं प्रापयति एव। तस्य ग्राम्यवर्णनं यथा- "तस्मिन् ग्रामे प्रथमद्वितीयवीथ्योः सप्त ब्राह्मणकुटुम्बानि आसन्। .. सर्वाणि ब्राह्मणगृहाणि मृद्भित्तिमन्ति तालपत्रपटलयुतानि च आसन्। .. द्वितीयवीथ्यां त्रीणि गृहाणि क्षत्रियाणामासन्। तेषु द्वे इष्टिकाभित्तिभिः पक्वमृत्तिकाफलकैश्च निर्मिते। एकं पर्णपटलगृहम्। वीथ्याः अन्ते पर्णपटलगृहे स्वर्णकारः निवसति स्म। तत्पार्श्ववीथ्यामासीत् लघुपरिमाणः रामालयः। तदभिमुखं व्याप्तानि बहूनि पर्णच्छदगृहाणि वैश्यकर्षकतन्तुवायकुम्भकाररजकगोपादीनामासन्।"[९] प्राच्यतत्त्वविद्भिः प्रणीतानामेतेषामुपन्यासानां प्रतिपुटं विराजते भारतभावना। तस्या भावनाया वैशिष्ट्याधायकानां गुणानां परिगणनं निम्नोक्तरीत्या शक्यमिति प्रतिभाति।

## २.१. नामकरणम्

ऋग्वेदे पञ्चस्थलेषु "वयं स्याम पतयो रयीणाम्"[१०] इति वर्णनं लभ्यते। तम् ऋग्वेदीयं पदं यत् परिश्रमार्जितधनस्य प्रतीकं वर्तते, तं स्वीकृत्य औपन्यासिकः रयीणाम् ईशः रयीशः इति व्युत्पत्त्या तं धनिकजनपर्याये प्रयुङ्क्ते। विसर्ग इति गीतोक्तमेव नाम।[११] औपन्यासिकः श्रीदाशः स्वदार्शनिकभाषया तन्निरूपयतीत्थम्-

[८] पृ.१७८, तत्रैव।

[९] पृ.२०, नाति., उपर्युक्तम्।

[१०] ऋग्वेदः, ४.५०.६, ५.५५.१०, ८.४०.१२, ८.४८.१३, १०.२२.१०।

[११] अक्षरः ब्रह्म परमं स्वभावोऽध्यात्ममुच्यते।

संसारः नाम त्यागक्षेत्रम्। त्यागनिष्ठत्वमस्य धर्मः। यदत्र सम्बन्ध्यते तत् सर्वं त्यज्यते। तेन भोगस्य परिपुष्टिर्भवति। भोगः कर्मणः पृष्ठभूः। त्यागश्च कर्मणः परिपाकता। भोगः त्यागश्चेति मार्गद्वयं संसारस्य। रोगः नियामकः। आरोग्यं कर्मस्वारस्यम्। त्यागो नाम कर्मसिद्धिः।[12] कालाय तस्मै नमः, सीमा, अन्यच्च इति तु संस्कृतपरम्पराप्राप्तानि नामानि। मूको रामगिरिर्भूत्वा कवेः प्रत्यग्रतां सूचयति। स्वर्गपुरस्य कल्पना तु भारतीयसाहित्यं विना न सम्भवेत्। अन्यच्च इति नामकरणमेव प्रतिपादयति बहु किमपि वक्तव्यमासीत्, २१६ पुटान् विलिख्य अपि बहु किमपि अवशिष्टम्। कथं विवशो वक्ता सर्वत्र आत्मानं स्पष्टीकर्तुं न शक्नोतीति लक्षणीयमेवात्र। अस्य नामकरणस्य पुष्ट्यर्थं कथाकारः शताधिकवारमुच्चारयति ज्ञातसारेणाज्ञातसारेण वा अन्यच्चेति। वस्तुतः प्रथमखण्डस्य दर्शनात्परं समाप्तित्वरा द्वितीयखण्डं तृतीयखण्डं च संक्षिप्तमकारयदिति सहजतया अनुमीयते। सहसा समापनमपि अन्यच्चेति पाठकीयजिज्ञासां प्रत्यग्रीकरोतीति पुनर्वक्तव्यं नास्ति। उक्तं च दयानन्दभार्गवेण- “अन्यच्चेत्यत्र याः घटनाः उपस्थापिताः ताः सर्वाः गन्धर्वनगरलेखोपमाः पश्यत एव विलुप्यन्ते, चन्द्रलेखा वा स्यात्, तक्षशिला वा स्यात्, अलका वा स्यात्। अवशिष्यन्ते केवलं त्वादृशाः उपन्यासानुशीलननिर्मलीकृतमानसाः सहृदयाः पाठकाः।”[13]

## २.२. महाख्यानता

भारतीयताया भारतमुग्धतायाश्च भेदं निरूप्य प्रो.राधवल्लभत्रिपाठी वदति- “भारतीयता कोई स्थिर और जड अवधरणा नहीं हो सकती। भारतराष्ट्र जिस तरह निरन्तर विकसमान रहा है, उसी तरह भारतीयता की परिधि भी विस्तीर्ण होती रही है। भारतीयता अपने आप को प्रतीकों, मिथकों और आख्यानों में प्रकट करती आई है।–- पर आख्यान को पूरे युगबोध के साथ साधना भी उतनी ही बडी चुनौती है। बहुत कम कवि भारतीय महाख्यानों की विचित्र वीणा के सारे स्वर इस तरह साध सके कि उनका अनुरणन आज के श्रोता सुनें।”[14] अन्यच्च इत्यत्र स्थले स्थले उद्धृतानि आख्यानानि इमं महाख्यानेन विपरिणमयन्ति। अत्रोद्धृतानि शास्त्राणि

---

भूतभावोद्भवकरो विसर्गः कर्मसंज्ञितः॥श्रीमद्भगवद्गीता, ८.३।

[12]पृ.१४, विसर्गः

[13]सरस्वतीसौरभम्,अङ्क-१.२,पृ.६

[14]पृ-७-१२, दृक्-१५-१६, उपर्युक्तम्।

अस्य महाशास्त्रत्वं साधयन्ति। अत्रत्यानि चरित्राणि भारतीयजीवनधाराभिः ओतःप्रोतानि, तत्र वाचकान् निमज्जयन्ति, उन्मज्जयन्ति, महाभारतीयं जीवनचित्रं चित्रयन्तीति कथनं साहसमात्रं न स्यात्। एवं प्रतीयते औपन्यासिकः स्वजीवने शिक्षितं सर्वं किमपि समावेश्य स्वोपन्यासं ग्रश्नाति।

## २.३. विश्वकोषता

उत्तमे उपन्यासे पदे पदे औपन्यासिकस्य बहुश्रुतत्वं बहुवेदित्वं बहुपाठित्वं महानुभवत्वञ्च प्रमाणितं भवति। तथैवात्र आचार्यस्य त्रिपाठिवर्यस्य प्रतिभाभावितोऽयमुपन्यासस्तस्य प्रतिभाया विश्वतोमुखत्वं विश्वव्यापित्वं विश्वजनीनत्वं च प्रमाणयति। वेद-वेदाङ्ग-नाट्यशास्त्र-गौतमधर्मसूत्र-शृङ्गारप्रकाश-कुट्टिनीमत-विक्रमाङ्कदेवचरित-भविष्यपुराण-सुश्रुतसंहिताभ्य उद्धरणानि अत्र सन्ति एव, परन्तु कामसूत्र-गाथासतसई-थेरीगाथा-वाचस्पत्य-अमरकोशाश्चाप्यत्र न त्यक्ताः।[१५] केवलं गाथासतसईतः एव सप्त गाथाः उद्धृताः सन्ति, गोपीलीलायां गानानि च संयोज्य कथं प्रवचनानि मधुरीक्रियन्ते, समाजाभिमुखीक्रियन्ते इति सप्रमाणमुपस्थापयति कथाकारः। गङ्गे च यमुने चैव .. इत्यारभ्य समिधः लक्षणं, लेखनीनिर्माणं, ग्रन्थपठनपद्धतिः, लेखनपद्धतिः, संशोधनपद्धतिरित्यादिकं सर्वमपि प्रतिपादितमस्मिन् विश्वकोषे।[१६] सत्यमुक्तं देवर्षिणा कलानाथशास्त्रिणा– "उपन्यास तत्कालीन भारत के साहित्य की जो विश्वकोषीय जानकारी देता है वह सप्रमाण है इसके लिए सन्दर्भ टिप्पणियोंमें वेदशास्त्र, साहित्य, आयुर्वेद आदि के ग्रन्थों के उद्धरण हैं, उन शब्दों के अर्थ भी दिए गए हैं जो हमारे साहित्य में और बाल्यकाल में उस समय प्रचलित थे।"[१७] कनिष्ककालिकभारतादारभ्य काश्मीरेषु साम्प्रतिकेन मेघस्फोटनेन उज्झितग्रामस्य चित्रणं कथाकारस्य लेखन्या पुनर्जागरितमेव। देशस्य नद-नदी-वन-पर्वत-वृक्षलतादिभिः संवलितायाः मनोरमप्रकृतेः चारुचित्रणं सहृदयहृदयं प्रकामं विशदयति। अन्ततो भारतीयसंस्कृतेः जयगानं कृत्वा मातृसूक्तमपि संपश्यति आर्षमानसेन विशाखभावेन। इमामेव भावनां पुरस्कृत्य कदाचित् ध्वन्यालोककारेण महावाक्यकल्पना कृता स्यात्।

---

[१५]पृ.२१३-६, अन्यच्च, उपर्युक्तम्।

[१६]पृ.७४-८०, तत्रैव।

[१७]पृ.४,सरस्वतीसौरभम्,१-२, उपर्युक्तम्।

## २.४. पूर्वसूरिणामानृण्यं नवार्थसन्धानमन्यच्छायासौन्दर्यञ्च

मिथ्-प्रतीक-बिम्बानां नवार्थसन्धाने सफलयोद्धा भवति श्रीहर्षदेवः। परम्परायाः पूर्वसूरिभ्यश्च बिम्बग्रहणं स्वप्रतिभया च तस्य प्रत्यग्रीकरणं हर्षदेवीयकाव्यसौन्दर्यस्य मुख्यमाकर्षणम्। तेन प्रतीयते अत्र मूको रामगिरिर्भूत्वा इत्यत्र मेघदूतीय-साम्राज्यस्य नवनिर्माणं जातमिति। ज्येष्ठकृष्णद्वादश्यां पत्न्या सह भ्रमितानि स्थानानि इत्थं वर्णयति कथाकारः- "मेखलासु रघुपतिपदैरङ्कितः आम्रकूटपर्वतः, वनचरवधूभुक्तानि वनकुञ्जानि, उपलविषमे विन्ध्यपादे विशीर्णा रेवा, दशार्णदेशस्य पाण्डुच्छायोपवनवृत्तयः, वेत्रवतीजलप्रतिबिम्बिता रम्यहर्म्या विदिशा, विहगश्रेणीकाञ्चीगुणा निर्विन्ध्या, पवनप्रियतमस्य चाटुवचनानि शृण्वन्ती शिप्रा, रत्नतेजोभिः द्योतमाना उज्जयिनीविपणिपङ्क्तिः, युवतिजनस्नानवासितजला गन्धवती, कुन्दधवलतीरा गम्भीरा, उदुम्बरगन्धकषायप्रदेशो देवगिरिः, रन्तिदेवकीर्तिपताकेव चर्मण्वती, शङ्खनादाकुला दशपुररथ्याः, प्रचण्डयुद्धस्मृतिभीषणं कुरुक्षेत्रम्, बलरामसेविता सरस्वती, स्वर्गनिःश्रेणीकल्पा जाह्नवी, ....।"[१८] इदं सर्वमपि कविना कालिदासस्य वचनैः पुनराविष्करोति अन्यच्छायासौन्दर्यमहिम्ना। नायिकावर्णने कथाकारः अतिशेते पारम्परिकान् कवीन्, यथा- "विस्मृतकमलवासा लक्ष्मीरिव, अकाण्डे विनापि समुद्रमन्थनं प्रादुर्भूता वारुणीव, माधवीं शोभां द्रष्टुकामा इव वनदेवी, धरणीतलप्राप्ता देवाङ्गनेव, विस्मृतदिवसकालेव कौमुदी, त्यक्तजलाशयप्रीतिः कमलिनीव सा अकृतकसौन्दर्येण राजहंसीव कमलाद् बिसतन्तुवत् मम मनः प्रसभं कर्षन्ती विचरति।"[१९]

## २.५. प्रकरणवक्रता

औपन्यासिकः श्रीहर्षदेवोऽत्र यक्षस्य वासरिकां तु निरूपयति, तेन सह प्रकरणवक्रतां स्वीकृत्य यक्षस्य पूर्वजन्मनः कथां योजयति। आकाशतः पृथिव्याः विशेषतः भारतभूमेः प्राकृतिकसौन्दर्यं वर्णयितुकामोऽयं पार्थिव्याः सहयोगेन आकाशगामिनीविद्याभ्यासं कारयति। रामगिरौ निर्वासितो यक्षः आकाशगामिनीविद्यया पर्यटति भारतीयतीर्थेषु वनेषु मन्दिरेषु पुण्याश्रमेषु च। तत्र

---

[१८]पृ.५८, मूको. उपर्युक्तम्।

[१९]पृ.३१, तत्रैव।

जनानां साहाय्यं करोति, रोगं दूरीकरोति, तैः सह सहभोजनं करोति। विश्वहिताय एव विद्यायाः प्रयोगः इति समयेन स मधुविद्यां विन्दति, कामाख्यामन्त्रानुष्ठानं करोति। कस्मिंश्चिद् दरिद्रग्रामे निलीय सुवर्णवृष्टिं कृत्वा पलायते। एवमेव बहुजनहिताय स्वसामर्थ्यं व्ययीकृत्य निर्मलं सुखं प्राप्नोति। अन्तिमे रत्नेश्वराय क्षमां दत्वा सिद्धिभूमिं वसुन्धरां विहाय गन्तुमनिच्छुः यक्षः दूतहस्तेन वासरिकामेव समर्पयति स्वपत्न्यै भारते अवतरणाय आमन्त्रणं विज्ञाप्य।[२०] तथैव स्वर्गपुरे उपन्यासस्य नायकः प्रतिष्ठते पुनः भारतभूमिं प्रति। अन्यच्च इत्यत्रापि ऐतिहासिककथायां कथाकारः विशाखस्य चरित्रं योजयति, तेन सह अश्वघोष-कनिष्क-ईश्वरकृष्ण-हाल-प्रभृतीनां सम्पर्कसेतुं रचयति।

## २.६. विषादं त्यक्त्वा दुःखवादस्य नवीकरणं तत्र रमणं वा

कालिदासीयः अस्तगमितमहिमा यक्षः स्वसिद्धये प्रवर्तते। कृत्वा नवदृढसङ्कल्प इव स कर्मभूमौ स्वकार्मण्यस्य हस्ताक्षरं त्यजति। पार्थिवसुखेषु प्राकृतिकसौन्दर्येषु विहरन् आत्मारामपर्यायं प्राप्नोति। या निशा सर्वभूतानां तस्यां जागर्ति संयमी इति स्मरन् रूपे अरूपस्य, अरूपे रूपस्य सन्धानं करोति। पराधीनतायाः शृङ्खलं छित्त्वा स स्वस्वतन्त्रसत्तामाविष्करोति, आत्मसोन्दर्ये पुनारमते। अन्यच्च-कथानायकः मातृस्मृतिं सहकृत्वापि नवकिन्नरपुरस्य नवनिर्माणाय, तस्य शासनाय च सन्नद्धो जातः। स विषादं त्यक्त्वा पुनः सामान्यजीवने प्रत्यागन्तुमुपदिशति इरावतीम्। अन्ततो बौद्धभिक्षुणीरूपेण स्वात्मप्रकर्षं साधयति सा।

## २.७. जीवनबोधो जीवनमूल्यं पारिवारिकं चित्रं वा

यद्यपि “मूके रामगिरौ” स्वल्पकालिकमेव यक्षस्य पारिवारिकजीवनं वर्णितं तथापि कुत्रापि यक्षः न विस्मरति स्वप्राणप्रियाम्। रामगिरेः वनारण्येषु, चञ्चलप्रकृतौ, चपले मेघे, तेजोमये भुवनभास्करेऽपि कथाकारः आविष्करोति प्रियाचारुत्वम्। “रमणीयं सूर्योदयं वीक्ष्य मुदितां याति मनः। सूर्यपूजाकर्मणि तव हस्ततलमेव मया कोकनदरक्तं दृष्टम्। तव नते मस्तके सौभग्यसिन्दूरं सूर्यातपशोभां विरचयति स्म। अधुना सूर्यातपे तव सिन्दूरशोभां पश्यामि।”[२१]

---

[२०] पृ.१००, तत्रैव।

[२१] पृ.४-५, तत्रैव।

पार्थिव्याः त्यागभावना, जातिस्मरत्वं, स्वामिनः सिद्धये तस्याः अनन्यसाधना भारतीयजीवनस्य रमणीयं चित्रमुपस्थापयति। रयीशे रामकरणशर्ममहोदयः कृतिमाध्यमेन अहिंसायाः, लोककल्याणस्य, सत्यस्य, सदाचारस्य च उपदेशं ददाति। लेखको वाञ्छति यत् एतादृशः समाजः भवेत् यत्र धनिकाः समाजहिताय कार्यं कुर्युः। तेषां सर्वस्वं समाजाय भवेत्। लेखकस्याकांक्षाऽस्ति यत् अस्माकं देशस्य धनिकाः देशविकासाय मनसा, वाचा कर्मणा च योगं ददतु। विज्ञानस्य प्रयोगः हिंसायाः कृते अकृत्वा जनहिताय भवेत्। तदैव सर्वत्र शान्तिः भविष्यति, वसुधैव कुटुम्बकम् इति अवधारणा तदैव चरितार्था भविष्यति। विसर्गे कथाकारस्य जीवनबोधः कर्तव्यबोधः कर्माकर्मविवेकश्च उपन्यासं परिपचन्ति। यथा कलानिधेरुपदेशे- "जीवनं कर्ममयं भवतु नाम। किन्तु कर्त्तव्यविहीनं न भवतु। यं प्रति यत् कर्त्तव्यं तत् अवश्यं चिन्तनीयं निभालनीयं च। अन्यथा जीवनस्य सन्तुलनं न भवेत्।"[२२] इति औपन्यासिकस्य वचनमेव शिरसि निधाय कथानायको जीविताशां पोषयति सकलं परस्मै समर्पयन्। कालाय तस्मै नमः इत्यत्र उपन्यासप्रयोजनमित्थं प्रतिपादितम् – "इमां नवलां यः कश्चन यदि पठिष्यति जीवनस्यार्थः कः, जीवितं कथं प्रचलति इत्येनं विषयं ज्ञास्यति। .. अपि च ज्ञास्यति नाहं कर्त्ता, नाहं कारयिता, किन्तु सर्वकारकः परमात्मस्वरूपः कालः"[२३] इति।

## २.८. नाल्पे सुखमस्ति इत्युदात्तभावना

दीर्घकाव्ययात्रायाः परं हर्षदेवस्य कथायात्रेयमपि काव्यमयी वर्तते। लघुकमपि वाक्यं तस्य महाकाव्यमयं भवति। प्रथमखण्डस्य अन्तिमपंक्तौ यक्षस्य वचनमीशावास्योपनिषदः सम्पूर्णस्यापि कथाग्रन्थस्य च जीवातुभूतं वर्तते- "आसीच्च मे मनसि। धन्योऽयं लोको यत्र प्राप्यते शाश्वतं पदम्। प्रकृतिरेव भोगान् ददाति, किन्तु तपसा पूर्णता लभ्यते, या न लभ्यते दिव्यलोकेषु। दिव्यलोकास्तु वस्तुतः तपसां व्ययलोकाः। वस्तुतो धरित्र्यामेव पुण्यार्जनं शक्यम्। अत्रैव पञ्चभूतानां मायां क्षिप्त्वा जीवात्मा परमात्मनो दायादो भवति। अलौकिकोऽयं लोकः!"[२४] कथाकारस्यास्य विलक्षणेयमुदात्तभावना अन्यत्र न लभ्यते। सीमा

---

[२२]पृ.६५, विसर्गः, उपर्युक्तम्।

[२३]उपक्रमः, कालाय., उपर्युक्तम्।

[२४]पृ.२५, मूको. उपर्युक्तम्।

इत्युपन्यासे राष्ट्रपञ्चकस्य एकीकरणस्य मूलमन्त्रो वर्तते जनहितं लोककल्याणं वा। तदर्थं कथाकारः क्वचित् वैयाकरणशिरोमणिं नियुङ्क्ते, कुत्रचित् षड्यन्त्राचार्यं प्रङ्क्ते, अन्यत्र आश्रमं संस्थाप्य सौरविज्ञानाचार्यान् नियोजयति। युद्धविद्या-ब्रह्मविद्यादिसकलविद्यानां प्रयोगः लोककल्याणाय एव मनुतेऽयमौपन्यासिकः। लेखकः प्रदेशानां सीमाविवादं, क्षेत्रवादं, महिलाधिकारं, लिङ्गानुपातं, भ्रष्टाचारम्, उत्पादनसमस्यां, प्रतिभावमूल्यायनसमस्यां, परमाणुज्ञानस्यानुचितप्रयोगं, समाज-संस्कृति-प्राप्त-पारिवारिकमूल्यं, कर्त्तव्यहननं च सम्यक् निरूप्य, तदर्थमुत्पन्नानां समस्यानां सूक्ष्माध्ययनं विधाय समाधानं प्रस्तोतुं प्रयतमानो दृश्यते।

## २.९. मातृसंस्कृतिसंवेदना

रयीशोपन्यासे लेखकेन वैदर्भीरीत्या मुनीन्द्रस्य जनन्याः हृदयं विशदीकरोति– "कथङ्कारं जानीयास्त्वं मातृहृदयम्? प्रकृत्यैव ममतान्धं भवति तत्। जनाः कथयन्ति त्वमसि महापण्डितो महासिद्ध इति, किन्तु किं तेन पाण्डित्येन किं च तया सिद्ध्या यत्र न स्यात् सत्कारः स्नेहैकप्राणस्य मातृहृदयस्य?"[२५] मन्त्रमातृकायाः साक्षात्कारस्य प्रक्रियां सम्यक् विशदीक्रियतेऽन्यच्चेत्यत्र यथा- "तदेव वदामि। भ्रातः विशाख, स्वर्गः शब्दैः निर्मातुं शक्यते। ऋषय ऋग्भिः स्वर्गं रचयन्ति स्म। यदि वयं मन्त्रान् रचयितुं प्रभवेम, तर्हि स्वर्गमपि रचयितुं प्रभवेम।... तस्मिन् स्वर्गे माता अवतरेत्। ..... एवं चिन्तयतस्तस्य वैकल्यं घनीभूतम्। तस्मिन् घनीभूते वैकल्ये स मातू रूपम् अपश्यत्। तत्क्षणं स मातृसूक्तं साक्षादकरोत्। विशाखेनानुभूतं यत्तस्य सूक्तस्य प्रत्येकम् ऋचि माता समाहिता, अथवा ता ऋच एव साकल्येन मातृरूपा आसन्। सूक्तं मुहुर्मुहुस्तस्य पुरः स्फुरति, तस्य सर्वाङ्गमालिङ्गति तमवशमिव करोति स्म।" मातृसूक्तं रचयति विशाखः। अस्य सूक्तस्य विशाख ऋषिः, माता देवता, अनुष्टुप् छन्दः।[२६] प्रक्रियामेवं निरूपितवान् कथाकारः- "विशाखो भूमौ उपविश्य मातृमण्डलं निर्मितवान्। मातृसूक्तं पठित्वा मतुराह्वानं कृतवान्। माता साक्षात् तस्मिन् उपविष्टा आभाति।"[२७] अन्ततो गत्वा

[२५]पृ.८, रयीशः, उपर्युक्तम्।
[२६]पृ.२५, अन्यच्च, उपर्युक्तम्।
[२७]पृ.२६, तत्रैव।

पत्न्यां चन्द्रलेखायामपि मातृत्वमाविष्करोति मातृसूक्तं देवीसूक्तं वा स्मरन्– या देवी सर्वभूतेषु मातृरूपेण संस्थिता इति। तदर्थं कदाचित् स्वकीयम् ऋषित्वं वा मातृसूक्तस्य सूक्तत्वं वा दर्शयितुकामः कथाकारः पुनरावर्तयति एकवारमन्तिमे, मन्त्रवद् उपांशुरूपेण द्विवारम्। एषा माता सत्या सनातनी सरस्वती तु नास्ति!

ऋषिस्त्वं च कविस्त्वं च सत्यरूपा ऋतम्भरा।
सुव्रता मृत्युहन्त्री त्वं सावित्री परिनिष्ठिता॥[२८]

यस्याः प्रत्युत्तरेण त्रिपाठिलेखनीं नमन्नपि ऋषिकल्पो दयानन्दभार्गवो अपश्यत् त्रिपाठिसूक्तम्–

त्रिपाठीति काव्यविदं शश्रमणं दिवे दिवे सुमृळीकं वृणीमहे।
उरुगायः कविक्रतुः क्रान्तद्रष्टा विचर्षणि दैवीं वाचं नमस्यति॥[२९]

## २.१०. नारीसंवेदना

मातृसंस्कृतेर्जयगानमतिरिच्य अन्यच्चेत्यत्र अन्यनारीपात्राणि अपि स्वमहत्त्वं प्रतिपादयन्ति। तानि विवशतामनुभवन्तीति सत्यं, परं वाचकेषु कारुण्यं पूरयितुमलं सन्ति। ठक्कुरस्य सूतस्य विशाखस्य च करुणाप्लाविता विधवा कालिन्दी शेषे स्वश्वशुरं रक्षति, कालीरूपेण त्रिशूलं धारयित्वा कापालिकं प्रहृत्य। काचित् पितुः और्ध्वदेहिकं संस्कारमपि कृतवती स्त्रीयाजकेन। विधवाविवाहमपि वर्णयति कथाकारः। दाने प्राप्तायाः स्त्रियाः सामाजिकस्थितेः वर्णनमित्थं करोति– “सर्वेभ्यः स एकैकां दासीं दाने अददात्। .. .. पङ्क्तिषु स्थापिताः यस्य या रुचिता भवेत् सा ग्राह्या इति चोक्तम्।”[३०] वैवश्यं विस्तारयति विशाखस्य द्वितीया माता- “अहं पिशाची नास्मि, अहं विवशाऽस्मि, सन्तप्तास्मि, मम केवलमयमेवापराधो यद्रूपवती नीचकुले प्रसूता च।”[३१] चन्द्रलेखाविषये वदति- “दिनद्वयं तेषां वन्दिनी। तैः सा निर्दयं भुक्ता। अर्धमूर्च्छिता च वितस्तायास्तटे त्यक्ता।”[३२]

## २.११. नूतनशब्दनिर्माणम्

---

[२८]मातृसूक्तम्, पृ.२१२, तत्रैव।

[२९]पृ.८, सरस्वतीसौरभम्, १-२, उपर्युक्तम्।

[३०]पृ.३२, अन्यच्च, उपर्युक्तम्।

[३१]पृ.४४, तत्रैव।

[३२]पृ.२०५, तत्रैव।

अद्यावधि अस्माभिः लक्ष्यते यत्, नूतनशब्दगठनव्याजेन किं किं न गठितवन्तः किं वा न त्रोटितवन्तो जनाः। रयीश-कारेण आङ्ग्लशब्दानामपि प्रयोगः कृतः, यथा जीपयानम्, हेलिकाप्टरविमानानि, फैक्सविधिना, वोटबैंकम्[33] इत्यादयः। उपन्यासे लोकोक्तीनामपि प्रयोगः कृतः, यथा- व्रणे क्षार इव।[34] सरलसंस्कृतेन लिखितः प्रचलितसूक्तिप्रवचनैः सहितोऽयमुपन्यासः कालाय तस्मै नमः पोलिस-टिकेट-रैलस्थानक-त्रिचक्रशकट-पाथेयपेटिकादिशब्दान् उपायनीकरोति। परन्तु अन्यच्च-आचार्येण यत् श्लाघनीयं साधितमस्ति तत्तु पुरातनप्रसिद्धशब्दानां व्यवहारे आनयनम्। यथा- ठक्कुरः, तुम्बिकम्, प्रतन्वती, वीरुत्, अलसाला, फलिनी, शृङ्गाटकः, पतद्ग्रहः, शालाक्यं, शशः, स्त्रीयाजकः, कौमरभृत्यं, अंकोलः, अक्षोटः, परिवेणः, उपहस्तिका, हसन्ती, द्रङ्गः, कपिशीर्षकम्। समेषां सन्दर्भाः अपि दत्ताः सन्ति। तदानीन्तन-नगरनामनि अपि संस्कृतीकृतानि एव- भद्रपुरी(भदौही), ऋषिरसा(सिरसा), पुष्कलपुरम्(पेशावर), इरावती(रावी), शाकलपुरम् (स्यालकोटनगर)। एवमेव लोकोक्तीनां संस्कृतीकरणं दर्शनीयमेव- कियतां घट्टानां वारि निपीतम्[35] इत्यादि। तत्र कारणद्वयं स्यात्। १. कनिष्ककाले कथावाचकस्य प्रापणम्, २. विस्मृतप्रायाणां शब्दानामादर्शरूपेण प्रयोगः। उक्तं खलु– एकः शब्दः सम्यग्ज्ञातः सुप्रयुक्तः ..इति महाभाष्यकारेण।

## २.११. परम्पराणां खण्डनं मानवीयमूल्यानां संस्थापना च

वास्तवस्य पक्षधर औपन्यासिकः शाश्वतिकमानवीयमूल्यानां संस्थापनार्थं रूढीनां खण्डनमपि करोति। मातृदर्शनं, स्वर्गरचनं, स्त्रीयाजकञ्च वर्णयता तेन प्रतिपादितं यत्– अहं जन्मना जातिं न मन्ये[36], मातुः ऋणं भवति[37], न स्वर्गो न वा नरकः[38], ऋषयः ऋग्भिः स्वर्गं रचयन्ति स्म[39], भवतो वासुदेवस्य कथनं न

---

[33]पृ.१०, रयीशः, उपर्युक्तम्।
[34]पृ.९, तत्रैव।
[35]पृ.१६, अन्यच्च, उपर्युक्तम्।
[36]पृ.६, तत्रैव।
[37]पृ.१३, तत्रैव।
[38]पृ.२३०, तत्रैव।
[39]पृ.२५, तत्रैव।

निर्दुष्टम्[४०], अस्मिन् महादेशे एतावन्तो धर्मसम्प्रदायाः, एतावन्तो भेदाः, परस्परं कलहः। अयं कलहो निवारणीयः, यस्य मनो यं धर्ममभिनिविशते स तं धर्मं निर्वहतु, परन्तु अन्यस्य न छिनत्तु। मूलं तु सर्वेषामयमेव मन्त्रः- आत्मा प्रथमं ज्ञातव्यः इति[४१], देवो नास्ति, वेदो नास्ति, अस्ति केवलं मनुष्यः।[४२]

## २.१३. परम्पराणां सातत्यं नवीकरणं च

उपन्यासोऽयं मूको रामगिरिर्भूत्वा भारतीयपरम्पराणां व्रतोपवासपूजापर्वणां, पशुपक्षिवृक्षलतानां, मासानामृतूनामन्ततोगत्वा निसर्गलक्ष्म्याः काव्यमयविन्यासं करोति। अत्र १५६ दिवसानां दैनन्दिनीमध्ये शताधिकवन्यपशुपक्षिणां निरूपणं कृत्वा तैः सह स्वप्रियासारूप्यं सम्भावयति, शताधिकभारतीयपर्वणां समुज्ज्वलवर्णनं विदधाति, ऋतुचित्रं च नित्यनूतनरूपेण विस्तारयति कथाकारः यक्षरूपेण। कदाचित् तत्र आदर्शरूपेण कविः शब्दकोशं पञ्चाङ्गं च स्वीकृतवान् स्यात्! विद्या-विद्यास्थान-शास्त्रागम-मन्त्र-तन्त्र-राग- सङ्गीत-साधनाभिः यक्षः क्षणमिव वर्षं, परिशेषे जीवनं यापयितुं सिद्धिप्राप्तये च प्रस्तुतो भवति। विविधपक्षिणां वर्णनं यथा- "बलाका अमैथुनगर्भभरालसा डयन्ते। प्रतिसूर्यकाणां गात्रेषु वर्णपरिवर्तनं दृश्यते। अजगरस्य मसृणशरीरात् सरन्तो जलबिन्दवो तडागोपान्तवृक्षे गवयत्वचि मसृणतरं स्पर्शं जनयन्ति। तमालपर्णेषु मृदङ्गोपरि हस्ततालवज्जलाङ्गुलिः स्पृशति। आषाढस्य गृहं दात्यूहस्य कण्ठे वर्तत इति मन्ये। चातकस्य तृषा मम नेत्रयोः प्रविष्टा। अहं त्वां द्रष्टुकामः, हंसरसितमयेन मार्गेण त्वां प्राप्स्यामि। कलविङ्कविहगकण्ठशोभाधरं गगनम् आवयोः दूरत्वं रचयति। मयूरपिच्छकलापेषु वर्णरेखा विस्तरन्ति।"[४३] वन्यपशूनां वर्णनं यथा आषाढशुक्लपञ्चमीतिथौ- "नागकेसरवृक्षशाखायां कृकलासः स्वरक्तवर्णां ग्रीवां नामयन् स्वैरं विहरति। जनकतनयास्नानपुण्योदके जलाशये सर्पकञ्चुलिकामसृणानि जलदवृन्दानि श्वेतनीलानि प्रतिच्छायारूपेण स्पन्दन्ते। नवप्ररूढदूर्वाङ्कुरैः क्षतविक्षतः शशकः शनैः शनैः(मत्समः पीडाविक्लवः) वटवृक्षकोटरं प्रति प्रयाणं कृत्वा

---

[४०]पृ.९२, तत्रैव।

[४१]पृ.१९८, तत्रैव।

[४२]पृ.२१, तत्रैव।

[४३]पृ.६१, मूको. उपर्युक्तम्।

विविक्तमाश्रयते।"[४४] रयीशे प्रकृत्याः चारुवर्णनमपि लक्ष्यते- "आवाहयत् सन्ध्यामरुणरागा प्रतीची। आवाहयच्च राकापतिरागारुणा प्राची रजनीं सद्यः। नीडेष्विव विहगा नीरवचूङ्कृतयोऽलञ्चक्रुः सर्वेऽपि यथास्थानं शय्याः स्वाः स्वाः।"[४५] एकस्मिन् स्थाने तमाखूसेवनस्य स्वाभाविकवर्णनं कुर्वन् लेखकः कथयति- "यथा पूर्वाभ्यासं तमालपत्रं कञ्चुकचूर्णं च चूर्णवटिकाया आदाय पिष्णंश्च तत् सम्भूतं निहितं वामपाणौ दक्षिणाङ्गुष्ठेन सविभ्रममालपितुमारेभे।"[४६] देशकालवातावरणादिचित्रणे नितरां पटुः परीक्षितशर्मवर्यः देशस्य तात्कालिकीं स्थितिं सम्यक् निरूपयति- "देशपालकाः संरक्षकाः शासकाः मन्त्रिणः राष्ट्रभक्तिहीनाः देशभक्तिशून्याः ब्राह्मणभक्तिरहिताः देशभाषाविषये शत्रवः केवलं पदवीभक्ताः सिंहासनासक्ता अन्यायेन धनार्जनलोलुपाः सन्ति। प्रजाश्च तदनुगुण्यं चरन्तः केवलं जीवनयापनतत्पराः भवन्ति।"[४७] विदिशाया गतगौरवं स्मरन् कथाकारः तस्या इदानीन्तनस्वरूपण अन्तस्तपति कालमहिमानमनुध्यायन्- "विदिशा अधुना एकः पक्वणः इव भाति। साञ्चीस्तूपस्तु बौद्धानां गतगरिमाणं घोषयन् प्रकृत्यां निश्चलः तपति। कालः सर्वदा निर्दयः। सः सर्वदा तेन किं करणीयं तत्कर्म विनालस्यं यथाकालं यथासमयं करोति। विदिशायाः वैभवो गतः। बौद्धानां धर्मप्रचारोऽस्तं गतः। अयं कालमहिमा कालाय तस्मै नमः।"[४८] वाराणसी-ओटावा-बेनिस-नगरीणां भव्यं वर्णनमपि अयमुपन्यासः पोषयति। वाराणस्याः वर्णनं यथा- "सकलधरातलधराधरोत्तुङ्गहिमनगश्रृङ्गमुकुटभूषिते, विश्व-संस्कृतिजेगीयमानसनातनधर्मसंस्कृतिविराजिते, भुवनतलनागरिकजनमण्डल-प्रस्तूयमानमहितकीर्तिमण्डलमण्डनमहिते भारतवर्षे, सकलभुवनतलविनुतचतु-र्दशविद्यास्थानभूतायां, शुण्डमण्डितवेददण्डमण्डलतुलितकनककुण्डलमण्डित-प्रकाण्डपण्डितमण्डितायां भारतीयसंस्कृत्याः प्रधानकेन्द्रभूतवाराणस्याम्...।"[४९] अन्यच्च इति उपन्यासोऽयं भारतीयपरम्पराणां व्रतोपवासपूजापर्वणां,

---

[४४]तत्रैव।

[४५]पृ.११, रयीशः, उपर्युक्तम्।

[४६]पृ.१२, तत्रैव।

[४७]पृ.२, कालाय. उपर्युक्तम्।

[४८]पृ.१९१, तत्रैव।

[४९]पृ.१, तत्रैव।

पशुपक्षिवृक्षलतानां, मासानामृतूनामन्ततोगत्वानिसर्गलक्ष्म्याः काव्यमयविन्यासं करोति। शताधिकवन्यपशुपक्षिणां निरूपणं कृत्वा शताधिकभारतीयपर्वणां समुज्ज्वलवर्णनं विद्धाति, ऋतुचित्रं च नित्यनूतनरूपेण विस्तारयति कथाकारः विशाखरूपेण। विद्या-विद्यास्थान-शास्त्रागम-मन्त्र-तन्त्र-राग-सङ्गीत-साधनाभिः उपन्यासस्य प्रतिपुटं परिव्याप्तं वर्तते। मार्गे आगताः सङ्गम-प्रतिष्ठानपुर-विदिशा-दशार्णदेश-मथुराः वर्णिताः, क्रमप्राप्ताः वैदेशिकाः, बौद्धाः भिक्षवश्चापि वर्णिताः, पुरुरवोर्वश्युपाख्यानस्य, मेघदूतस्य च वर्णनमत्र लभ्यते। मातुः स्मरन् तस्याः व्रताचरणानि स्मरति विशाखः, ठक्कुरस्य कुशूले विविधधान्यानि पश्यति, आयुर्वेदाचार्यस्य वाटिकायां विविधवृक्षाणां साक्षात्कारं करोति। कुलव्रताचरणविषये विशाखमाता वदति- "इमानि व्रतानि मम मात्रा उपदिष्टानि। तस्यै तस्या मात्रा .. .. मम मातामह्या ....उपदिष्टानि। इमानि अस्माकं कुलव्रतानि। मातुः गौरवं तु सर्वेभ्यः अतिरिच्यते। मातुरुपदेशात् कुलधर्माच्च व्रतमाचरामि। कुलधर्मं न हास्यामि।"[५०] नलिनीदलगतजलस्येव तरलजीवनस्य चित्रीकरणे आचार्यस्य लेखनी महीयते। उक्तञ्च दयानन्दभार्गवेण–

आग्यमध्यान्तग्रन्थिभिर्विमुक्ता सौख्यदायिनी।
जयतान्निर्ग्रन्थिः श्रीमद्राधावल्लभलेखनी॥[५१]

## २.१४. हठात् समापनम्

अद्यतनीयकथासंसारस्य समापनं ज्ञातसारेण न मधुरीक्रियते न वा वृथोपदशैः भाराक्रान्तम्। यत्र कुत्रापि कथा समाप्यते, येन पाठकस्तदनन्तरमपि चिन्तयितुं बाध्यो भवति। "तदानीमेव सुश्रवा आगतः। स आह- इदानीं सर्वमुपपन्नं जातम्। कनिष्कस्य सैन्यं पृष्ठतः आगतम्। पलायमानो नरो विधृतः।"[५२] एवमेव सहसा समाप्तोऽयमुपन्यासः।

## २.१५. लक्षणस्य सङ्गमनम्

"कविगतसमाधिनिष्यन्दभूतं विविधविद्यावदातं सकलशास्त्रतत्त्वसमन्वितं जीवनस्य सर्वाङ्गीणं रूपं निर्दिशत् जगतो नानावस्थानां परिज्ञाने

[५०] पृ.११, अन्यच्च, उपर्युक्तम्।

[५१] पृ.८, सरस्वतीसौरभम्, १-२, उपर्युक्तम्।

[५२] पृ.२१२, अन्यच्च, उपर्युक्तम्।

प्रमाणभूतमभिनवकल्पनाभिरामं काव्यमुत्तमोत्तमम्।”[५३] एवमेव आधिभौतिकाधिदैविकाध्यात्मिकेति त्रिषु स्तरेषु चरितार्थतां गतं काव्यमेव भारतीयतायाः प्रतिमानं भवेदिति उत्तमोत्तमकाव्यलक्षणं सुष्ठु सङ्गच्छतेऽत्र। अथवा “जीवनस्यैकदेशनिरूपणपरमाख्यानं कथा, गद्यबद्ध उपन्यासो महाकाव्यमयी कथा।”[५४] इति राधावल्लभीयं लक्षणमपि सुष्ठु सङ्गच्छते। हर्षदेवस्य तु वाक्यमेव महाकाव्यमयत्वं भजतेति का कथा उपन्यासस्य? यथा- “चक्रवाको ननु भाग्यवान् अस्ति यतः असौ चीत्कारं कर्तुं शक्तिमान् अस्ति। चैतन्यरहितोऽहं न श्रावयितुं शक्नोमि मे विषादम्। पुटपाकप्रतीकाशोऽसौ मामेव पचति मयि।”[५५] त्रिपाठिकृतस्योपन्यासस्य महाकाव्यमयत्वं विश्वकोषत्वन्तु सिद्धमस्त्येव।

## ३.उपसंहारः

एवमेव ज्ञातमस्माभिर्यदेतेषु उपन्यासेषु कश्चन एवंविधो भावः परिस्फुरति, यस्तं तमुपन्यासं सर्वसाधारणपाठकस्य बोधगम्यं कारयित्वा तस्य चिरन्तनत्वं सनातनत्वं सार्वकालिकत्वं च विधाय राष्ट्रस्य संयोगात्मकं पक्षं द्रढयति। इयमेव प्राच्यज्ञानपूरिता भारतभावना कथिता विद्वद्भिः, या सम्यगालोचिता।

अन्तत उपसंहारमुखेन अन्यच्च इत्यस्य कृते शर्ममञ्जुलतया उक्तेन वचनेन सर्वेषामेतेषां कालजयिनां कृतिनां कृते स्ववचनमाविष्करोमि तावत्- “अतः अन्यच्च परम्पराओं को बताने की गाथा है, शास्त्रों को पहुँचाने का प्रयास है और विज्ञान को सिद्ध करने की प्रयोगशाला है। यह एक ऐसा विलक्षण उपन्यास है जिसने अपनी प्रस्तुति से संस्कृत उपन्यासों के मध्य एक दीर्घ रेखा खींच दी है अब हम सिर्फ दूसरी रेखा का इन्तजार कर सकते हैं।”[५६] सत्यमेव एस्.एल्.भैरप्पस्य सार्थ-धर्मश्री-आवरणादि-कन्नडोपन्यासान्, मनोजदासस्य अमृतफलम्, प्रतिभारायस्य याज्ञसेन्यादीन् ओडियोपन्यासान् विहाय प्रान्तीयभाषायामपि सर्वगुणसम्पन्नोपन्यासानामभावो लक्ष्यते किं पुनः संस्कृते। अन्यच्च उपन्यासः तथाविध उपन्यासो वर्तते, यः शिवराजविजयेन समारब्धस्य संस्कृतोपन्याससाम्राज्यस्य अवसानं संसूचयन् अभिनवकालस्य

---

[५३]उत्तमकाव्यलक्षणम्,प्रथमाननम्,रसगङ्गाधरः।

[५४]अभिनवकाव्यालङ्कारसूत्रम्, सू.३.१.१३., उपर्युक्तम्।

[५५]पृ.६५, मूको., उपर्युक्तम्।

[५६]पृ.२५, सरस्वतीसौरभम्, १-२, उपर्युक्तम्।

वैश्विकफलके नित्यनूतनोपन्यासससाम्राजस्य शुभारम्भं विदधाति।

☆ ☆ ☆

## परिशीलितग्रन्थसूची

१. रामकरणशर्मा. (१९९४) रयीशः. देहली : प्रतिभाप्रकाशनम्।
२. हर्षदेवमाधवः. (२००६) मूको रामगिरिर्भूत्वा. हिन्द्यनुवादः-डॉ.मञ्जुलताशर्मा. देहली : राष्ट्रियसंस्कृतसंस्थानम्।
३. राधावल्लभत्रिपाठी. (२०११) अन्यच्च. नवदेहली : संस्कृतभारती।
४. प्रमोदकुमारनायकः. (२०१२)। स्वर्गपुरे (संस्कृते व्यङ्ग्योपन्यासः). सम्पा. नारायणदाशः. कोलकाता : श्रीमती सवितादाशः।

# काव्यशास्त्रे शास्त्रान्तराणां प्रभावः

धर्मेन्द्रकुमारसिंहदेवः*

## ०. भूमिका

प्राचीनकालेऽस्मिन् भारतवर्षे यैराचार्यैर्मनीषिभिः काव्यशास्त्रसिद्धान्तानां विकासो निष्पादितः, ते न केवलं काव्यशास्त्रस्य ज्ञातारः पण्डिता वा बभूवुः अपि त्वन्येषाम् अनेकेषां शास्त्राणां व्याकरणदर्शनादीनाम् अपि तत्त्वानाम् अभिज्ञा अवर्तन्त। अतः स्वाभाविकम् एतद् यत् काव्यशास्त्रविवेचना अन्यैरपि शास्त्रैः प्रभाविता भवेत्। अयम् एव हेतुर्यत् संस्कृतकाव्यशास्त्रविकासेऽन्येषां शास्त्राणां प्रभावः स्वभावतो ध्रुवं परिलक्षितो भवति। काव्यशास्त्रं प्राध्यान्येन यैः शास्त्रैः प्रभावितं सञ्जातं तानि सन्ति– व्याकरण-न्याय-साङ्ख्य-पूर्वोत्तरमीमांसाः। प्रभावस्याऽस्य संक्षिप्तदिग्दर्शनं काव्यशास्त्रजिज्ञासुभ्य उपयोगि वर्तते।

## १. व्याकरणशास्त्रस्य प्रभावः

काव्यशास्त्रस्य विकासे व्याकरणशास्त्रस्य प्रभावोऽनेकविधो लक्ष्यते। व्याकरणशास्त्रस्याऽयं प्रभावो मुख्यरूपेण ध्वनिविवेचने, अभिधेयार्थप्रतिपादने, उपमायाश्च भेदोपभेदविवेचने संलक्ष्यते।

ध्वनिसिद्धान्तप्रतिपादनं प्रतिष्ठापनञ्च प्रथमं तावदानन्दवर्धनेन विहितम्। आनन्दवर्धनो जगाद– प्रमुखाः विद्वांसो हि वैयाकरणाः भवन्ति। व्याकरणमेव सर्वासां विद्यानां मूलम्। वैयाकरणाः श्रूयमाणेषु वर्णेषु ध्वनिं व्यवहरन्ति। काव्यशास्त्रिणोऽपि तेषामेव मतमनुसृत्य वाच्यार्थे वाचकशब्दे व्यङ्ग्यार्थे, व्यञ्जकशब्दे व्यञ्जनाव्यापारे च ध्वनिपदं व्यवहरन्ति। तथाहि– प्रथमे हि विद्वांसो वैयाकरणाः, व्याकरणमूलत्वात् सर्वविद्यानाम्। ते च श्रूयमाणेषु वर्णेषु ध्वनिरिति व्यवहरन्ति। तथैवाऽन्यैस्तन्मतानुसारिभिः काव्यतत्त्वार्थदर्शिभि-र्वाच्यवाचकसम्मिश्रः शब्दात्मा काव्यमिति व्यपदेश्यो व्यञ्जकत्वसाम्याद् ध्वनिरित्युक्तः।[१]

काव्यप्रकाशकृन्मम्मटोऽप्यानन्दवर्धनस्य कथनमेतत् समर्थयामास। तेन प्रोक्तम्– ध्वनिपदव्यवहारे काव्यशास्त्रिणो वैयाकरणानन्वसरन्। वैयाकरणाः

---

*सहायकाचार्यः, साहित्यविभागे, राष्ट्रिय-संस्कृतसंस्थानस्य भोपालपरिसरे।

[१]ध्वन्यालोके (१.१३) वृत्तौ

प्रधानभूतस्फोटरूप-व्यङ्ग्यव्यञ्जकशब्दं ध्वनिं जगदुः। ताननुसृत्य काव्यशास्त्रिणोऽपि वाच्यार्थातिशायिनो व्यङ्ग्यार्थस्याऽभिव्यञ्जकं शब्दार्थयुगलं ध्वनिं प्रोचुः। यथा– बुधैर्वैयाकरणैः प्रधानभूतस्फोटरूपव्यङ्ग्यव्यञ्जकस्य शब्दस्य ध्वनिरिति व्यवहारः कृतः। ततस्तन्मतानुसारिभिरन्यैरपि न्यग्भावित-वाच्यव्यङ्ग्यव्यञ्जनक्षमस्य शब्दार्थयुगलस्य।[२]

एवं काव्यशास्त्रे ध्वनिसिद्धान्तविकासक्रमे व्याकरणशास्त्रप्रभावः सुस्पष्टं लक्ष्यते। ध्वनिसिद्धान्तस्य विकासो वैयाकरणानां स्फोटसिद्धान्ताश्रयेण प्रादुबर्भूव। महाभाष्यकारः शब्दमेवं ध्वनिं प्रोवाच। तस्य विवेचनम् इत्थं वर्तते– कस्तर्हि शब्दः? येनोच्चारितेन सास्नालाङ्गूल-ककुदखुरविषाणिनां सम्प्रत्ययो भवति स शब्दः। अथवा प्रतिपदार्थको लोके ध्वनिः शब्द इत्युच्यते। तद्यथा – शब्दं कुरु, शब्दं मा कार्षीः, शब्दकार्ययं को माणवक? इति ध्वनिं कुर्वन्नेवमुच्यते। तस्माद् ध्वनिः शब्दः।[३]

वैयाकरणानां मन्तव्यमिदम्– गौरिति पदस्योच्चारणे त्रयो वर्णाः श्रूयन्ते– ग्+औ+(विसर्गः)। परं न तेषामेकस्मिन्नेव काले समुपस्थितिः। ग् वर्णस्योच्चारणे औ-विसर्ग-वर्णयोर्ध्वनिर्नास्ति। तदनन्तरं औ इति वर्णस्योच्चारणे ग्-विसर्ग-वर्णयोर्ध्वनिर्नास्ति। अथ च विसर्गवर्णस्योच्चारणे ग्-औ-वर्णयोर्ध्वनिरनुपस्थितो वर्तते। वर्णानां तदुच्चारणानन्तरमेव विनाशप्रसङ्गात्। अतः प्रश्नोऽयं समुल्लसति यद् गौः इति समग्रपदस्याऽर्थबोधः कथं जायेत? विसर्ग-वर्णोऽर्थबोधनेऽक्षमः सकलपदार्थबोधनाक्षमत्वात्। गौः इति पदमपि नाऽर्थावबोधने क्षमः समग्रवर्णानामुपस्थित्यभावात्। प्रश्नस्याऽस्य समाधानं वैयाकरणैः स्फोटसिद्धान्तं प्रतिपाद्य कृतम्। तेषां कथनमस्ति, सम्पूर्णपदोपस्थितिप्रसङ्गे पूर्वपूर्ववर्णोच्चारणान्तरम् अन्तिमवर्णोच्चारणे पूर्वपूर्ववर्णविनाशेऽपि तेषां स्मृतिरवशिष्टा भवति। इयं पूर्ववर्णस्मृतिरन्तिमवर्णध्वनिना संयुज्याऽर्थं बोधयति। अयमेव स्फोटो वर्तते, ध्वन्यात्मकश्चाऽसौ। तथाहि– पूर्वपूर्ववर्णानुभवजनितसंस्कारसहकृतान्यवर्णानुभवः स्फोटो व्यज्यते, स च ध्वन्यात्मकः।

वैयाकरणाः ध्वनिपदव्यवहारः केवलं शब्द एव चक्रुः।

---

[२]काव्यप्रकाशे (१.४) वृत्तौ

[३]महाभाष्ये, प्रथमे आह्निके

काव्यशास्त्रविद्भिर्ध्वनिपदग्रहणे वैयाकरणाम् अनुसरणं तु कृतं, परन्तु तस्याऽभिप्राये किञ्चित् परिवर्तमनपि विहितम्। ते तु वाच्यार्थवाचकशब्दव्यङ्ग्यार्थव्यञ्जनाव्यापारेषु सर्वेषु पञ्चसु तत्त्वेषु ध्वनिपदप्रयोगं विनिवेशयामासुः।

अभिधेयार्थस्वरूपनिर्धारणेऽपि काव्यशास्त्रिणो वैयाकरणानन्वसरन्। मम्मटेन काव्यप्रकाशे प्रतिपादितम्- सङ्केतितोऽर्थश्चतुर्विधो भवति जाति-गुण-क्रिया-संज्ञारूपः। अथ च केवलं जातिरूपो वा। यथा–

सङ्केतितश्चतुर्भेदो जात्यादिर्जातिरेव वा।[४]

सङ्केतितस्य चतुर्विधत्वप्रतिपादनाय मम्मटो महाभाष्यारं प्रमाणरूपेण प्रास्तौत्। तेन प्रोक्तम्– गौः शुक्लश्चलो डित्थ इत्यादौ चतुष्टयी शब्दानां प्रवृत्तितरिति महाभाष्यकारः। तत्रैव वृत्तौ अनेकार्थकशब्दानां वाचकतायाः नियमनाय मम्मटो भर्तृहरेः वाक्यपदीयं ग्रन्थं प्रमाणं मेने, तस्य च ग्रन्थस्य प्रसिद्धौ संयोगविप्रयोग इत्यादी श्लोकावुद्धृतवान्।

उपमायाः भेदोपभेदविवेचनेऽपि काव्यशास्त्रिणो वैयाकरणानन्वसरन्। साहित्यदर्पणे पूर्णोपमायाः द्वो भेदौ प्रोक्तौ– श्रौती आर्थी च। तयोर्लक्षणं विद्यते–

श्रौती तथैव वा शब्दा इवार्थो वा वतिर्यदि।
आर्थी तुल्यसमानाद्या तुल्यार्थो यत्र वा वतिः॥ (साहित्यदर्पणे १०.१६)

श्रोती उपमा तत्र भवति, यत्रोपमायां यथा-इव-वा इत्यादीनां सादृश्यार्थकानां पदानां प्रयोगो विधीयते, यत्र वा 'तत्र तस्येव' (अष्टाध्यायी ५.१.११६) इति सूत्रेण इवार्थे वतिप्रत्ययो विधीयते। अथ च आर्थी उपमा तत्र कथ्यते यत्र तुल्यसमानादीनामुपमावाचकानां शब्दानां प्रयोगो विधीयते। अथ च यत्र तुल्यार्थे 'तेन तुल्यं क्रिया चेद्वतिः' (पाणिनि. ५.१.११५) इति सूत्रेण वतिप्रत्ययो विधीयते।

पूर्णोपमाभेदान् प्रतिपादयन् मम्मटो व्याकरणमाशिश्रिये-

....................साऽग्रिमा।
श्रौत्यार्थी च भवेद् वाक्ये समासे तद्धिते तथा॥ (काव्यप्रकाशे १०.८७)

अग्रिमा (प्रथमा) पूर्णोपमा द्विविधा वर्तते- श्रौती आर्थी च। पुनस्ते द्वे अपि त्रिविधे भवतः– वाक्यगता, समासगता तद्धितगता च।

पूर्णोपमायाः श्रौत्यार्थीभेदयोरुपभेदाः केषुचिदंशेषु व्याकरणशास्त्रेण नियमिताः भवन्ति, परं लुप्तोपमायाः पञ्चभेदा सम्पूर्णतो व्याकरणसूत्रैर्नियम्यन्ते।

---

[४]काव्यप्रकाशे २.८

साहित्यदर्पण-कारेणैते भेदा एवं परिगणिताः–

आधारकर्मविहिते द्विविधे च क्यचि क्यङि।
कर्मकर्त्रोर्णमुलि च स्यादेवं पञ्चधा पुनः॥ (साहित्यदर्पणे १०.१९)

एते भेदाः काव्यप्रकाशे इत्थं सन्ति–

वादेर्लोपे समासे वा कर्माधारक्यचि क्यङि।
कर्मकर्त्रोर्णमुलि......॥ (काव्यप्रकाशे १०.८९)

एवमुपमाभेदनिर्धारणे व्याकरणशास्त्रस्य प्रभावो बाहुल्येन संलक्ष्यते। न केवलं मम्मट एव प्रभावमेतं सुविशदं व्याकरोदथ च मम्मटात् पूर्ववर्तिष्वपि काव्यशास्त्रग्रन्थेषु प्रभाव एषो दरीदृश्यते। भामहेन वतिनाऽपि क्रियासाम्यमिति लिखित्वा प्रभाव एषः प्रदर्शितः। उद्भटस्ततोऽधिकं विशदरूपेण प्रभावमेतं प्रदर्शितवान्।

वामनेन काव्यालङ्कारसूत्रस्य पञ्चमेऽधिकरणे भामहेन काव्यालङ्कारस्य षष्ठाध्याये ३०-३१ श्लोकयोः काव्यभाषायां व्याकरणशुद्धताऽनिवार्यरूपेण प्रतिपादिता। काव्येषु व्याकरणदोषाश्च्युतसंस्कृतिदोषाः प्रोक्तास्ते च नित्यदोषाः सत्कविभिः सदा परिहर्तव्याः।

## २. न्यायशास्त्रस्य प्रभावः

न्यायशास्त्रमपि काव्यशास्त्रं प्रभावयामास। तर्कशास्त्रे शब्दशक्तिविवेचनम् (अभिधाविवेचनम्) अस्ति। अभिधामातृकावृत्ति-शब्दव्यापारविचार-त्रिवेणिका-वृत्तिकादि-ग्रन्थेषु शब्दशक्तिमाश्रित्य विषयविवेचनं ग्रन्थकारैर्विहितम्।

व्यक्तिविवेकग्रन्थकृन्महिमभट्टो व्यञ्जनावादिनां व्यङ्ग्यार्थप्रतीतिमनुमानेनैव प्रतिपादयामास। ध्वनेरन्तर्भावमसावनुमान एव कर्तुं प्रायतिष्ट।

अनेकेषामलङ्काराणां विकासक्रमेऽनुमानस्य योगो दरीदृश्यते। अनुमानालङ्कारोऽपि काव्यशास्त्रविधायिभिः परिभाषितः। हेतुकाव्यलिङ्गादीनाम् अलङ्काराणाम् उद्भावनेऽनुमानस्याश्रयः काव्यालङ्कारलक्ष्मविधायिभिर्मनीषिभिः स्वीकृतः। अप्पयदीक्षितस्तु प्रत्यक्षादिप्रमाणान्यप्य-लङ्काररूपेण स्वीकृतवान्।

रसनिष्पत्तिव्याख्यायामप्यनुमानस्याऽऽश्रयः कैश्चिद् रससूत्रव्याख्याकारैर्गृहीतः। "विभावानुभावव्यभिचारिसंयोगाद् रसनिष्पत्ति"रिति भरतसूत्रस्य व्याख्या शङ्कुकेन अनुमानमेवाश्रित्य प्रस्तुता।

## ३. साङ्ख्यशास्त्रस्य प्रभावः

काव्यशास्त्रे साङ्ख्यशास्त्रस्य प्रभावो बाहुल्येनाऽविद्यमानोऽपि केषुचिदंशेषु कुत्रचित् संलक्ष्यत एव। भरतसूत्रस्य भट्टनायककृतव्याख्यायां साङ्ख्यप्रभावः संलक्ष्यते। रससूत्रस्य व्याख्यायां भट्टनायकेन सत्त्वरजस्तमसां त्रयाणां गुणानां भोजकत्व-सिद्धान्तस्य च प्रतिपादनं विहितम्। साङ्ख्यदर्शने प्रकृतिस्त्रिगुणात्मिका सत्त्वरज-स्तमोमयी प्रोक्ता, तस्याश्च भोक्ता पुरुषो वर्तते। भट्टनायकेन प्रतिपादितम्- भावकत्वव्यापारेण स्थायिभावे भाविते सति तस्य रजोगुणस्य तमोगुणस्य चाऽभिभवो भवति। सत्त्वगुणस्य चोद्रेकः सञ्जायते। तदनन्तरं सामाजिको भोजकत्वव्यापारेण तस्य भोगं करोति(आस्वादयति)।

## ४. मीमांसाशास्त्रस्य प्रभावः

काव्यशास्त्रविकासे मीमांसादर्शनस्यापि (पूर्वमीमांसादर्शनस्य) प्रभावः संलक्ष्यते, विशेषतस्तु शब्दशक्तीनां व्याख्याने ध्वनिवादिभिराचार्यैरभिधा-लक्षणाव्यञ्जनास्त्रिविधाः शब्दशक्तयो वाच्यलक्ष्यव्यङ्ग्याश्च त्रिविधा अर्थाः स्वीकृताः। परन्तु मीमांसकाः व्यञ्जनावृत्तिं नाऽङ्गीकुर्वन्ति।

अथ च मीमांसकानामेकः सम्प्रदायो (अभिहितान्वयवादी) वाक्यार्थबोधनाय तात्पर्यां वृत्तिं प्रतिपादयन् वाक्यार्थं तात्पर्यार्थं ब्रूते। मीमांसका एते वदन्ति– वाक्ये पदमभिधया पदार्थमेव बोधयति, न तु वाक्यार्थम्। वाक्ये वाक्यार्थः पदार्थानामन्वये सत्यवबुध्यते। पदानामयमन्वयस्तात्पर्यवृत्या सम्पद्यते। कुमारिलभट्टानुयायिनां मीमांसकानामेतन्मतम्।

परमन्यो मीमांसकसम्प्रदायो (प्राभाकराः– अन्विताभिधानवादिनः) न तात्पर्यवृत्तिमङ्गीकरोति। पदानाम् अन्वितोऽर्थोऽभिधेयैव सम्पद्यत इति तेषां मतम्। तात्पर्यावृत्तिवादिनो मीमांसका अभिहितान्वयवादिनः सन्ति। परं तात्पर्यवृत्तिं ये नाङ्गीकुर्वन्ति तेऽन्विताभिधानवादिनः कथ्यन्ते। मम्मटस्तु काव्यप्रकाशे द्वयोरेव मतयोरुल्लेखं कृत्वाऽकथयत्– केचन आचार्यास्तात्पर्यां वृत्तिं प्रतिपादयन्ति। तथाहि– तात्पर्यार्थोऽपि केषुचित्। (काव्यप्रकाशे २.१)

विश्वनाथेनाऽपि लिखितम्– “तात्पर्यार्थबोधनायाऽभिहितान्वयवादिनस्तात्पर्यां वृत्तिं मन्वते।” तथाहि –

तात्पर्याख्यां वृत्तिमाहुः पदार्थान्वयबोधने।

तात्पर्यार्थं तदर्थञ्च वाक्यं तद्बोधकं परे॥(सा.द.२.२०)

सङ्केतग्रहणप्रसङ्गेऽपि ध्वनिवादिन आचार्याः मीमांसादर्शनं पस्पर्शुः। सङ्केतग्रहणं कस्मिन् भवतीति विषये मम्मटेन द्वौ पक्षौ प्रस्तुतौ– जात्यादिवादिनो जातिवादिनश्च। वैयाकरणाः सङ्केतग्रहणं जात्यादिषु (जातौ, गुणे, क्रियायां सञ्ज्ञायाञ्च) मन्वते। परं मीमांसकाः सङ्केतग्रहणं जातावेव प्रतिपादयन्ति। गुणः क्रिया संज्ञा च जातिरेवेति मीमांसकमतं मम्मटेन निर्दिष्टम्- "गुणक्रियायदृच्छानां वस्तुत एकरूपाणामपि भेद एव संलक्ष्यते। यथैकस्य मुखस्य खड्गमुकुरतैलाद्यालम्बनभेदात्। हिमपयः-शङ्खाद्याश्रयेषु परमार्थतो भिन्नेषु शुक्लादिषु यद्वशेन शुक्लः शुक्लः इत्यभिन्नाभिधान-प्रत्ययोत्पत्तिस्तच्छुक्लत्वादिसामान्यम्। गुडतण्डुल-पाकादिष्वेवमेव पाकत्वादि। बालवृद्धशुकाद्युदीरितेषु डित्थादिशब्देषु च प्रतिक्षणं भिद्यमानेषु डित्थाद्यर्थेषु वा डित्थत्वाद्यस्तीति सर्वेषां शब्दानां जातिरेव प्रवृत्तिनिमित्तमिन्यन्ये।"[५]

लक्षणानिरूपणेऽपि काव्यशास्त्रे मीमांसकानां प्रभावः संलक्ष्यते। गौर्वाहीको गौरयञ्चेति गौणीसारोपालक्षणायाः गौणीसाध्यवसानालक्षणायाश्चोदाहरणयोर्गोगताः गुणाः वाहीके कथं लक्ष्यन्त इति विवेचने मम्मटः कुमारिलभट्टस्य तन्त्रवार्तिकग्रन्थस्य श्लोकमेकमुद्धृतवान्–

अभिधेयाविनाभूतप्रतीतिर्लक्षणोच्यते।
लक्ष्यमाणगुणैर्योगाद् वृत्तेरिष्टा तु गौणता॥

मीमांसकाः व्यञ्जनावृत्तिं न स्वीकुर्वन्ति। व्यञ्जनावादिनां व्यङ्ग्यार्थं तेऽभिधाप्रतिपाद्यं साधयन्ति। ध्वनिवादिभिराचार्यैः मीमांसकानां मतमिदं सबलं सप्रमाणञ्च खण्डितम्। काव्यप्रकाशस्य पञ्चमोल्लासे मीमांसकानां युक्तीनां वादानाञ्च- अभिहितान्वयवादस्य, अन्विताभिधानवादस्य, नैमित्तिकानुसारेण निमित्तानि कल्प्यन्ते, इषोरिव दीर्घदीर्घतरो व्यापारः, यत्परः शब्दः स शब्दार्थः, लोहितोष्णीषा ऋत्विजः प्रचरन्ति, श्रुतेरनन्तरं यावानार्थो लभ्यते तावति शब्दस्याऽभिधेय व्यापार इति सर्वेषां मतानां खण्डनं कृत्वा मम्मटाचार्यः काव्ये व्यञ्जनावृत्तिं व्यङ्ग्यार्थञ्चाऽनिवार्यरूपेण प्रतिपादयामास।

लक्षणावृत्त्या प्रतिपादितस्य लक्ष्यार्थस्य प्रयोजनस्य च भिन्नत्वमस्तीति तथ्यं ध्वनिवादिभिराचार्यैः मीमांसान्यायदर्शनयोः प्रमाणैरेव साधितम्। मम्मटाचार्येण

[५] काव्यप्रकाशे २.८ वृत्तौ

प्रोक्तम्– मीमांसका यथा ज्ञानविषयस्य ज्ञानफलस्य च भिन्नत्वं प्रतिपादयन्ति, तथैव लक्षणाजन्यस्य ज्ञानस्य(लक्ष्यार्थस्य) फलस्य(प्रयोजनस्य) च भिन्नत्वमस्त्येव। यथा–

प्रयोजनेन सहितं लक्षणीयं न युज्यते।
ज्ञानस्य विषयो ह्यन्यः फलमन्यमुदाहृतम्॥ (काव्यप्रकाशे २.१७-१८)

अथ चालङ्काराणां निरूपणेऽपि काव्यशास्त्रे मीमांसकानां प्रभावः संलक्ष्यते। मीमांसकानामर्थापत्ति-प्रमाणमधिकृत्य काव्यशास्त्रिभिरर्थापत्त्यलङ्कारोऽङ्गीकृतः। एवमेव परिसङ्ख्यालङ्कारस्य परिसङ्ख्यापदमपि मीमांसकानामेकः प्रसिद्धः पारिभाषिकशब्दो वर्तते।[६]

## ५. वेदान्तस्य(उपनिषदां) प्रभावः

काव्यशास्त्रे वेदान्तस्योपनिषदां वा प्रभावः क्वचित् संलक्ष्यते। प्रभाव एष रसस्वरूपविवेचने प्राधान्येन वर्तते। ध्वनिवादिन आचार्याः सामान्यतो रसात्मानञ्चैकरूपं जगदुः। तैत्तिरीयोपनिषदो ब्रह्मानन्दवल्ल्यामात्मा रसः प्रोक्तो, येनासावानन्दरूपो भवति। रसो वै सः। रसं ह्येवाऽयं लब्ध्वाऽऽनन्दीभवति।(तैत्तिरीयोपनिषदि ब्रह्मानन्दवल्ली)

रसस्वरूपविवेचने पण्डितराजो जगन्नाथ उपनिषदामेतदवतरणमुद्धृतवान्– अस्त्यत्राऽपि रसौ वै सः। "रसं ह्येवाऽयं लब्ध्वाऽऽनन्दीभवति" इत्यादि श्रुतिः।[७]

काव्यप्रकाशे मम्मटेन रसानुभूतिर्ब्रह्मानन्दसहोदरी प्रोक्ता। अनुभूत्यां तस्यां सत्यां सर्वाण्येवाऽन्यानि वेद्यानि तिरोभवन्ति– अन्यत् सर्वमिव तिरोदधद् ब्रह्मास्वादमिवाऽनुभावयन् अलौकिक-चमत्कारी शृङ्गारादिको रसः।[८]

मम्मटाचार्यस्येदं वचः बृहदारण्यकोपनिषदो निम्नवचनेन प्रभावितं वर्तते- तद्यथा प्रियया स्त्रिया सम्परिष्वक्तो न बाह्यं किञ्चन वेद नान्तरमेवाऽयं पुरुषः प्राज्ञेनात्मना सम्परिष्वक्तो न बाह्यं किञ्चन वेद नान्तरम्। तद्वा तस्मै तदाप्तकाममकामं रूपं शोकान्तरम्। अत्र पिताऽपिता भवति...तीर्णो हि तदा सर्वान् शोकान् हृदयस्य भवति।(हदारण्यकोपनिषदि ४.३.२१)

एतेभ्यो नास्ति विनिर्मुक्तं गौडीयकाव्यशास्त्रमपि। परन्तु तत्र श्रीकृष्णविषया

[६]मीमांसादर्शने १.२.३४, ३.७.३३ द्रष्टव्यम्
[७]रसगङ्गाधरे प्रथमाननम्। रसस्वरूपविवेचनम्
[८]काव्यप्रकाशे ४.२७-२८ वृत्तौ

उत्तमा भक्तिः रत्यपरपर्यया स्थायिरूपा सती विभावादिभिः संवलिता भक्तिरसरूपतां समवगाहत इति विशेषः। उच्यते श्रीरूपगोस्वामिपादैः–

विभावैरनुभावैश्च सात्त्विकैर्व्यभिचारिभिः।
स्वाद्यत्वं हृदि भक्तानामनीता श्रवणादिभिः।
एषा कृष्णरतिः स्थायी भावो भक्तिरसो भवेत्।(उज्ज्वलनीलमणौ)

भक्तिरसस्य मूलं स्रोतो भक्तिशास्त्रे विद्यते। यद्यपि भक्तिरसस्य बीजं वैदिकवाङ्मयेऽपि समुपलभ्यते, किन्तु तस्य स्पष्टस्वरूपं भक्तिशास्त्रेषु एव परिलक्ष्यते। भगवत्साधनाया मुख्यं प्रयोजनं भगवन्तं प्रति स्नेह एव वर्तते। भक्तितत्त्वज्ञैः शाण्डिल्यनारदादिभिर्भक्तिः 'परमप्रेमस्वरूपा' तथा 'परानुरक्तिरीश्वरे' इत्यादिरूपेण प्रतिपादिता। अत एव तैः 'प्रेमा पुमर्थो महान्' इत्यादिना प्रेमा एव परमपुरुषार्थत्वेन स्वीकृतः। भगवद्रतिरेव क्रमशः प्रेमप्रणयमानस्नेहरागानुरागभाव-महाभावादिरूपेण वृद्धिं गता यदा परमोत्कर्षत्वमेति तदा सैव रसराजभक्तिरसरूपेण परिणता भवति, भक्तिरसोऽयं समस्तसौन्दर्याणां सौन्दर्यम्, समग्ररसानां च मधुरनिर्यासः, यस्यानन्दातिरेकेण जीवात्मा भक्तो वा आत्मसम्पृक्त-पर-सम्पृक्तादिभावैः सर्वथाऽसंस्पृष्टः सन् चिदानन्दमयत्वं भजते। सूर्यकिरणवद् अथवा अग्निस्फुलिङ्गवज्जीवात्मा नित्यरसस्वरूपस्य प्रेमरूपस्यानन्दस्वरूपस्य परमात्मनोंऽशोऽस्ति।

अत एव विशुद्धः प्रेमरसानन्द एव जीवस्य प्रकृतिस्वरूपं स्वभावो वास्ति। विषयानवच्छिन्नचैतन्यमेव द्रुतान्तःकरणवृत्तौ समारूढं सत् स्थायिभावस्यं तदन्तरं रसत्वञ्चोपैति दिक्।

☆ ☆ ☆

## परिशीलितग्रन्थसूची

१. श्रीरूपगोस्वामी. (१८३२) उज्ज्वलनीलमणिः. मुम्बै : निर्णयसागरप्रेस।
२. मम्मटः. (२००८) काव्यप्रकाशः. दिल्ली : परिमल प्रकाशन।
३. आनन्दवर्धनः. (१९९९) ध्वन्यालोकः. वाराणसी : ज्ञान मण्डल लिमिटेड।
४. पतञ्जलिः. (२००२) महाभाष्यम्. नई दिल्ली : राष्ट्रिय संस्कृत संस्थान।
५. जगन्नाथः. (१९८१) रसगङ्गाधरः. वाराणसी : सम्पूर्णानन्दसंस्कृत-विश्वविद्यालयः।
६. कुमारिलभट्टः. (१९८७) श्लोकवार्तिकम्. नई दिल्ली : राष्ट्रिय संस्कृत संस्थान।
७. विश्वनाथः. (१९८९) साहित्यदर्पणः. वाराणसी : कृष्णदास अकादेमी।

# विंशशतकस्य वङ्गदेशीयाः संस्कृतकवयित्र्यः

शुभ्रजित् सेनः*

## ०. भूमिका

वैदिकयुगात् प्रभृति अद्यतनकालं यावद् देवीनां संख्या यथा यस्मिन् देशे यस्यां संस्कृतौ च प्रविरलैव संदृश्यते पुरुषापेक्षया, तथैव प्राचीनकालादेव कवयित्रीणां संख्यापि स्वल्पीयसी। प्राचीनशास्त्रेषु अनेकेषां कवयित्रीणां नामानि लक्ष्यन्ते। शार्ङ्गधरपद्धतिरिति ग्रन्थे कासाञ्चित्स्त्रीणां नामानि उल्लिख्यन्ते–

शीला विज्जा मारुला मोरिकाद्याः।
काव्यं कर्तुं सन्ति विज्ञाः स्त्रियोऽपि॥
विद्यां वेत्तुं वादिनो निर्विजेतुं
विश्वं वक्तुं यः प्रवीणः स वन्द्यः॥ इति। अर्थात् कवयित्र्यः यथा–

अवन्तीसुन्दरी-जघनचपल-इन्दुलेखा-गङ्गादेवी-पद्मावती-विकटनितम्बा-विज्जका-मोरिका-मारुला-भवदेव्यादीनामनेकानि सुभाषितानि प्राप्यन्ते। किन्तु एतासां लेखिकानां वंशपरिचयोऽद्यापि विवादधूमावृतः। श्रूयते प्रियंवदा सप्तदशशतके श्यामरहस्यं लिलेख। विज्जकायाः कस्मिंश्चिच्छ्लोके आत्मगौरवं प्रकाश्यते–

नीलोत्पलदलश्यामां विज्जिकां मामजानता।
वृथैव दण्डिना प्रोक्ता सर्वशुक्ला सरस्वती॥ इति।

पुनश्च मम्मटेन काव्यप्रकाशे शीलाभट्टारिकायाः कश्चन रसप्रधानः श्लोक उद्धृतः–

यः कौमारहरः स एव हि वरस्ता एव चैत्रक्षपास्-
ते चोन्मीलितमालतीसुरभयः प्रौढाः कदम्बानिलाः।
सा चैवास्मि तथापि तत्र सुरतव्यापारलीलाविधौ
रेवारोधसि वेतसीतरुतले चेतः समुत्कण्ठते॥

(काव्यप्रकाशे प्रथमोद्योते)

किन्तु अत्र सर्वासां विद्यानां प्रधाणनियन्त्रकशक्तिः एकस्यां देव्यां सरस्वत्यां निहिता वर्तते, तथापि अधुनापि स्त्रियः स्वल्पमात्रयैव काव्यानि कुर्वन्ति।

---

*सहायकाचार्यः, संस्कृतविभागे, दीवान-आब्दुल-गनि-महाविद्यालये, हरिरामपुरस्थे, दक्षिणदिनाजपुरमण्डले।

नवनवोन्मेषशालिप्रज्ञावशाद्भारतवर्षे खलु विंशशताब्दीया धीमत्यः अङ्गुलिमेयाः कवयित्र्यः अपि स्वप्रतिभापल्लवविस्तारेण प्रयतमाना अभवन्।

## १. नवदशशतकीयाः काश्चन कवयित्र्यः

**१.१. आनन्दमयी देवी–** अष्टादशशताब्द्यां सुपण्डिता स्त्री काचन। सा वेदेभ्यः अग्निष्टोमयज्ञस्य नैकान् वृत्तान्तान् यज्ञकुण्डस्याकारान् च पित्रे विनिवेदितवती। तया 'हरिलीले'ति काव्यं विरचितम्। तस्मिन् काव्ये प्रयुक्तानि पदानि तस्या असामान्यव्युत्पत्त्याः प्रमाणं निदर्शयन्ति स्म।

**१.२. उमादेवी–** काचन कवयित्री। संस्कृतसाहित्येर् इतिवृत्त इति ग्रन्थे गोपेन्दुमुखोपाध्यायः कवयित्रीषु उमादेव्याः नामोल्लिखितवान्। तया लिखिते 'आभाणकमाले'ति ग्रन्थे विविधानां भाषाणां प्रवादजातं संस्कृतभाषयानूदितम्।

**१.३. ऋतात्रिवेदी–** एकविंशशतकस्य प्रसिद्धा कवयित्री। राधावल्लभत्रिपाठी आधुनिक-संस्कृतसाहित्य-सन्दर्भसूच्यां ऋतादेव्याः सारस्वतकर्मणः समुल्लेखं कृतवान्। सा 'सूर्याय ते नमः' इति चतुर्भाषामयं काव्यसङ्ग्रहं २०१० खीष्टाब्दे प्रकाशितवती।

**१.४. करुणामयी–** पश्चिमवङ्गस्य वाँकुडाजिल्लान्तःपातिनो लेगोग्रामे जन्म लब्धवती। सा ऊनविंशशतकस्य कवयित्री आसीत्। न्यायशास्त्रं सा तस्याः मातुलस्य सकाशादधीगतवती। तया सह सङ्गीतशिल्पिनो रमापतिवन्द्योपाध्यायस्य विवाहोऽभूत्। विवाहात्परं सा संस्कृतभाषायां वङ्गभाषायाञ्च नैकानि गीतानि विरचितवती। 'सङ्गीतबोधः' तथा च 'गीतरत्नावली'ति ग्रन्थद्वितये तया विरचितानि गीतानि स्थानमलभन्त।

**१.५. कामाक्षी–** १९०२ तमे वर्षे अजायत। सापि विशिष्टा काचन आधुनिक-कवयित्रीषु अन्यतमा। तस्याः 'रामचरितमि'ति मौलिककाव्यग्रन्थे कालिदासेन कृतमहाकाव्यानां संक्षिप्तसारो वर्णितः।

**१.६. ज्ञानसुन्दरी–** प्रख्यातस्य कुप्पुस्वामिशास्त्रिणः छात्रासीत्। सा १९१० खीष्टाब्दे इहलोकं परित्यज्य परलोकं गता। 'हालास्यचम्पूरि'ति चम्पूकाव्यं षड्भवकैः प्रपूरितं रचितं ज्ञानसुन्दरीदेव्या। कविरत्नाख्योपाधिं प्राप्तवती सा। आसीत्सा तदानीन्तनकालस्य विशिष्टैका नृत्यशिल्पी।

१.७. **त्रिवेणी–** अर्वाचीनसंस्कृतसाहित्यवीथिकायां विशिष्टकवयित्रीत्वेन प्रतिष्ठिता अवर्तत। सा १८१७ ईशवीये वर्षे जनिं लेभे। विवाहात् पूर्वं सा कवितां लिखितुं प्रारब्धवती। समस्यापूर्तौ सासीद् अतीव दक्षा। तया विरचिताः कविताः तावत् लक्ष्मीसहस्रम्, रङ्गनाथसहस्रम्, शुकसन्देशः, भृङ्गसन्देशः, रङ्गाभ्युदयम्, सम्पत्कुमारविजयश्चेति। रङ्गराड्समुदयः तत्त्वमुद्राभद्रोदयश्चेति रूपकधर्मिनाटकद्वयं तेन विरचितम्। १८८३ ईशवीये वर्षे सा मृत्युं गता।

१.८. **नलिनीशुक्ला–** आधुनिकसंस्कृतसाहित्ये विशेषेण कथाकाव्यादिकृत्सु अन्यतमेत्यत्र नास्ति विप्रतिपत्तिः। सा व्यथितेति नाम्ना परिचिता। १९४० ईशवीयाब्दस्य जुनमासस्य अष्टमदिनाङ्के सा इटाओयाजनपदस्य कन्धेसीग्रामं स्वजन्मनालङ्कृतवती। तस्याः पिता हि पण्डितः इन्द्रदत्तमिश्रः। नलिनी पाठं समाप्य कानपुरस्य ए.एन्.डि-महाविद्यालये संस्कृतविभागस्य प्राध्यापिकाभूत्। संस्कृतभाषया तया बहवो ग्रन्थाः विरचिताः–

१. भावाञ्जलिः २. स्वरूपलहरी ३. प्रकीर्णम्
४. प्रमथरश्मिः ५. तर्कभाषासमीक्षणम् ६. कथाम्बरा
७. योगभाष्यालोकश्चेति।

उत्तरप्रदेशस्य सर्वकारेण सा वारत्रयं पुरस्कारं प्राप्तवती। स्वस्याः कारयितृप्रतिभार्थम्। भावाञ्जलिनामके संस्कृतकाव्यग्रन्थे तस्याः कविप्रतिभा परिस्फुटा। भाषायाः सारल्यं, माधुर्यं, चित्ताकर्षकञ्चेति गुणाः तस्यां राजन्ते। काव्यग्रन्थेऽस्मिन् कवेर्जयदेवस्य प्रभावः स्फुटः–

प्रिये चारुशीले क्षणं मुञ्च मानम्
सुधां मे सुखान्निःसृतां देहि दानम्।
क्षणं हास्यज्योत्स्नां वितर मानिनी मे
तृषां चापनय राधिके रागरूपे॥ इति।

१.९. **पुष्पादीक्षितस्य–** स्वरचितसङ्गीतेषु नारीतान्त्रिकतायाः प्रभावोऽभिव्यक्तः। 'अग्निशिखे'ति संस्कृतगीतिकवितायां पुष्पादीक्षितस्य प्रथमा-विर्भावो दृश्यते। ग्रन्थोऽयं १९८४ तमे वर्षे प्रकाशितोऽभूत्। अग्निशिखायाः सङ्गीतेषु प्रविरलतया बुद्धिदीप्तवाक्षु च प्रेम-प्रीति-विरहभावाः समभिव्यञ्जिताः।

१.१०. **वलम्मल्–** पश्चिमभारतस्य प्रख्यातेषु उपन्यासकृत्सु

एकतमार्वाचीनसंस्कृतसाहित्यं विभूषयति स्म। माद्रासनगर्यां सोवास। ‘आर्यारामायणमि’ति मौलिककाव्यसंग्रहे सरलश्लोकैः महाकाव्यीयसारः समुपवर्णितः।

१.११. **वेदकुमारीघायः**– काचन जम्मुराज्यवास्तव्या कवयित्री। सा रामप्रताप इति काव्यं तथा च, स्त्रीपञ्चकजीवनाधारितं ‘पुरन्ध्रीपञ्चकमि’ति नाटकपञ्चकमपि विरचितवती। सा हि नारीस्वातन्त्र्यतावादिनी चासीत्। तथाहि नारीणां जीवनस्य दुःखदैन्यादिकञ्च रोचिष्णुतयालिखितं तया।

१.१२. **मिथिलेशकुमारीमिश्रा**– संस्कृतसाहित्यस्य कवयित्री 'जिगीषे'ति उपन्यासं रचितवती। तस्याः जन्मादितृत्तविषये मयो किमपि तथ्यं नोपलब्धम्।

१.१३. **क्षमारावो**– विंशशताब्द्या विशिष्टेषु कविवरेषु गद्यकृत्सु च पण्डिता क्षमारावो अन्यतमा। सा १८९० ईशवीयाब्दे शङ्करपाण्डुरङ्गपण्डितस्य कन्यारूपेण जन्मालभत। शैशवे तस्याः पिता मृताभवदिति कृत्वा क्षमा महता कष्टेन दुःखेन च जीवनं यापितवती। बोम्वाइनगर्यां सा विद्यामर्जितवती। सा बहूनि मौलिककाव्यानि लिखितवती। तानि यथा– मीरालहरी, सत्याग्रहगीता, उत्तरसत्याग्रहगीता, उत्तरजयसत्याग्रहगीता, कथापञ्चकम्, शङ्करजीवनाख्यानम्, विचित्रपरिषद्यात्रा, ज्ञानेश्वरचरितम्, तुकारामचरितम्, नामदेवचरितञ्चेति। पराधीनतायाः ग्लान्या दुःखेन च यदा भारतीयानां मनःसु आन्दोलनस्य प्रवाह उत्थितस्तदा क्षमाया हृद्यपि स्वाधीनताप्राप्त्यये वैप्लविकी प्रचेष्टाजायत। स्वाधीनतान्दोलनेन प्रभावभाविता सती सा महात्मगान्धिनः जीवनादर्शौ केन्द्रीकृत्य सत्याग्रहगीता, उत्तरसत्याग्रहगीता, उत्तरजयसत्याग्रहगीता चेति महाकाव्यत्रयं लिखितवती। मीरालहरीति खण्डकाव्ये तथा च कतिपयासु कथासु गद्यपद्यादिमुखेन तस्याः विरलभावाः समभिद्योतिताः। ग्रामज्योतिरिति कथाकाव्यमिति तया रचितम्। १९५४ तमे वर्षे जी. सी. चटर्जी एण्ड कम्पनीतः प्रचरद्रूपतां गतमिदं काव्यम्। तया विरचितग्रन्थेषु कथामुक्तावलीति प्रसिद्धो ग्रन्थः। तत्रात्युत्कृष्टं साहित्यं गद्यं सम्प्रयुक्तम्। १९५४ तमे वर्षे सा कवयित्री अमृतालोकं गता।

१.१४. **रयम्मा**– अपरैका कवयित्री १८७७ ईशवीयाब्दे वङ्गालोरनगर्यां जन्म लब्धवती। सा च माद्रासप्रदेशस्थिते लेडि-उइंटन-महाविद्यालये संस्कृतपण्डितरूपेणाध्यापनाकार्यं कृतवती। तया ‘चन्द्रमौलिरि’ति सामाजिकोपन्यासः लिखितः।

१.१५. **लक्ष्मीः**– केरलप्रदेशस्यान्यतमा कवयित्री। सा 'शान्तिगोपालकाव्यं' सर्गत्रितयात्मकं काव्यं रचितवती। कृष्णः सर्गान्मृतब्राह्मणपुत्रत्रयं समानीतवानिति विषयमाश्रित्य काव्यमिदं ग्रथितम्। अन्तिमे सर्गे यमकालङ्कारस्य पाण्डित्यपूर्णो व्यवहारो दृश्यते।

१.१६. **लीलारावो**– सुप्रसिद्धकवयित्र्याः क्षमायास्तनूजा वर्तते। लीला संस्कृतकाव्यप्रणयनस्य प्रेरणा मातुः प्राप्तवती। तया जनन्याः कथात्मकरचनाः सम्यक् रूपकायिताः। तस्याः कृतयः १८५५ ईशवीयाब्दाद् १८६१ ईशवीयाब्दं यावद् मञ्जुषाख्यसंस्कृतपत्रिकायां प्रायशः प्रकाशिताः। तस्याः कृतिषु निम्नलिखिताः प्रसिद्धाः सन्ति–

| | | |
|---|---|---|
| १. गिरिजायाः प्रतिज्ञा | २. बालविधवा | ३. होलिकोत्सवः |
| ४. क्षणिकविभ्रमः | ५. गणेशचतुर्थी | ६. मिथ्याग्रहणम् |
| ७. कटुविपाकः | ८. कपोतालयः | ९. शंसिच्छत्रम् |
| १०. स्वर्णपुरीकृषीवलाः | ११. असूयिनी | १२. वीरभाः |
| १३. तुकारामचरितम् | १४. ज्ञानेश्वरचरितम् | १५. जयन्तु कुमाउनीयाश्चेति। |

लीलाया रूपकाणि साम्प्रतिकशैलीमनुवर्तन्ते। तेषु प्रायः समसामयिकसमस्यानामभिव्यक्तिः दृश्यते। तत्र नाट्यनिर्देश-रङ्गनिर्देशयोः प्राचुर्यं वर्तते। क्षमारावद्वारा लिखिताया आख्यायिकायाः सम्यक् रूपायणं प्रस्तुतं 'मायाजालं' नाम। कृतावस्यां संवादाधिक्यं वर्तते। किन्तु मञ्चे कार्यस्याभावोऽस्ति। अपि च, क्षमारावद्वारा विरचिता गिरिजायाः प्रतिज्ञेति नाम्नी आख्यायिका लीलया रूपकायिता। होलिकोत्सवो नामैकाङ्करूपकं दृश्यत्रितयात्मकम्। अत्र होलिकावसरे ग्राम्यश्रमिकपरिवाराणां स्थितेश्चित्रणं वर्तते

१.१७. **सुन्दरवल्ली**– दक्षिणभारतस्य प्रख्यातस्य नरसिंह-अय्यङ्गारपादस्य कन्या। सा ऊनविंशशताब्द्यां संस्कृतसाहित्यक्षेत्रे विशिष्टयोगदानं कृतवती। कस्तुरी-रङ्गाचार्यस्य सकाशात् सा शास्त्राण्यधीतवती। सर्गषट्कविशिष्टस्य 'रामायणचम्पूरि'ति काव्यस्य रचयित्री खलु सा।

१.१८. **वीणापाणि-पाटनी**– प्रख्याता कथाकारी प्रबन्धिका च। 'अपराजिता' नाम कथानां सङ्ग्रहं १९९४ ईशवीयाब्दे प्रकाशितवती। 'मधुराम्लममि'ति एकाङ्ककाव्यसंग्रहं सा विलिख्य १९८६ तमे वर्षे नागप्रकाशनालयतः प्रकाशितवती।

# २. वङ्गदेशीयाः संस्कृताः कवयित्र्यः

आधुनिकसंस्कृतसाहित्ये भारतवर्षस्य प्रदेशान्तराणामिव वङ्गीयकवयित्रीणाम् अवदानानि अनस्वीकरणीयानि। वङ्गेषु विंशशतकस्य याः खलु कवयित्र्यः सर्वाधिकतया प्रशंसापदवीं गतास्ताः खलु अर्चनापुरी-बेलादेवी-रमादेवी-जयश्रीनाग-गौरीधर्मपालाः विशिष्टाः। संस्कृतसाहित्ये तासां सारस्वतावदानानि सम्यक्तयालोच्यन्ते।

## २.१. अर्चनापुरी

वङ्गप्रदेशस्य अङ्गुलिमेयेषु प्रख्यातेषु कवयित्रीषु अन्यतमा ह्यर्चनापुरी। १९२८ तमे वर्षे जुलाइमासस्य त्रयोविंशतितमे दिवसे वङ्गदेशाधिकृतदिनाजपुरमण्डले सा जनिं लब्धवती। किन्तु वङ्गान्तर्गतवीरभूमजिल्लान्तःपातिनः शिउड़ीनामके स्थाने सा तस्याः बाल्यजीवनमतिवाहितवती। पञ्चदशतमे वर्षे सा सन्न्यासधर्मं संगृह्यापि संस्कृतसाहित्यविरचनकर्मणि आत्मानं नियोजितवती। अत्रेदमुल्लेखार्हं यत् सा कलिकातास्थितस्य सत्यानन्ददेवायतनस्य पवित्रमातासीत्। कारयितृप्रतिभावशादेव तया विरचितेषु साहित्यकर्मसु प्रायेण सर्वाणि एवाध्यात्मिकमूलकानि वर्तन्ते। तेष्वन्यतमानि नाटकानि यथा–

क) कपटसाधुः ख) पम्पासरोवरस्य वायसभेकौ
ग) कर्षकस्य इच्छाप्राबल्यम् घ) कौतुकप्रदा परीक्षा
ङ) उन्मादस्य चिन्ता।

**२.१.१. कपटसाधुः**– साधुवेशधारी कश्चन चौरः स्वात्मानं रक्षितुं ग्राम्यजनानां प्रहारात् पांशुपूर्णेन देहेन जुगुप्समानः साधुवद् आत्मानं प्रकाशयति। निरपराधाः सर्वे ग्रामवास्तव्यास्तं साधुरिति विचिन्त्य तेषां सविधे प्रार्थनां ज्ञापयन्ति। अपि च सर्वे तस्मै नैवेद्यं निवेदयन्ति। भविष्यति दृश्यते यत् स समाधिं लब्धवान्। एकस्य पापिनः चौरस्य कथङ्कारं प्रकृतसाधुत्वलाभः तथा तस्य च नैतिकम् आध्यात्मिकम् उत्तरणम् अत्र अर्चनापुरी रोचिष्णुतया परिवेशितवती। तथाहि साधोः स्वगतोक्तिः “एतस्य अर्थः विगतरात्रौ अहमासं मिथ्यासाधुः। अद्याहं तु प्रकृतसाधुः प्रकृतसाधुः प्रकृतसाधुः”[१] इति। १९९१ ईशवीयाब्दे सत्यानन्दमिति

[१]कपटसाधुः (सत्यानन्दम्) (पृ. ८)

पत्रिकायां नाटकमिदं प्रकाशपदवीं गतम्। उल्लेख्यं यन्नाटकमिदं कथारूपेण श्रीरामकृष्णपरमहंसदेवः प्राय एव वारं वारं तस्यानुरागिभ्यः वङ्गगिरा कथयामास। समालोचकयात्रऋताचतुर्धुरिण्योक्तं– "Thus the drama shows in simple sanskrit and lucid style, that how even the imitation of character of a saint may convert a sinner to a saint and may cause his upliftment."[२] इति।

**२.१.२. पम्पासरोवरस्य वायसभेकौ–** काव्यम् इदम् आध्यात्मिकभावोपेतम्। ईश्वरेच्छया जगद् इदं भवति चालितम्। अशुद्धचैतन्योपहित-शुद्धचैतन्यात्मकस्य शुद्धबुद्धमुक्तस्वभाव-स्वरूपात्मकस्येश्वरस्य सर्वव्यापित्वाद् अनन्तत्वात् च स सर्वस्मिन् क्षुद्रातिक्षुद्रवस्तुनि तिष्ठति। तथाह्यगादि कवयित्र्या चरित्रमुखेन– "आ ब्रह्मणः कीटपर्यन्तं सर्वमेव भगवतो हि लीलाप्रकाशस्य महत्क्षेत्रम्।" इति। १९९१ ईशवीयाब्दे नाटकमिदं प्रकाशितमभूत्। अत्र कवयित्र्या उपनिषद्भावनाभिव्यक्ता।

**२.१.३. कर्षकस्य इच्छाप्रावल्यम्–** आत्मोत्सर्गस्य शक्तिर्यदि कस्यचिद् मनसि जागरिता भवति तर्हि स चरमाध्यात्मिकशक्तेः प्रतीकरूपेण ईश्वरसायुज्यं लब्धुमर्हेत्। हाराधननामधेयः कश्चित्कृषकोऽत्र चरमाध्यात्मिकशक्तेः मूर्तविग्रहः। तस्मिन्कृषके वैराग्यभावो जागरितः। तथाहि कवयित्र्या कथितम्– "अयं कर्षकः तीव्रवैराग्यस्योपमानम्। "इति।

गुपिनामकः कश्चन पार्थिवस्वार्थं परित्यक्तुं नालम्। स हि मन्दवैराग्यस्य प्रतिनिधिः। विषयैषणायाः प्राबल्यं गुपौ वर्तते। आध्यात्मिकभावनया प्रभावितं न जातं तन्मनः। तथाह्युक्तम्, "तद्धि मन्दवैराग्यस्योपमानम्। " इति। नाटकमिदं सत्यानन्दपत्रिकायां प्रकाशितमभूत् १९९० खीष्टाब्दे मे-जुनमाससङ्ख्यायाम्।

**२.१.४. कौतुकप्रदपरीक्षा–** सत्यानन्दस्य जीवनम् अवलम्ब्य रचितमिदं नाटकम्। सत्यानन्द आसीद् आध्यात्मिकजगत एकः परमः पुरुषः। कथाच्छलेन भक्तानां कृते तस्य आत्मतत्त्वलिप्सायाः पन्थास्तेन निर्देशितः। तस्य साधारणं चित्ताकर्षकं जीवनमस्माकं हृत्सु स्थानं लभते। नाटकेऽस्मिन् कथङ्कारं साधारणचमत्कारपद्धत्यां स तस्य भक्तवृन्दानां मनःसु आध्यात्मिकताया

[२] *20th century sanskrit Literature* p. 275

वाणीं तनोतीति विषयीकरोति नाट्यकारः।

**२.१.५. उन्मादस्य चिन्ता**– ऐश्वरिकचिन्तया चिन्तितः सत्यानन्दः। तस्य ऐकान्तिकसाधनैवास्य नाटकस्य विषयः। तथाहि तस्य स्वगतोक्तिः संस्मरणीया– "जागतिकमाहार्यं न मम प्रकृतमाहार्यम्। भगवद्ध्यानं हि मम प्रकृतमाहार्यम्। भगवद्ध्यानं मम विश्रामः।" इति। १९९१ ईशवीयाब्दस्य मार्चमासि सत्यानन्दपत्रिकायां नाटकमिदं प्रचरद्रूपतां गतम्।

दृश्यते अर्वाचीनसंस्कृतसाहित्येतिहासे अर्चनापुरीनामिकायाः कवयित्र्याः नाटकेषु तत्कालिकसमाजस्यैशीभावना प्रतिपदमुट्टङ्किता। तस्याः काव्यादिविनिर्माणावसरे रामकृष्णभावान्दोलनस्य प्लावनेन जगदिदं प्लावितम्। स्वाभाविकतया तस्याः सर्वासु रचनासु रामकृष्णभावधारा प्रतिफलिता। ऋताचतुर्धुरिण्या लिखितम्, "Among them the first three are based on the popolar and interesting stories repeatedly and inspiringly narrated by *Śrī Śrī Rāmakṛṣṇa Paramahaṁsadeva* and bearing some deep plilosophical truths." इति। आध्यात्मिकविश्लेषणस्यान्तर्दृष्टिस्तलस्पर्शिता च तस्यां राजेते। सात्यन्तिकेन मानवजीवनदर्शनस्य मूलीभूतं तत्त्वं ज्ञातवती। रचनासु भाषा सरला सर्वजनग्रहणयोग्या च। तस्या इमा रचना एकविंशशतकस्य पुरुषकवीनपि प्रभावयन्ति स्म।

## २.२. बेलादेवी

ऊनविंशत्यधिकनवशतैकसहस्रतमे वर्षे (१९१९ ए.डि.) पश्चिमवङ्गान्तर्गतनदीयामण्डले बेलादेवी अजायत। तया वङ्गभाषायां संस्कृतभाषायाञ्च अनेकानि नाटकानि लिखितानि। तेषु नाटकेषु संस्कृतभाषायां विरचितं नाटकत्रयमस्मभ्यमुत्सर्गीकृतम्। अर्वाचीनकालस्य कवयित्रीषु ब्रह्मचारिणी बेलादेवी अन्यतमत्वं भजते इत्यत्र नास्ति संशयः। तया विरचितानां नाटकानां विषयवस्तूनि अधस्तात् पर्यालोच्यन्ते।

**२.२.१. नचिकेतश्चरितम्**– "नाटकं ख्यातवृत्तं स्यादि"तिविश्वनाथोक्तवचनम् उरसिकृत्य कठोपनिषदो विषयमाधारीकृत्य दृश्याष्टकविशिष्टं दर्शितमिदं नाटकम्। नचिकेतसः पिता आसीदुद्दालकः। स एकदा यज्ञाय जीर्णाः गाः प्रदत्तवान्।

एतत्संदृश्य नचिकेताः क्लिष्टो जातः। स पित्रे अवदत्, "अस्माकं गोशालायां सुस्था गावो वर्तन्ते। तत्कथमेतादृशान् गाः ददाति भवान्। " इति। अपि चैव तेनोक्तं कस्मै अहं प्रदास्ये। तदा पित्रा उक्तम्- "त्वामहं यमाय दास्यामि। " इति। इत्थं दृश्यते पितुर्गिर्वाणवाण्याः पालनाय सयमाय अगच्छत्। तत्र च यमाद् आत्मविद्यां लभते सः। इदम् एव ब्रह्मतत्त्वम् उपस्थापितं तत्रभवत्या बेलादेव्या। कवयित्र्याः साधारणमनुजनुनां कृते आध्यात्मिकमार्गनिर्देशकरणं केवलम् उद्देश्यम्। अत्र च भाषायाः सारल्यं तथा रचनाशैल्या औज्ज्वल्यम् अस्माकं नयनपथे पान्थायते। यथा, "अतो मम अज्ञानपापमुक्त्यर्थं त्रीन्वरान्तुभ्यं दास्यामीति"। इति।

"अपूर्वमिदं नचिकेतः तव अपुर्वत्यागमहिम्ना पराभुतोऽहम्।"इति च।

अपिच, भारतीयोपनिषदां चिरन्तनी भावना सम्पुर्णतयात्र प्रतिफलिता। कवयित्र्या प्रत्येकरचनासु अङ्कशब्दं परिवर्त्य दृश्यशब्दः व्यवहृतः। १९७६ ईशवीयाब्दे नाटकमिदं प्रकाशितं जातम्।

**२.२.२. महीयसी गार्गी–** पञ्चदृश्येषु संबद्धमिदं नाटकम्। कवयित्र्या बृहदारण्यकोपनिषदो गृहीतम् अस्य विषयवस्तु। उपनिषत्सूक्तम् अत्र नान्दीश्लोकरूपेण परिगण्यते। सूत्रधारस्य वचनतो ज्ञायते यद् विश्वनारीवर्षस्य (World Women's Year) प्रसङ्गे एव अस्य नाटकस्याविर्भावः। गर्गकन्या गार्गी एवास्य नाटकस्य नायिका। सा नाटकेऽस्मिन् युक्त्या विजयते। सा एव ब्रह्मवादिनी। तथाहि भरतवाक्यम्– "यावत्कालं भारतवर्षं वर्तते तावत्कालं गार्गीमहिमा सर्वत्र कीर्तितः भविष्यति।" इति। अत्र सर्वाणि चरित्राणि उपनिषदो नीयन्ते। जगत्यस्मिन् चरमतत्त्वं किं नामेति विषयमवलम्ब्य गार्गीयाज्ञवल्क्ययोर्विवाद उल्लेखनीयः। अत्र नृपस्य जनकस्य चरित्रम् अपि स्थानं लभते। अपि च गर्गाश्रमस्य वर्णनम् अधिकतया चमत्कारित्वं जनयति। नाटकस्य मूलोद्देश्यविषये प्राध्यापिकाया ऋतादेव्या अभिमतमिदमत्रोल्लेखनीयम्- "The drama is characterized by simple intelligible but dignified sanskrit language and strictily lucid style…To remind the present generation of the past glory, the highest ideals of the ancient india and the tradition of the female celebrities seems to be the primary objective of the play write as revealed through her drama *Mahīyasī Gārgī*." इति।

**२.२.३. विराङ्गहम्–** षड्दृश्योपेतं नाटकमिदं महाभारतस्य विषयमाधारीकृत्य

लिखितम्। महाभारतस्य विराट्पर्व एवास्य विषयः। अत्र पाण्डवानामज्ञातवासः, कीचकवधः, सुदेष्णायाः सहचारिणीरूपेण द्रौपद्याः प्रकाशश्चेत्यादीनि वृत्तान्यत्रोपवर्णितानि। परिशेषे उत्तराभिमन्व्योः परिणयेन नाटकमिदं समाप्तिं गतम्। प्राचीनकवीनामिव भारतस्य घटनामबलम्ब्य रचितमिदं नाटकम्। प्राचीनरीत्यानुसारिणी बेलादेवी यथानियमं नाटकानि विरचयामास। किन्तु भाषाया नैपुण्येन सारल्येन च नाटकमिदं विंशशताब्द्या आङ्केन सहयुक्तम्। पाठकानां सविधे प्राचीनवृत्तानां पुनः नाट्यायितकरणं हि कवयित्र्याः मुलमुद्देश्यमित्यत्र नास्ति संशयलवः। १९७६ ईशवीयाब्दे नाटकमिदं प्रकाशपदवीं गतम्।

## २.३. गौरीधर्मपालः

विंशशतकस्य प्रशंसनीया एका कवयित्री गोरीधर्मपालः। कलिकातायां सप्तत्रिंशद्धिकनवदशशततमे वर्षे साजायत। आसीत्साध्यापिका लेडिब्रेवर्नमहाविद्यालयस्य।

संस्कृतभाषायां पञ्चविंशतिसंख्यकानि पुस्तकानि लिखितानि। आधुनिकविषयम् आधारीकृत्य तया तडिद्विरतिः (load shedding) इति लघुकथापि लिखिता। आधुनिकं विषयम् आधारीकृत्य तया १९८४ खीष्टाब्दे जननीनाटकमपि लिखितम्। 'जननी'नामकं रूपकं त्वैकाङ्करूपकम्। रूपकम् इदम् अप्रकाशितम्। रुपकस्य आरम्भो भवति एकेन वङ्गीयसंलापेन– "गृहिणी ना जननी कि येन एकटा नाम। राजा राजड़ाओ नेइ आर्यपुत्रओ नेइ।" इति। अत्र सूत्रधारस्य अभावो दृश्यते। मध्यवित्तपरिवारस्य वृत्तमेकं कविना निरूपितम्। वास्तवजीवनस्य वास्तवप्रतिच्छविः तत्रभवता कविनोपस्थापितः। सर्वधर्मश्रेणिन उद्दिश्य कवेरैकामृतावाणी ध्वनिता– "मानुषमाता भूमिकन्याः वयं पृथिव्याः" इति।

वस्तुतस्तस्याः "शृण्वन्तु विश्वे अमृतस्य पुत्राः" इति औपनिषदिकभावनायां विश्वमैत्रीभावनानुरणितात्र। वस्तुतो 'जननी'ति शब्देन भारतमाता सांस्कृतभाषा पृथिवीवा बोध्यव्या। माता खलु सर्वेषाम् उत्सस्वरूपा। अतस्तस्याः परित्यागो न कर्तव्य इत्येवं तस्या आशयः। यदा सर्वे मातरं परित्यजन्तः स्म तदा मातावदत्– "किं ब्रवीषि? नास्ति मया प्रयोजनम्?...सर्वेषां दूषणं सहमाना क्षममाण, सर्वान् अहं धारयामि पोषयामि शिक्षयामि भाषयामि जीवयामि शयाने स्वप्ने जागरणे नृत्ये गीते शिल्पे वसने तत्समुद्भवे मनने ध्याने ज्ञाने विज्ञाने पुरातने नूतने शोके दुःखे रोगे आरोग्ये उत्सवे व्यसने सर्वदा युष्माकं पार्श्ववर्तिनी अहम्, मामेव बहिष्करोषि?

भवतु गच्छामि। मया विना सुखं जीवतं सर्वे" इति।

यदा माता जिगमिषति, तदा सर्वे कथयन्ति अलं गत्वा। अस्मिन्नाटके कवयित्र्याः प्रातिभविश्लेषणं सततं लक्षणीयम्। नैकानां वैदेशिकशब्दानां प्रयोगो दरीदृश्यते नाटकेऽस्मिन्–

"मासं यावद् ग्यासो (Gas) नास्ति केरोसिनमपि (Kerosene) दुर्लभम्" इति।

"अद्य खलु इडेने गवसकारस्य ब्याटिङ्। "इति।

"शय्यागतः कों कों इति कम्पते।" इति।

अपि च, भाषाविज्ञाने तस्याः ध्रुवमेव पारदर्शिता सर्वजनविदिता। ग्रन्थेऽस्मिन् अनेकदेशीयभाषाणां प्रयोगो दृश्यते। यथा–

"मातः मा परित्यज अस्मान्"इत्यस्मिन् अर्थे प्रयोगः–

हिन्द्यां– मत् याना माइजि।

माराठ्याम्– आइ गो, तु जाउ नो तु को।

काश्मिर्यां– मोजी, सि माइ गच्छ।

राजस्थान्यां– मा, म कोनी जाउ।

मलयाले– आम्मा, निपोगल्ले।

पञ्जाब्यां– भिजि तु सि न यओ मेन्यु नइ चइदा।

तामिले– पोगादे आम्मा पोगादे।

अत्र वङ्गप्रवादानां प्रयोगोऽपि सन्दृश्यते। यथा– "कारओ पौषमास कारओ सर्वनाश" इत्यस्य "छात्रीणां पौषमासः मम तु सर्वनाशः"इति। नाटकस्यास्य समाप्तिः भवति रवीन्द्रनाथस्य 'भारततीर्थ'इति कवितया। अत्रापि कवयित्र्याः विशिष्टत्वं नयनयोरापतति। तथाहि ऋतादेव्या उक्तिरत्र संस्मरणीया– "*Jananī*, with its lucid style, simple but dignified language, with occasional use of Bengali language, with its novel theme revealing the identity of 'Mother'– the 'House Mother', or 'Sanskrit', of 'India' and of 'Mother Soil' or 'Earth', bringing out the multi-lingual and the integrated aspect of India, depicting integration in its different aspects e.g., family integration, linguistic integration, national and East-West integration and with an ultimate objective of ushering into the traditional realm of peace, harmony, tolerance and integration will ever be enshrined

in the hearts of the connoisseurs.” इति।

## २.४. जयश्रीनागः

पश्चिमवङ्गस्य वर्धमाननामके स्थाने साम्प्रतं स्थिता वर्तते। सा अर्वाचीनकवयित्रीषु एकतमा वर्तते। आदिकवेरुद्भावनमित्येकमित्येकं नाटकं लिखितं प्राचीनवृत्तमवलम्ब्यकवयित्र्या। आदिकवेर्नाम अत्र वाल्मीकिः। व्याधस्य क्रौञ्चवधं दृष्ट्वा वाल्मीकेर्मनसि शोकात् स्वत उत्सारितभावा वेगस्य प्रकाशो घटते रामायणे। सहसा तन्मुखाद्विनिर्गतः श्लोकोऽयम्– मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः इति। कथङ्कारं श्लोकोऽयं तत्रभवत आदिकवेर्मुखाद् विनिर्गत इत्येवं विषयम् आश्रित्य तया लिखितम् इदं नाटकम्।

## २.५. रमाचौधुरी

सुधांशुमोहनवसुमहोदयस्य कन्यारूपेण १९११ ईशवीयाब्दे रमाचौधुरी जनिं लब्धवती। अभिजातवंशे समुत्पन्नाया रमायाः छात्रजीवनं प्रतिभापूर्णाभिरुपलब्धिभिर्मण्डितं विद्यते। चौधुरीत्युपाह्वयस्य डा. यतीन्द्रविमलस्य पत्नी रमाचौधुरीवर्या। रमा यतीन्द्रेण सार्धमेवाधीत्य Oxford विश्वविद्यालयस्य डी.फिल् इत्युपाधिमुपलेभे। सा त्रिंशद्वर्षाणि यावद् ब्रावोर्नमहाविद्यालये प्राचार्यपदम् अलङ्कृतवती। ततः सप्त वर्षाणि यावद् रवीन्द्रभारतीविश्वविद्यालये प्रथममहिलोपाचार्यत्वेन प्रशासनकार्यं कृतवती। अर्वाचीन-संस्कृतसाहित्ये उल्लेखयोग्या लेखिका। अनेकेषां मते कवयित्रीषु अर्वाचीनसंस्कृतनाट्यसाहित्येतिहासे सैव नाट्यकाररूपेण प्रथमा। तथाहि ऋताचट्टोपाध्याययोक्तम्– “First lady Sanskrit dramatist to be honoured as the pioneer of modern Sanskrit drama movement in India and outside.” तया प्रबन्धविषयकानाट्यग्रन्थविषयका अनेके ग्रन्था विरचिताः। सा खलु विंशत्यधिकसंस्कृतनाट्यानां रचयित्री। तानि यथा–

| | | |
|---|---|---|
| १) कविकुलकोकिलम् | २) कविकुलकमलम् | ३) मेघमेदूरमेदिन्यम् |
| ४) यतीन्द्रयतीन्द्रम् | ५) शङ्करशंकरम् | ६) देहदीपम् |
| ७) पल्लीकमलम् | ८) मेघमेदुमेदनीयम् | ९) युगजीवनम् |
| १०) निवेदिता-निवेदितम् | ११) अभेदानन्दम् | १२) रामचरितमानसम् |

१३) रसमयरासमणिः १४) चैतन्यचैतन्यम् १५) संसारामृतम्
१६) नगरनूपुरम् १७) भारतपथिकम् १८) भारताचार्यः
१९) अग्निवीणानाटकम् २०) गणदेवतानाटकम् २१) भारत-तातम्
२२) प्रसन्न-प्रसादश्चेति।

तस्याः प्रायः सर्वाणि नाटकानि व्यक्तिजीवनमूलकानि। महापुरुषाणां सम्मानार्थं तयैतानि नाटकानि लिखितानि। तस्याः नाटकस्य भाषा वङ्गभाषावत् सरला सुबोध्या च। यथा वङ्गभाषायां “टाका माटि माटि टाका” इत्यस्य संस्कृतभाषायाम्– “मुद्रा मृत्तिका मृत्तिका मुद्रा” इति।

वङ्गभाषायाः प्रयोगोऽपि दृश्यते–

“दुत्तोरि उन्मत्तजनो न प्रशमनीयः...”इति।

अपि च, नाटकेषु सङ्गीतानामपि प्रयोगो दृश्यते–

इच्छाजातं तव सर्वं
इच्छामयी तारासि त्वम्।
तव कर्म करोषि त्वमस्य
लोको वदति करोम्यहम्॥ इति।

अधुना प्रत्येकं नाटकानां सारः प्रस्तूयते।

**२.५.१.शङ्करशङ्करम्–** अद्वैतवादिनः शङ्कराचार्यस्य जीवनं दर्शनं च आधारीकृत्य लिखितम् इदं चतुर्दशदृश्योपेतं नाटकम्। इह नाटके कवयित्र्या वर्णितं यत् कथं गुप्तोत्तरयुगे शङ्कराचार्य आसमुद्रहिमाचलं परिभ्रमणं कृत्वा भारतवासिनां हृत्स्पन्दनमनुभूतवान् स्वशास्त्रविज्ञानेन तथा च तदानीन्तनकालस्य विख्यातं पण्डितं मण्डनमिश्रं तर्कयुद्धेन पराजितवान् विज्ञामुभयभारतीं मण्डनस्त्रियमपि च। चतुर्दशदृश्ये दृश्यते यत् शङ्करः केदारं जगाम। तत्र द्वात्रिंशद्वर्षाणां वयसि सम्पूर्णे स्वस्य परमात्मसायुज्यदिवसे प्रकृतजीवनस्योपलब्धीः प्रकटितवान्। भारतस्य चतसृषु दिक्षु चत्वारो मठाः संस्थापिताः। तत्र मठेषु ऋग्यजुःसामाथर्वणामध्ययनस्य विशिष्टा व्यवस्था विहिता।

सा पाश्चात्त्यशैल्या समं भारतीयशैल्या नान्दीं, प्रस्तावनां, भरतवाक्यञ्च योजयति। तस्या नाटकानां विभाजनं दृश्येषु विलसति। पटपरिवर्तनमपि तत्र विद्यते। सातकडिमुखार्जिना लिखितम्- “What has surprised me most is the wonderful ease and flow with which the present work

represents to us the most abstruse philosophy of the great Advaitin Shankara. Who could have ever thought that any one would be able to serve the same under the guise of a drama? But the supremely efficient and infinitely courageous Dr. Rama has been able to perform. Who could have thought her capable of producing such a superb dramatic work on Shankara's holy life and teachings, in such a beautiful, poetic, enchanting easily intelligible language? Further, the numerous verses in different metres as well as the songs add much to the great glory of this exhilarating work of great literary and other kinds of merits."

**२.५.२.देशदीपम्–** नाटके राष्ट्ररक्षायां दिवं गतानां वीराणां संस्मरणं कृतं कवयित्र्या। एकस्य महतो नायकस्य जीवनम् आधारीकृत्य लिखितम् इदं दृश्यनवकविशिष्टं नाटकम्। स खलु नायको देशाय प्राणान् तत्याज। अत्र रमया ग्राम्यपरिसरः कार्यस्थली निर्वाचित इत्यस्य प्रमुखं वैशिष्ट्यम्। गीतराशेर्माञ्जुलता कृत्स्ने नाटके विलसति। देशभक्तिसौष्ठवञ्चास्य प्रेरणास्पदम्। वृक-कुक्कुट-पेचकादिपक्षिणां कथा अस्मिन् नाटके स्थानं लभमानं लसति। १९७० तमे खीष्टाब्दे नाटकमिदं सहृदयानां पाठकानां कृते प्रकाशितम्। अस्याभिनयः यतीन्द्रविमलचौधुरीजन्मोत्सवे सम्पन्नः।

**२.५.३.नगरनूपुरम्–** मेखलाभिधानाया अपूर्वसुन्दर्या गणिकायाः कथाम् आश्रित्य दशदृश्यमयं लिखितम् इदं नाटकम्।

**२.५.४.पल्लीकमलम्–** लोकप्रसिद्धां कथाम् अवलम्ब्य रचितम् इदं नवदृश्यात्मकं नाटकम्। कमलकलिकारूपकुमारयोः प्रेमकथां केन्द्रीकृत्य ग्राम्यसंस्कृतिं च संलक्ष्य कवयित्री नाटकं लिखितवती। नायकस्य रूपकुमारस्य नायिकायाः कमलकलिकायाश्च प्रेम्नः परिणतिः परिणये भवति। इह नाटके कतिपयवङ्गलोकोक्तीनां संस्कृतानुवादः समुपलभ्यते। दिङ्मात्रमुदाहरणं यथा–

आकाशचन्द्रः पतितः करे मे।
कुक्षौ क्षुधा मुखे लज्जा।
पथि ठक्कुर आद्रियमाणो मस्तकमारोहति।

यदि रूपकस्यास्य सर्वाणि दृश्यानि एकोक्तिमण्डितानि सन्ति, तथापि पञ्चमाङ्कस्य कनककलिकाया एकोक्तौ महती प्रभविष्णुता जागर्ति। लेखिकाया नये

प्रहसनमपि नाटके तथावश्यकं यथा सङ्गीतनिबन्धनम्। पूर्वकथा (Flash Back) चलचित्रानुवर्तनपूर्वकं पटपरिवर्तनेन पूर्वदृश्ये प्रदर्शिता। नाटकस्य भाषा सरला सुमधुरा च।

**२.५.५.संसारामृतम्–** केलिनाम्न्याः दरिद्रपरिवारस्य कन्यायाः दुःखमयं जीवनमवलम्ब्य सप्तदृश्यात्मकमिदं नाटकम्। मयूखनामको कश्चन तस्या बालिकायाः प्रतारणामकरोत्। अनन्तरं प्रतारिता सा बाला तं मयूरनामकमेकं धनिनमुद्वहति। किन्तु स मयूर आसीत् चरित्रहीनः। किन्तु तस्या बलिकायाः संस्पर्शेण स शनैः शनैः परित्यज्य कुस्वभावं शुद्धजीवनं यापितवान्। समाजस्य वास्तवजीवनमत्राश्रितं कवयित्र्या।

**२.५.६.अभेदानन्दम्–** रामकृष्णस्य मुख्यस्य शिष्यस्य अभेदानन्दस्य पवित्रं जीवनं शिरसिकृत्य कविना द्वादशदृश्यात्मकमिदं नाटकं लिखितम्।

**२.५.७.निवेदितानिवेदितम्–** द्वादशदृश्यात्मके नाटकेऽस्मिन् निवेदिताया जीवनं विन्यस्तम्। रमारञ्जनमुखार्जिना अस्य समालोचनायामुक्तम्– "Dr. Rama Chowdhuri selects the theme of her drama '*Niveditāniveditam*' from *Rāmakṛṣṇa Vivekānanda* movement & describes the life and activities of *Sister Niveditā*, the ardent devotee and disciple of *Svāmī Vivekānanda*."[३] इति।

**२.५.८.युगजीवनम्–** रामकृष्ण-सारदादेवी-विवेकानन्दानां दिव्यजीवनानि तेषां भावादर्शान् च समाश्रित्य नाटकमिदं ग्रथितं कवयित्र्या। नाटके दश दृश्यानि वर्तन्ते। जीवसेवा शिवसेवा इति तत्त्वं लेखिका प्रकाशयिष्यते। तथाहि नटी रामकृष्णस्य मञ्जुलवाणीं नाटकस्य प्रारम्भे एवाकथयत्– "जीवः शिवः शिवो जीवो जीवः शिवः केवलम्" इति। अपि च, नाटकस्य षष्ठदृश्ये रामकृष्णस्य वैदान्तिकवाणी कथ्यते– "ब्रह्म एकमेवाद्वितीयम्। तादृशस्य ब्रह्मणः साक्षादुपलब्धिः हि सकलदर्शनस्य परमा कथा" इति। अत्र शब्दव्यवहारस्य स्वाधीनता, गीतस्य प्रयोगः, वङ्गीयशब्दानुगमनञ्च संलक्षणीयानि। यथा– "नहि देवपूजा यथेच्छखेला" इति। अत्र क्रीडाशब्दं परित्यज्य खेलाशब्दस्य व्यवहारो दर्शनीयः। पुनश्च–

सुरापान करिना आमि,

---

[३] Sanskrit drama in last five decades: The Bengal scenario

सुधाखाइ 'जय काली' वले।
आमाय मन माताले माताल करे,
सव मद् माताले माताल वले॥ इति।

वङ्गीयगीतस्य संस्कृतानुवादस्तावत् कविना कृतम् इत्थम्–

नाहं सुरापानासक्तः
'जय काली'-ध्वनि-विधानपरः
केवलं सुधापानारक्तः
केवलं जननीचरणधरः॥ इति। १९७७ ईशवीयाब्दे नाटकमिदं प्रकाशितम्। भारते शतशः नाटकमिदमभिनीतम्।

**२.५.९.भारताचार्यम्–** भारतस्य द्वितीयराष्ट्रपतेः सर्वपल्लीराधाकृष्णन्-महोदयस्य जीवनमस्य नाटकस्य मूलं विषयवस्तु। अपि च, तस्य दार्शनिकी भावनापि अत्र प्रकटिता। द्वादशदृश्यात्मकमिदं नाटकम्।

**२.५.१०.रामचरितमानसम्–** तुलसीदासस्तावद् रामचरितमानसस्य रचयिता। स तस्य पत्न्या अनुप्राणितः सन् रामचरितमानसं लिखितवान्। अत्र तस्यैव कथा लिपिबद्धा।

**२.५.११.भारततातम्–** षड्दृश्यात्मकमिदं नाटकम्। महात्मागान्धी एव नाटकस्य प्रधानो नायकः।

**२.५.१२.चैतन्यचैतन्यम्–**पञ्चदृश्यसमन्वितमिदं नाटकम्। चैतन्यस्य चारु-चरितावली चित्रिता। तस्याविर्भावः, बाललीला, दिग्विजयः, कृष्णप्रेम, ईश्वर-भक्तिः महासमाधिश्चात्रनाट्यायिता वर्तन्ते।

**२.५.१३.रसमयरासमणिः–** रासमणिदेव्या आदर्शजीवनमत्र अष्टदृश्येषु विभज्य लेखिकया समुपवर्णितम्।

**२.५.१४.प्रसन्नप्रसादम्–** साधकरामप्रसादस्य जीवनम् आधारीकृत्य दश-दृश्योपेतं लिखितमिदं रूपकम्।

**२.५.१५.गणदेवतानाटकम्–** अस्मिन् नाटके वङ्गदेशस्य श्रेष्ठानाम् औपन्यासिकानां ताराशङ्करवन्द्योपाध्यायानां जीवनचरितम् उपजीव्यम् अस्ति।

**२.५.१६.अग्निवीणानाटकम्–**नजरुलकवेः चरितगाथा अस्मिन् नाटके वर्णिता।

**२.५.१७.भारतपथिकम्–** ब्राह्मसमाजस्य प्रतिष्ठाता भारतपथिकः राममोहनः कथं भारतस्य उन्नतिसाधने प्रयत्नशीलोऽभूदिति विषयमाश्रित्य चरितगाथामूलकं पञ्चदृश्यसमन्वितं नाटकमिदम्। एतेषुनाटकेषु कुत्रचित्संवेदनता, आवेगपरायणता, कुत्रचिद्वा दुःखानुभूतिः, सहानुभूतिः, रसानुभूतिश्च लेखिकया विविधचरितमुखेभ्यः व्यक्तीकृता वर्तन्ते। भाषायाः सारल्यम्, वर्णनाया नैपुण्यम्, सामञ्जस्यञ्चात्र नाटकानां प्रतिच्छत्रं लसन्ति।

**२.५.१८.कविकुलकोकिलम्–** नाटकेऽस्मिन् दश दृश्यानि विलसन्ति। कालिदासस्य व्यक्तिजीवनमुपाश्रित्य ग्रथितमिदं नाटकम्। अत्र भावुकतापूर्णानामेकोक्तीनामाधिक्यं राजते। तृतीयदृश्यस्य कालिदासस्यैकोक्तौ प्रकृत्या सह भव्यं सामञ्जस्यं विलसति। गालिदानस्याधुनिकी रीतिरप्यस्मिन् वर्तते। कालिदासस्याध्यापकः कृमि-कीट-कृकलास-शठश्रृगाल-बर्वर-मर्कट-गर्दभाद्यपशब्दान् प्रयुंक्ते।

**२.५.१९.मेघमेदुरमेदनीयम्–** प्रस्तुते नाटके मेघदूतस्य पूर्वोत्तरघटनानां संघटनं विद्यते। दृश्यषड्कयुतं नाटकमिदम्।

**२.५.२०.कविकुलकमलम्–** कविकुलकमले महाकवि-कालिदासस्य उत्तरकालिकी चरितगाथा वर्ण्यते। अस्मिन्नष्टौ दृश्यानि लसन्ति। भारतवर्षीयानां कवयित्रीणां रचनासु कुत्रचित्विषयस्य नूतनत्त्वं कुत्रचिद्वाभाषायाः सारल्यञ्च संलक्ष्येते। तासां नाटकेषु अङ्कशब्दव्यवहाराभावाद्दृश्यशब्दस्य प्रयोगोऽर्वाचीनत्त्वं तासां द्रढयति। परिशेषे वक्तुं पार्यते- वङ्गभूमेः कवयित्रीणां संस्कृतमौलिकसाहित्यसृष्टिपरम्परा सर्वभारतीयपरिसरे स्वीकृतिं लभमाना विलसति। विंशतिवर्षाणि यावद् रमा चौधुरी भारतस्य विविधस्थानेषु विदेशेषु च स्वस्याः स्वपत्युश्च नाटकानाम् अभिनयम् उच्चस्तरीयं प्रयोजयते। नाटकानाम् अभिनयद्वारा भारतीयसांस्कृतिकप्रवृत्तिः कल्याणोन्मुखी इति कृत्वा सा जीवनस्य सार्थकतां मनुते। वङ्गप्रदेशस्य कवयित्रीषु रमा-चौधुरी स्थायिपदमलङ्कृतवती इत्यत्र नास्ति द्वन्द्वः। यद्वा भवतु नाम। भारतवर्षस्य सर्वत्रैवाधुनातने काले स्त्रियः काव्य-नाटकादीनि विलिख्य आधुनिकसंस्कृतसाहित्यप्रपञ्चं विभूषयन्ति। भविष्यति काले कवयित्रीणां कारयितृप्रतिभया पुरुषाणां समकालम् एव अर्वाचीनसंस्कृतसाहित्यं परमामुच्चतां प्राप्स्यतीति मामकी मतिः।

☆ ☆ ☆

# परिशीलितग्रन्थसूची

1. Chattopadhyaya, Rita. (1992) *Modern Sanskrit Dramas of Bengal (20th Century AD)*. Calcutta.
2. Chattopadhyaya, Rita. (2004) *Modern Sanskrit Literature : Some Observations.* DSA, Department of Sanskrit, Jadavpur University, Kolkata- 700032.
3. Chattopadhyaya, Rita. (2009) *20th Century Sanskrit Literature (A Glimpse into Tradition and Innovation)*. Calcutta : Sanskrit Pustak Bhandar.
४. मुखोपाध्यायः, गोपेन्दुः। संस्कृतसाहित्येर इतिहास। कोलकाता : इउनाइटेड बुक एजेन्सि।

# मेघदूते दाम्पत्यजीवनवैचित्र्यम्

भारतीप्रसादः*

महाकविकालिदासः संस्कृतवाङ्मये सर्वाधिकं भासुरं रत्नम्। संस्कृतसाहित्ये कालिदासीयग्रन्थेषु मेघदूतम् इति विप्रलम्भश्रृङ्गारप्रधानं गीतिकाव्यम् अस्ति। संस्कृतभाषोपनिबद्धेषु ईदृशस्य काव्यस्य खण्डकाव्यम् इति प्रसिद्धिः। आधुनिकदृष्ट्या तु गीतिकाव्यम् इदम् उच्यते यतोऽस्मिन् काव्ये व्यक्तिमनसः मनोगतानाम् भावानाम् एव भूयस्त्वम् अनुभूयते। अत्र कुवेरशापेन अस्तङ्गमितमहिम्नः कस्यचित् कर्तव्यविमुखस्य यक्षस्य विरहव्यथावर्णनं कविना कृतम्। वैदर्भी रीतिः अर्थान्तरन्यासचमत्कारः, मन्दाक्रान्ताछन्दः, प्रकृतेः मानवीकरणम्, उपमाया आस्वादनम्, अलकाया लोकत्तरवर्णनं, विरहिण्या यक्षिण्या वर्णनं, यक्षस्य सन्देश इत्यादीनि वर्तन्ते ग्रन्थस्यास्य वैशिष्ट्यानि। अस्य खण्डकाव्यस्य भाषा अतीव प्राञ्जला, सुमधुरा, प्रसादगुणसमन्विता च। कल्पना च रमणीया, अद्वितीया, अभिनवा, कोमला, वर्ण्यविषयानुकूला च। प्रबन्धेऽस्मिन् एकनारीव्रतस्य यक्षस्य पतिव्रताया यक्षवध्वा विस्तरेण वर्णनं कुर्वता कालिदासेन दम्पत्योः प्रेम प्रति महती निष्ठा यथा प्रकटीकृता तथा उपस्थापयितुम् इष्यते। यक्षयक्षवध्वोः दाम्पत्यप्रेम्णो वर्णनमस्मिन् गीतिकाव्ये कविना निपुणतया कृतम्। रामगिर्याश्रमे स्थितो यक्षः स्वकीयां भार्यां प्रति मेघमाध्यमेन सन्देशं प्रेषयति। अत्र ध्यातव्यमस्ति यद् यक्षस्य प्रणयसन्देशो न कस्या अपि परकीयायाः प्रेयस्याः कृते, अपि तु पतिव्रताया धर्मपत्न्याः कृते एव प्रेषितोऽस्ति। भार्याविरहे यक्षो दौर्बल्येन 'कनकवलयभ्रंशरिक्तप्रकोष्ठः'(पू.मे.२) अभवत्। स कामी तु आस्ति, किन्तु तस्य कामोऽपि नापरां कामपि सुन्दरीम् अपि तु स्वकीयभार्यामेव विषयीकरोति। दाम्पत्यप्रेम्ण एकाग्रत्वम् एकनिष्ठत्वं चेत्थम् अत्र प्रतिपाद्यते। स आषाढमासे मेघं दृष्ट्वा भार्यायाः कृते व्यग्रो भवति। तस्य विरहावस्थां वर्णयन् कविः कथयति–

> मेघालोके भवति सुखिनोऽप्यन्यथावृत्तिचेतः,
> कण्ठाश्लेषप्रणयिनि जने किं पुनर्दूरसंस्थे॥ (पू.मे.)

यक्षयक्षवध्वोः दाम्पत्यप्रेम्णि उत्कण्ठायाः, त्यागस्य तथा च एकात्मभावस्य एव प्राधान्यं विद्यते। यद्यपि यक्षवधूः विरहेण कृशतरा सञ्जाता, तथापि सा स्वप्रियतमस्य मङ्गलार्थं देवान् पूजयति–

> आलोके ते निपतति पुरा सा बलिव्याकुला वा। (उ.मे.२२)।

सा विरहिणी प्रियतमस्य प्रत्यागमनमपेक्षमाणा आशाबन्धमवलम्ब्य कथञ्चिद् दिवसान्

---

*सहायकाचार्या, संस्कृतविभागे, हावडास्थिते विजयकृष्णमहिलामहाविद्यालये।

यापयेद् इत्यतोऽयं विरही यक्षो मेघं कथयति–

तां चावश्यं दिवसगणनातत्परामेकपत्नी-
मव्यापन्नामविहतगतिर्द्रक्ष्यसि भ्रातृजायाम्।
आशाबन्धः कुसुमसदृशं प्रायशो ह्यङ्गनानाम्
सद्यः पाति प्रणयिहृदयं विप्रयोगे रुणद्धि॥ (पू.मे.)

पतिविरहे सा केन प्रकारेण रजनीं यापयति इति यक्षमुखात् ज्ञायते–

नीता रात्रिः क्षण इव मया सार्धमिच्छारतैर्या
तामेवोष्णैर्विरहमहतीमश्रुभिर्यापयन्तीम्॥ (उ.मे. २६)

तस्या दुःखं दृष्ट्वा निर्जीवः मेघः अपि रोदनं करिष्यति–

त्वामप्यस्रं नवजलमयं मोचयिष्यत्यवश्यम्॥ (उ.मे.३०)।

विरही यक्षः तुषाराद्रिवातान् आलिङ्गति यतो हि प्रियतमां संस्पृश्य ते आगता इति विचिन्त्य–

आलिङ्ग्यन्ते गुणवति मया ते तुषाराद्रिवाताः
पूर्वं स्पृष्टं यदि किल भवेदङ्गमेभिस्तवेति॥ (उ.मे.४४)

वस्तुतः स्त्रीपुरुषयोः परस्परमनुरागातिशय एव कारणं येन तयोः वस्त्रभूषणादीनि प्रियजनस्मृतिवाहीनि अतिप्रियाणि प्रतीयन्ते। कृष्णमुरली, शिखिबर्हाणि, पीताम्बरम् इति सर्वाण्येव गोपीनां कृते प्रियतमानि आसन्। अत एव अलकातः आगतस्य प्रियस्पर्शनिर्भरस्य वायोः आलिङ्गनं पत्युर्यक्षस्य कृते स्वाभाविकमेव भाति। ऐश्वर्यपरिपूर्णायामलकायां स्थिताया अपि प्रोषितभर्तृकाया यक्षवध्वा हृदयं विरहवेदनया जर्जरितम्। अलका नित्यसुखस्य प्रतिमूर्त्तिरिव राजते। तत्र सर्वेषां कामानां परिपूर्णता मूर्त्तिमाश्रितेव आभाति। सेयं पूर्णता आदर्शस्वरूपा, यत्र गन्तुं जीवानामसम्पूर्णहृदयमुन्मुखीभवति। परन्तु तत्प्राप्तिः असम्भविनी इव आस्ते। परन्तु आदर्शोऽपि स्वस्य मूर्तरूपधारणाय माध्यमं कमपि अपेक्षते। अत एव यथा मर्त्यलोकसञ्चारी यक्षः स्वर्गीयसुखस्वरूपायाः प्रियायाः कृते उत्कण्ठते, तथा नित्यसुखे वसन्त्यपि यक्षवधूः विरहपीडिता एव वर्तते। आदर्शस्य तत्पूर्तेश्च व्यवधानमिदं यक्षं यक्षवधूञ्च आधारीकृत्य प्रतीकीकृत्य च सहृदयसमक्षं कविना उपन्यस्तम्। महदिदमानन्दस्थानं यद् मेघदूतकाव्यस्य सुगम्भीरोऽयमाशयः विश्वकविना रवीन्द्रनाथेन मानसीति काव्यग्रन्थस्य मेघदूताख्यायां रचनायां सम्यग् उपलब्धः।

सशरीरे कोन नर गेछे सेइ खाने,
मानससरसीतीरे विरहशयाने ...॥ मानसी, सञ्चयिता, पृ.१०४॥

रवीन्द्रः कविः अन्वेषणं करोति– को नरः सशरीरं तत्र प्राप्तवान् यत्र मानससरसीतीरे विरहशयने अनन्तसौन्दर्येषु एका हि प्रिया जाग्रता आस्ते। सा भूम्यां शयनं करोति शृङ्गारविहीना एव तिष्ठति च। पत्युर्यक्षस्य चिन्तया सा रजनीं निद्रां विना जाग्रता सती

यापयति। रात्र्या दीर्घयामा तत्कृते युगायते। केवलं भर्त्रा सह मेलनं भविष्यतीति आशा एव तस्याः प्राणान् धारयति। अत्र कवेः कालिदासस्य मतेन यक्षिणी न केवलं रतिसुखस्य साधनम्, अपि तु पतिव्रता गृहिणी सा प्रकृष्टप्रेम्णः प्रतीकत्वेन चित्रितास्ति। वैभवस्य विलासस्य क्रोडे स्थिताया अपि यक्षिण्या हृदये स्वभर्तारं प्रति स्नेहस्याधिक्यं वर्तते। तस्या अविचलपातिव्रत्यस्य वर्णनावसरे यक्षः कथयति–

जाने सख्यास्तव मयि मनः सम्भृतस्नेहमस्मा-
दित्थम्भूतां प्रथमविरहे तामहं तर्कयामि।
वाचालं मां न खलु सुभगम्मन्यभावः करोति
प्रत्यक्षन्ते निखिलमचिराद्भ्रातरुक्तं मया यत्॥ (उ.मे.३१)॥

यक्षिणी गुणवती तथा च कल्याणी आसीत्। सा पत्युः कल्याणम् एव इच्छति। एवमेव यक्षस्य हृदयेऽपि स्वकीयभार्यायाः कृते प्रेमातिशयो दृश्यते। प्रथमतो यौवनस्य आवेगस्तं कर्तव्यच्युतमकरोत्, परन्तु वर्षभोग्यविरहरूपेण प्रायश्चित्तेन विशोधितः सः अन्तः किमपि परिवृत्तिं गतः। विरहावस्था एव निकषस्वरूपा यया परीक्षितः प्रेमिको दाम्पत्यप्रेम्णः परां काष्ठां प्राप्नोति। यथा कुमारसम्भवे महाकाव्ये, शाकुन्तले नाटके तथा मेघदूतेऽपि एतदेव तत्त्वं कविना प्रकाशितम्। अत एव सम्भोगाकाङ्क्षा अपि विप्रलम्भगतां वेदनां प्रति अङ्गभावमासेवते इति तस्या वस्तुभूताया अपि गौणत्वमेव सूचितम्।

यक्षवधूः यक्षस्य द्वितीयं जीवितमस्ति, पतिविरहे सा चक्रवाकविरहे चक्रवाकीव कथङ्कारं जीवनं यापयति–

तां जानीथाः परिमितकथां जीवितं मे द्वितीयं
दूरीभूते मयि सहचरे चक्रवाकीमिवैकाम्॥ (उ.मे.२०)

वैदिककाले अपि चक्रवाकमिथुनम् उत्कृष्टप्रेम्ण आदर्शतया स्वीकृतमासीत्। आदिकविना वाल्मीकिना अपि सीतायाः विषये लिखितं यद् विरहेण व्यथिता सीता तुषाराहता कमलिनीव चक्रवाकवियुक्ता चक्रवाकीव अनन्यमानसा अभवत्-

हिमहतनलिनीव नष्टशोभा
व्यसनपरम्परयातिपीड्यमाना।
सहचररहितेव चक्रवाकी
जनकसुता कृष्णां दशां प्रपन्ना॥
(रामायणे सुन्दरकाण्डे १६.३०)॥

भार्याप्रेम्णि व्यग्रो यक्षः प्रथमं भार्यायाः कुशलमेव ज्ञातुमिच्छति–

अव्यापन्नः कुशलमबले पृच्छति त्वां वियुक्तः
पूर्वाभाष्यं सुलभविपदां प्राणिनामेतदेव॥ (उ.मे.३८)।

रामायणेऽपि एवंविधं वर्णनं दृश्यते। यथा–

तेनाहं प्रेषितो दूतस्त्वत्सकाशमिहागतः।
त्वद्वियोगेन दुःखार्त्तः स त्वां कौशलमब्रवीत्॥
(रामायणे सुन्दरकाण्डे ३४.३४)॥

भार्याप्रेम्णा सम्प्लुतहृदयो यक्षः तद्भावनैकतानः सर्वत्रैव प्रकृतौ आत्मीयां दाम्पत्यप्रेमच्छविं यक्षवध्वाः प्रतिकृतिं च आविष्करोति। मेघेन सह विद्युल्लतायाः सम्बन्धः पूर्वमेघे तथैव वर्णितः यथा स यक्षयक्षवध्वोः प्रणयप्रतीकतया चकास्ते। नदीनां वर्णनमत्र विशेषतः अवधेयम्। तादृशानि सर्वाणि पूर्वमेघगतानि प्रकृतिवर्णनानि विरहिणः प्रेमप्रतिरूपकाणि इव आभान्ति।

कुमारसम्भवे शिवपार्वत्योर्विवाहानन्तरं कविना तयोः देवतात्मनोः सम्भोगश्रृङ्गारस्य उन्मुक्तभावेन वर्णनं कृतम्। मेघदूते पुनः यक्षदम्पत्योस्तु विप्रयोगस्य तथैव अगाधमानससंस्पर्शिचित्रणं कृतम्। तदेतत् चित्रणं न किमपि दैविकम् आधिदैविकं वा अपि च ऐकान्त्येन मानविकम् एव प्रतीयते। कालिदासो मुख्यतया मानवहृदयस्य कविरेव, अत एव यक्षयक्षवध्वोः प्रेमवर्णनमुखेन मानवोचितानाम् अनुभवानाम् उपस्थापनम् एव कालिदासेन वस्तुगत्या विहितम्। विरहिण्याः तस्या अवस्थावर्णनं यक्षमुखेन कविना कृतम्–

आद्ये बद्धा विरहदिवसे या शिखा दाम हित्वा
शापस्यान्ते विगलितशुचा तां मयोद्वेष्टनीयाम्।
स्पर्शक्लिष्टामयमितनखेनासकृत्सारयन्तीं
गण्डाभोगात्कठिनविषमामेकवेणीं करेण॥ (उ.मे.२९)॥

भार्याया वियोगविधुरदशाया विषये यक्षस्य अखण्डप्रत्ययः अवधानातिशयमर्हति। भारतीयगृहिण्या एवंविधा विरहकातरदशा कालिदासेन दाम्पत्यस्य उत्कर्षं प्रतिपादयितुं लिखिता। यक्षवधूः पतिव्रता भार्या अस्ति यस्या अन्तःकरणे भर्तुः अविकलं प्रतिबिम्बम् अङ्कितं वर्तते। पत्युः वियोगदशाम् अनुमीय नार्य्यः यत् सुखसौन्दर्यं विस्मरन्ति तत्र तु इदमेव सममनस्कत्वं कारणम्। यक्षः स्वप्राणदयितायां बद्धस्नेहो वर्तते। रात्रिकाले स्ववध्वाः सकाशे सन्देशोपस्थापनं यक्षो मेघाय उपदिशति, किन्तु भार्याविषयिकायाः चिन्तायाः आधिक्यतः स कथयति – यद् यदि सा विरहिणी निद्रामग्ना भवेत् तर्हि तां मेघो न प्रबोधयितुमर्हति–

तस्मिन् काले जलद यदि सा लब्धनिद्रासुखा स्यात्
अन्वास्यैनां स्तनितविमुखः याममात्रं सहस्व।
मा भूद् अस्याः प्रणयिनि मयि स्वप्नलब्धे कथञ्चित्
सद्यः कण्ठच्युतभुजलताग्रन्थिगाढोपगूढम्॥ (उ.मे.३४)।

यक्षप्रार्थनया क्रोडीकृतानि प्रणयिहृदयस्य मसृणत्वम् आन्तरिकी प्रियजनसुखेच्छा प्ररूढस्नेहं प्रति आन्तरिकविश्वासश्च हृदयं स्पृशन्ति। एतेन वधूविषयके प्रेम्णि यक्षस्य स्नेहप्राधान्यम् एव सन्दर्शितं भवति। दयिताजीविताालम्बनार्थी स यक्षः प्रथममेव मेघमुखेन निवेदयति– रामगिर्याश्रमस्थः स प्रणयी अव्यापन्न आसीत्। यदि पत्युः जीवनधारणस्य वृत्तान्तं सा न तत्क्षणं श्रोष्यति तर्हि कदाचित् सा पञ्चत्वं प्राप्ता भविष्यति इत्यस्ति तस्याशङ्का।

अस्मिन् कुशलप्रश्ने कविना न किमपि कृत्रिमत्वमवलम्बितम्, अपि तु वियुक्तयोः दम्पत्योः स्वाभाविकाचरणमेव उपवर्णितम्। तदनन्तरं मेघेन इदं कथनीयं यद् दूरवर्ती तव सहचरः स्वकीयानि अङ्गानि तव अङ्गैः सह युक्तानि कर्त्तुमिच्छति, किन्तु विधिना सः अवरुद्धमार्गः सञ्जातः। अत एव स यक्षः सङ्कल्पैः तव अन्तःकरणे प्रविष्टुम् इच्छति। स क्षीणः, त्वमपि क्षीणा। स विरहज्वालया तप्तः, त्वमपि विरहाग्निना ज्वलसि। यथार्थस्य दाम्पत्यस्य पात्रीभूतौ प्रणयिजनौ सममार्गौ सममनस्कौ एव भवतः। तदेव साम्यम् अत्र कविना यक्षसन्देशमुखेन प्रकटितम्। यक्षः पूर्वास्वादितं प्रणयसुखं स्मारं स्मारं पीडितो वर्तते। मुक्ताजालैः प्रियायाः केशानामलङ्करणम्, अङ्गानां स्पर्शनम् इत्यादयः विनोदपरिपूर्णाः स्मृतयो यक्षम् उत्कण्ठया पूरितं कुर्वन्ति। अतः भार्यायाः प्रतिकृतिम् अन्वेष्टुम् ईहते येन तस्य वियोगसन्तापो दूरीभवेत्। यक्षः प्रकृत्यां स्वभार्याया रूपसन्धानतत्परो वदति –

श्यामास्वङ्गं चकितहरिणीप्रेक्षणे दृष्टिपातं
वक्त्रच्छायां शशिनि शिखिनां बर्हभारेषु केशान्।
उत्पश्यामि प्रतनुषु नदीवीचिषु भ्रूविलासान्
हन्तैकस्मिन्क्वचिदपि न ते चण्डि सादृश्यमस्ति॥ (उ.मे.४१)॥

प्रकृत्यां भार्यायाः सादृश्यमप्राप्य स यक्षः शिलायां धातुरागैः भार्यायाः प्रणयकुपितामाकृतिं रचयति, किन्तु तथा कुर्वतः अपि तस्य नेत्रयोः अश्रुप्रवाहो निस्सरति येन स आलेख्यद्वारेणापि प्रियया सह मेलनं प्राप्तुमसमर्थो भवति। स स्वप्नेऽपि भार्यालिङ्गनकामनया स्वबाहू प्रसारयति। भार्यायाः कृते तस्य दुःखातिशयं, व्यग्रतां च पश्यन्त्यो वनदेव्यः अपि रुदन्ति। यक्षो भार्यार्थमेव जीवति, तथा च प्रियामपि धैर्यधारणाय उपदिशति-

नन्वात्मानं बहु विगणयन्नात्मनैवावलम्बे
तत्कल्याणि त्वमपि नितरां मा गमः कातरत्वम्।
कस्यात्यन्तं सुखमुपनतं दुःखमेकान्ततो वा
नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण॥ (उ.मे.४६)॥

यक्षस्य अनेन कथनेन भार्यां प्रति तस्य चिन्ता, अनुरागातिशयो यथा ज्ञायते तथैव

कालिदासस्य जीवनदर्शनमपि अभिव्यज्यते। यक्षसन्देशः प्रेमराशेः सञ्चयस्य सन्देशः। स प्राणवल्लभायै आस्थां जनयति यत् तस्या विरहेणापि प्रेम्णः क्षीणता नास्ति, अपि तु उत्तरोत्तरं पराकाष्ठाभूमिमधिगच्छति। बहुधा प्रियां समाश्वासयितुं चेष्टते, किन्तु पत्नीविरहे तज्जीवनमपि प्रातःकालिकं कुन्दपुष्पमिव शिथिलं जातम्। प्रियायाः कुशलं श्रुत्वैव स जीवितुं शक्नोति–

आश्वास्यैवं प्रथमविरहोदग्रशोकां सखीं ते
शैलादाशु त्रिनयनवृषोत्खातकूटान्निवृत्तः।
साभिज्ञानप्रहितकुशलैः तद्वचोभिर्ममापि
प्रातःकुन्दप्रसवशिथिलं जीवितं धारयेथाः॥ (उ.मे.५०)॥

अत्र दम्पती परस्परविरहितौ जीवनावलम्बनरहिताविव वर्तेते। उभयोः कृते परस्परं कुशलस्य अभिज्ञानमावश्यकं वर्तते। दाम्पत्यस्य इयमेव साधना, प्रेम्णः अयमेव सर्वोत्कृष्टः अभिलाषः यत् प्रियः सकुशलः तिष्ठतु। एतदतिरिच्य मेघदूतकाव्यविश्लेषणाद् दाम्पत्यस्य स्वाभाविकं धर्मद्वयं प्रतीयते।

१. प्रकृतं दाम्पत्यं न कर्तव्यान्तरं प्रणयिन औदासीन्यं स्यात्, गाढप्रणयेनापि जनेन स्वाधिकारप्रमत्तेन न भवितव्यम्। तेन खलु यक्षः कुवेरशापादस्तगमितमहिमा सञ्जातः। सत्यमुक्तं रवीन्द्रनाथेन प्राचीनसाहित्यम् इति सङ्कलने मेघदूताख्ये प्रबन्धे– यो हि प्रणयः कर्तव्येषु अस्माकमवहेलनमावहति स मोहैकतानः न स्थेमानं लभते। पत्नीप्रेम्णा उद्वेलीभूतस्य राजराजस्यानुचरस्य यक्षस्य स्वाधिकारात् प्रमत्तस्य भर्तृविहितेन दण्डेन प्रणयिनो विरहः अजायत। मोहान्धप्रेम्णः अन्तिमा परिणतिरत्र सूचिता।

२. दाम्पत्यस्य स्वभावोऽयं यत्– सम्भोगापेक्षया विप्रलम्भेन एव प्रेम्णः परिपाकः। सम्भोगश्रृङ्गारः कालिदासेन नोपेक्षितः। अत एव यक्षस्य कामावस्थायाः वर्णनमपि तेन सविस्तरं विहितम्। परन्तु विप्रलम्भद्वारेण सम्भोगस्य प्रगाढतरे स्थायिनि प्रेम्णि उत्तरणमेव दाम्पत्यमहिम्नो लक्षणम्। पूर्वमेघोत्तरमेघात्मकेन खण्डद्वयेन कालिदासः तदिदमुत्तरणं सम्यक् प्रतिपादितवान् यस्य व्यापकतरः प्रगाढतरश्च प्रकाशः तस्य काव्यान्तरमपि परिदृश्यते।

☆ ☆ ☆

## परिशीलितग्रन्थसूची

१. कालिदासः. (१९६०). मेघदूतम् (सञ्जीवनी-रमा-टीकोपेतम्). सम्पा. रामतेजपाण्डेयः. काशी : पण्डितपुस्तकालयः।
२. रमाशङ्करतिवारी. (१९९९). महाकवि कालिदास. वाराणसी : चौखम्बाविद्याभवन।
३. कालिदासः. (१९१९). मेघसन्देशः. सम्पा. टि.गणपतिशास्त्री. त्रिवन्द्रम् : त्रिवन्द्रम् संस्कृतसिरिज।
४. कालिदासः. (१९०९). मेघसन्देशः (विद्युल्लताटीकोपेतः). सम्पा. आर्.वि.कृष्णाचार्यः. श्रीरङ्गम् : श्रीवाणीविलासप्रेस।

# Medicinal Aspects in *Agni Purāṇa*

Yagandla Suresh*

पुराणं सर्वशास्त्राणां प्रथमं ब्रह्मणा स्मृतम्।
नित्यं शब्दमयं पुण्यं शतकोटिप्रविस्तरम्।
अनन्तरं च वक्त्रेभ्यो वेदास्तस्य विनिर्गताः ॥ (*Matsya Purāṇa*)

The word *Purāṇa* signifies the ancientness. It is this word that clarifies the meaning that whatever is old and ancient that is *Purāṇa*. It is imagined that these *Purāṇas* must have been created before *Vedavyāsa*. It is stated that hundred crores of *ślokas* were revealed from the mouth of Lord *Brahmā* much before *Purāṇas*, The later revealations were Vedas.

आयुर्वेदं मम ब्रूहि नराश्वेभरुगर्दनम्।
सिद्धयोगान् सिद्धमन्त्रान् मृतसञ्जीवनीकरः ॥
(*Agni Purāṇa 278/2*)

*Agnideva* heard the *Āyurveda* medicines from *Suśruta* who was preached by *Dhanvantari*. The diseases and their remedies suggested to the humans, horses, elephants are '*Siddha Yogas*' and '*Mantras*'. A very big list with herbals was given in chapter 279. Some of them in the present days are still in use as far as availability is concerned. When the patient is suffering with fever he will be given some liquids with herbal mixtures. After the temperature comes down he should be given some other liquids. After six days of the fever he should be given some strong directions with herbals mixed in water. Neem and Pomegranate are taste buds to the patient who is in the fever. Honey, wheat, ghee, milk, old rice must be preferred by the patient.

नासारोगेषु च हितं दूर्वा प्रसाधितम्।

---

*Ph.D Research Scholar, Department of Sanskrit, Osmania University & Lecturer in Sanskrit, Bharathiya Vidya Bhavan's Vivekananda College, Sainikpuri-Secunderabad. Email : sureshydsrm@gmail.com.

भृङ्गराजरसे सिद्धं तैलं धात्रीरसेऽपि वा॥
नस्यं सर्वामयेष्विष्टं मूर्धजं तूद्भवेषु च।
शीततोयान्नपानञ्च तिलानां विप्र भक्षणम्॥
द्विज दार्ढ्यकरं प्रोक्तं तथा तुष्टिकरं परम्।
गण्डूषं तिलतैलेन द्विज दार्ढ्यकरं परम्॥

(*Agni Purāṇa 278/39-41*)

There are some medicines suggested to the nasal diseases. *Durvā* leaves with ghee is the best curative process. The Amla juice with oil mixed cures the headaches and confusions. The cool water with rice, til powder strengthens the gums and satisfy the taste buds. Til oil with *gaṇḍuṣa* makes the teeth and gums strong.

धात्रीफलान्यथाज्यञ्च शिरोलेपनम् उत्तमम्।
शिरोरोगविनाशाय स्निग्धम् उष्णञ्च भोजनम्॥
तैलं वा वस्तमूत्रं च कर्णपूरणम् उत्तमम्।
कर्णशूलविनाशाय सर्वशुक्तानि वा द्विज॥

(*Agni Purāṇa 278/43-44*)

The paste of Amla fruits mixed with ghee should be applied to the head injuries. Fresh and hot Lunch also reduces the head pain. The urine of the Goat is a ear drop medicine to the suffers of ear pain. This animal's urine is good to all diseases of head also.

When the wound is about to leak the pus and blood and to be cured later the powdered neem leaves are best application on the wound for quick relief. The needle treatment is also suggested. The serpent's bite will be no effective if the persons eats leaves of neembu tree. Likewise to the bite of Scorpion – ghee, smoke, peacock feathers of suggested. The milk arka leaves reduces the poison of dog's bite.(*Agni Purāṇa* 278/44-47)

The pediatric medicine was developed so high in *Agni Purāṇa* and the herbals prescribed to the child are very effective

to the moral and physical life. Memory power, clarity in speech, glow and confidence in the performance levels are essentials to the present generations who are leading corporate life. There is an interesting idea linked with environmental protection in *Agni Purāṇa*. If we are blessed to see the coconut trees in city houses the mud in the first portion of the stem will have medicinal value.

The miracles generally we watch in circus programmes. Walking on the fire crystals is not a miracle according to *Agni Purāṇa*. The mixture of camphor, oil extracted from Leach and Frog with *Patali* will give power to walk on the bed of fire to our surprise.

*Agni Purāṇa* insisted and repeated giving the names of herbs, fruits, leaves, roots and other medicinal items in almost all varieties of medical approaches. Starting from 278 to 286 chapters.

Balance of medicinal herbs advised to the physical as well as mental problems of the human body. The last medical kit of *Agni Purāṇa* (284 Ch.) suggests prayers to cure the diseases. This chapter is almost a silent prayer for fulfilling the desires a mankind by constant repetitions of the mantra. The physics of the mantra was discussed properly. Effect of the mantra was established in an auspicious standards.

We can order for a healthy society and demand virtuous and glorified human world if we are good enough to implant the medicinal courses as prescribed and diagnosed by Sage *Dhanvantari*.

### *1. Gajacikitsā*

*Agni Purāṇa* is very selective in describing the characteristics of elephants. Elephants must have lot of patience to take long breath. The best category elephant should have 18-20 nails. It should have constant flow of rut on the temples in winter seasons.

The Right side tusk must be with good height. The description of elephants' limbs is vividly described in five slokas.

When curative process started *Agni Purāṇa* as usual in its original schedules prescribed good number of Herbs as medicines to different Health complaints. When elephants are in *Vāta roga* they should take head bath with oil and ghee.(287/6). If they are suffering *Paṇḍu roga* urine of the cow, turmeric powder, ghee must be give to drink.

गोमूत्रं पाण्डुरोगेषु रजनीभ्यां घृतं द्विज।
अनाहे तैलसिक्तस्य निषेकस्तस्य शस्यते।

When the elephant is on constipation oil massage is to be done before the bath. *Pañcalavaṇa Madirā*is to be offered for drinking purpose. When suffering with head pain the elephant must be given head bath and *Nasyam*.

When the hand is not active *Nasyam* and salt mixed ghee must be given to the elephant. From 22 to 33 slokas number of remedies are suggested to activate the life of elephants. The gist of these slokas is that elephants must be given. If they are offered the dry grass they may get irritation. When elephants are not mighty milk should be offered for regaining strength – a mixture of the above mentioned meat balls should be feeded to the elephants who participate in wars. With some particulars herbs the smoke as धूपहाराति should be given to the elephant for a victory in the battle field. The mixture of excretion of some peculiar Birds mixed with the milk of trees and wine should be ointment to the eyes of elephants for impleading the enemies in the war field. This is called अञ्जनं which is liked by Royal Elephants.The nails must be removed when growth takes place. Oil head bath must given every month. The dry dung must be spread on the ground where elephants are sleeping.

The social conditions at the time of *Agni Purāṇa* were bright

